गजपति श्रीनारायणदेवविरचितः

संगीतनारायणः

ORISSA SANGEET NATAK AKADEMI

ओड़िशा संगीत-नाटक एकाडेमी

भुवनेश्वर

Sangeeta Narayanah

Printed by

Pandit A. P. Pathak

Rashtrabhasha Co-op. Press

Cuttack-1

गजपति श्रीनारायणदेवविरचितः

संगीतनारायणः

ओड़िशा संगीत-नाटक एकाडेमी

भुवनेश्वर

Published by
THE ORISSA SANGEET NATAK AKADEMI
Bhubaneswar
Orissa

प्रथमसंस्करणम्
१९६६
First Edition
1966

Price—Rs. ৭=৭০

प्राक्कथनम्

विदितचरमेवेदं सर्वेषां कलाविलासचतुराणां यत् पुराणविश्रुते उत्कलप्रदेशे वहवः कविपण्डितग्रन्थकाराः आविरभवन् । तेषु केचन सम्प्रति निखिलभारतीयपण्डितप्रवराणां परमप्रीतिभाजः संजाताः । परं च अन्ये बहवो विद्यन्ते येषां बहुश्रमसाधनप्रसूताः कृतयः अद्यावधि तालपत्रपुस्तकान्तर्गताः सन्तः लोकलोचनागोचरा एव । सुतरां ते यथा प्रकाशिताः मुद्रिताश्च भवेयुस्तथा सर्वकारैर्विद्वद्भिश्च यतितव्यम् ।

संप्रति गजपति जगन्नाथनारायणदेवैः (१७१८–१७६७) 'पारलाखेमण्डी' मण्डलमण्डनभूतैः सकलितः 'संगीतनारायणः' ओड़िशा संगीत-नाटक एकाडेमी-पक्षतः प्रकाशितः ।

तेषां नरपतीनां गुरुप्रवरैः कविरत्नोपाधिविभूषितैः वहुशास्त्र-विशारदैः पुरुषोतममिश्रपादैः प्रवलेन प्रयत्नेनैव ग्रन्थस्यास्य संकलनं संसाधितमिति कथ्यते तद्विदैः ।

तद्यथा भवतु संगीतनारायणः संगीततत्त्वपरिशीलनपटूनां सार्व-भारतीयपण्डितानां शुभदृष्टिमाकर्षयतु इति आशास्महे । एकाधिकतालपत्र-पुस्तकानां साहाय्येन पण्डितश्रीवानाम्बरआचार्य्यमहोदयैः, कविचन्द्र कालिचरणपट्टनायकमहोदयैस्तथा राज्यसर्वकाराणां प्रत्नतत्त्वविभागाध्यक्षैः श्रीकेदारनाथमहापात्रमहोदयैः ग्रन्थान्तर्गतानां श्लोकानां तथा गद्यांशानां पाठशुद्धिः परीक्षिता निष्पादिता च इति कृत्वा एते विद्वांसः धन्यवादार्हाः ।

भुवनेश्वर
१–३–६६

गौरीकुमार ब्रह्मा
सेक्रेटरी
ओड़िशा संगीत नाटक एकाडेमी

FOREWORD

The Sangeeta Narayanah by Gajapati Jagannatha Narayana Deva, a Rajah of Parlakemedi (C. 1718—1767 A. D.) is a treatise on music and dance. The Orissa Sangeet Natak Akademi has undertaken its publication with a view to furnishing materials to the scholars in the field for a comparative and critical study of Orissi music and dance which, of late, have drawn the attention of the scholars in the field for their originality, grace and charm. It is hoped, indologists in general and musicologists of Orissa in particular would certainly feel delighted at the publication of this work.

Bhubaneswar
1-3-66

S. K. Sahu
President
ORISSA SANGEET NATAK AKADEMI

सङ्गीतनारायणः

प्रथम-परिच्छेदः

नीलाद्रिकन्दरानन्दि मन्दरालयबन्दितम् ।
वन्दे वन्दारु-मन्दारमिन्दिरामन्दिरं महः ।१।
प्रवृत्ततालं करतालिकाभिराभीरिकाणां कलवेणुगीतम् ।
नृत्यन्तमत्यन्तमुदीतहासं रासं भजन्तं हरिमन्तरीडे ।२।

अथ सङ्गीतोत्पत्तिमाह—
पुरा चतुर्णां वेदानां सारमाकृष्य पद्मभूः ।
इदं तु पञ्चमं वेदं सङ्गीताख्यमकल्पयत् ।३।
कस्मात् किं जातमित्याह—
ऋग्भ्यः पाठ्यमभूद्गीतं सामभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्वणः स्मृताः ।४।
सम्प्रदायशुद्धिमाह—
ब्रह्मेश - नन्दि - भरत - दुर्गा - नारद - कोहलाः ।
दशास्य-वायु-रम्भाद्याः सङ्गीतस्य प्रचारकाः ।५।
प्रशंसामाह—
श्रुतिस्मृत्यादि-साहित्य-नानाशास्त्रविदोऽपि च ।
सङ्गीतं ये न जानन्ति ते द्विपादा मृगाः स्मृताः ।६।
प्रयोजनमाह—
त्रिवर्गफलदाः सर्वे दानयज्ञस्तवादयः ।
एकं सङ्गीतविज्ञानं चतुर्वर्गफलप्रदम् ।७।

न च त्रिवर्गसाधनं नाट्यमेतेन चतुर्वर्गफलप्रदं विरुद्धमिति वाच्यम् । त्रिवर्गस्योपलक्षणत्वात् ।

कथमित्याह—

हरीशादिस्तुतेर्द्धर्मो धनकामौ नृपादितः ।
निष्कामं तदनुष्ठानान्मोक्षस्तस्मात्तदभ्यसेत् ।८।

किं स्वरूपमेतदित्याह—शिरोमणौ—

गीतं वाद्यं च नृत्यं च त्रयं सङ्गीतमुच्यते ।
गीतवाद्य उभे एव सङ्गीतमिति केचन ।८।
तत्तिर्यङ्नरदेवादिमनोहारि प्रकीर्तितम् ।

विष्णुपुराणेऽपि—

काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ।९।

किञ्च—

गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ।१०।

इत्यत्र का गतिरितिचेत्तस्य रुद्रेण सह कालान्तरे मुक्तिरिति न किमप्यसङ्गतम् ।

तत्र च—

मार्गदेशीविभेदेन सङ्गीतं भवति द्विधा ।
स्वर्गे मार्गाश्रितं देश्याश्रितं भूतलरञ्जनम् ।११।

तत्र प्रथमोद्दिष्टत्वेन गीतस्य वक्ष्यमाणतया नादं विना तदनुपपत्तेः प्रथमं नादमाह—। तदुक्तम्—

न नादेन विना गीतं न नादेन विना स्वरः ।
न नादेन विना रागस्तस्मान्नादात्मकं जगत् ।इति।१२।

तदुत्पत्तिप्रकारमाह—

आत्मा विवक्षमाणोऽयं मनः प्रेरयते यतः ।
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ।१३।

नकारः प्राणवायुः स्यादकारो हव्यवाहनः ।
ताभ्यामुत्पद्यते यस्मात्तस्मान्नादोऽयमुच्यते ।१४।

नदाभ्यां प्राणाग्निभ्यां जातत्वान्नाद इत्यर्थः ।

व्यवहारे त्वसौ नादः प्रोच्यते त्रिविधो बुधैः ।
मन्द्रो हृदि स्थितः कण्ठे मध्यस्तारश्च मूर्द्धनि ।१५।
द्विगुणः किल मानेन पूर्वस्मादुत्तरोत्तरः ।

कोहलीये—

आहतोऽनाहतश्चेति स नादो द्विविधो मतः ।
यत्रोभयस्य (श्च) संयोग आहतः स प्रकीर्त्तितः ।१६।
आकाशसम्भवो नादस्तथाऽनाहत उच्यते ।
आहतं नादमाकृष्य तथाऽनाहतसंज्ञकात् ।१७।
तं नादं सप्तधाऽकार्षीत्तथा षड्जादिभिः स्वरैः ।इति।

वस्तुतस्तु—

आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन् ।
मुखेऽभिव्यक्तिमायाति यः स नादः प्रकीर्तितः ।१८।
स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः ।
आद्यः कायभवो वीणासम्भवस्तु द्वितीयकः ।१९।
तृतीयश्चापि वंशादिसम्भवः स त्रिधा मतः ।इति।
एवं बहुभिराचार्यैर्नादस्तु बहुधोदितः ।
प्रकृतानुपयोगित्वान्न मया स प्रपञ्चितः ।२०।

अथ गीतम्—

तल्लक्षणं त्वाचार्याणां मतभेदाद्बहुविधम् । तत्रापि बहुसम्मतमेवोच्यते—

सङ्गीतसारे—

"गीतं रञ्जकधातुमातुसहितम्'
गीतस्यावयवोधातू रागादिर्मातुरुच्यते ।

कौमुद्याम्—

'रागैर्विरचितं गीतमिति ।

गीतप्रकाशे तु—

रञ्जकस्वरसन्दर्भो गीतमिति ।

वस्तुतस्तु, नारदसंहितायाम्—

धातुमातुसमायुक्तं गीतमित्यभिधीयते ।
तत्र नादात्मकं गेयं धातुरित्यभिधीयते ।२१।

गुणादिधारणाद्धातुर्गीतावयव एव सः ।
गुणालङ्कारवाक्येषु रञ्जनोजस्विता(नोज्ज्वलता)यदि ।२२।
मातुः स गदितस्तज्ज्ञैर्मानसस्य प्रमोदनात् ।

नादात्मकमिति नाद एवात्मा स्वरूपं यस्य । अत्र नादपदेन नादजन्यानां श्रुतिस्वरादीनां ग्रहणम् ।

यदुक्तम्—

नादाच्च श्रुतयो जातास्ताभ्यः षड्जादयः स्वराः ।
तेभ्यः स्युर्मूर्च्छनास्ताभ्यस्तानाख्या ग्रामसंभवाः ।२३।

तत्र च—

नादः श्रुतिः स्वरा ग्राममूर्च्छनातानवर्णकाः ।
स्वरा ग्रहांशन्यासाख्या जातिश्चेति क्रमादिह ।२४।

ग्रहस्वरोंऽशस्वरो न्यासस्वरश्चेति तत्र नाद उक्तः ।

अथ श्रुतयः—

स नादः श्रुतयो द्वाविंशतिः स्यान्मरुताहतः ।
द्वाविंशतिस्तिर्यगूर्द्धनाड्यो हृदयमाश्रिताः ।२५।

ता यावत्यस्तु तावत्यः श्रुतयः परिकीर्तिताः ।
क्रमादुच्चोच्चता युक्ता वीणावादेन लक्षिताः ।२६।

कफादिदूषिते कण्ठे तासां व्यक्तिर्न जायते ।

ताश्च—

चतस्रः पञ्चमे षड्जे मध्यम श्रुतयो मताः ।
ऋषभे धैवते तिस्रो द्वे गान्धारे निषादके ।२६।

किं नामिकास्ता इत्याह—

नान्दी विशाला सुमुखी विचित्राः षड्जजाः स्मृताः ।
चित्रा घना चालनिका ऋषभे तिस्र ईरिताः ।२८।
गान्धारे सरसा माला मध्यमे मागधी शिवा ।
मातङ्गिका च मैत्रेयी चतस्रः परिकीर्तिताः ।२९।
बाला कला कलरवा शार्ङ्गरव्यपि पञ्चमे ।
मालारसाऽमृताश्चेति तिस्रो धैवतनामनि ।३०।
निषादनामनि द्वे च विजया मधुकर्यपि ।
इति स्वराणां श्रुतयो द्वाविंशतिरुदाहृताः ।३१।

स्वराणामित्यत्र पुत्राणां पिता इतिवत् जन्यजनकसम्बन्धे षष्ठी । स्वराणां जनिका इत्यर्थः । तदुक्तं हरिनायकादिभिः । "जाता श्रुतिभ्यः षड्जाद्या" इति, न च 'षड्जजाः स्मृताः' इति कथं सङ्गच्छतामिति वाच्यम् । तत्र जनिधातोरन्तर्भावितण्यर्थं (णिजर्थ) तया समाधेयम् । षड्जजनिका इत्यर्थः ।

तदेव स्फुटतयोक्तं कोहलीये—

सिद्धिः प्रभावती कान्ता सुभद्रा च मनोहराः ।
साधयन्ति स्वरं षड्जं प्रजापतिमुखोद्गताः ।३२।

एता मनोहराः श्रुतय इति सम्बन्धः ।

शिखा दीप्तिमती चैव उग्रा चाग्निसमुद्भवाः ।
श्रुतयः साधयन्त्येवं ऋषभं नामतः स्वरम् ।३३।
ह्लादिनी विश्रुतिश्चेति श्रुती अमृतसम्भवे ।
गान्धारं साधयेते द्वे यथार्थगुणसंयुते ।३४।
वीरा सर्वसहा क्षान्तिर्विभूतिस्तदनन्तरम् ।
मध्यमं साधयेन्त्येताः श्रुतयः पृथिवीभवाः ।३५।
मालिनी चपला लोला सर्वारत्ना प्रभावती ।
श्रुतयः सामपुत्र्यस्तु साधयिष्यन्ति पञ्चमम् ।३६।
शान्ता विकल्पिनी चैव हृदयोन्मिलिनी तथा ।
धैवतं साधयन्त्येता यक्षराजविनिर्मिताः ।३७।

विस्तारिणी प्रशस्ता (प्रसन्ना) च निषादस्वरमुत्तमम् ।
साधयेते श्रुतीवीरयमराजमुखोद्गते ।३८।

अत्र पूर्वोक्तश्रुतीनामेवं देश-विशेषे भिन्ननामत्वम् । एतेन तास्ताः श्रुतय एव तत्तत्स्वररूपेण जायन्त इति तज्ज्ञाः । (सस्वरो यः श्रुतिः) बस्तुतस्तु स्वरूपं ज्ञातुमशक्यम् ।

तदुक्तम्—

श्रुतिस्थाने स्वरान् वक्तुं नालं ब्रह्मापि तत्त्वतः ।
जलेषु चरतां मार्गो मीनानां नोपलक्ष्यते ।३९।इति

अपरञ्च—

समश्रुतीनामेतासु स्वराणां यास्तु भेदिकाः ।
प्रयोगविधुरत्वेन ता नोक्ताः श्रुतिजातयः ।४०।

अथ स्वराः

सस्वरो यः श्रुतिस्थाने स्वरन् (स्वरान्) हृदयरञ्जकः ।

एतेन स्वरशब्दस्य योगरूढित्वमुक्तम् । किम्वा श्रोतृमनो यस्मात् रञ्जयन्ति ततः स्वरा इति । एतेन रूढ़ित्वमुक्तम् ।

के ते इत्याह—

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ।४१।
सा रि ग म प ध नि श्चेत्येतेषामपराभिधा ।
ते त्रेधा स्युर्मन्द्र-मध्य-तार-भावं समाश्रिताः ।४२।
त्रीणि स्थानानि तेषां हि हृदि मन्द्रोऽभिधीयते ।
कण्ठे मध्यो मूर्न्धि तारो द्विगुणस्तूत्तरोत्तरम् ।४३।

एतेषां यौगिकत्वमप्याहुः, यथा—

नासां कण्ठमुरस्तालुजिह्वां दन्तांश्च संस्पृशन् ।
षड्भ्यः संजायते यस्मात्तस्मात् षड्ज इति स्मृतः ।४४।

दामोदरस्तु अन्यथाह—

वायुः संमूर्च्छितो नाभेर्नाड्याश्च हृदयस्य च ।
पार्श्वयोर्मस्तकस्यापि षण्णां षड्जः प्रजायते ।४५।इति

नारदसंहितायामिति मुक्तावल्याम्—

नाभिमूलाद् यदा वर्ण्ण उत्थितः कुरुते ध्वनिम् ।
ऋषभस्येव निर्याति हेलया ऋषभः स्मृतः ।४६।
नाभेः समुद्गतो वायुर्गलं श्रोत्रे च चालयन् ।
सशब्दं येन निर्याति गान्धारस्तेन कथ्यते ।४७।
मध्यमो मध्यमस्थानात् शरीरस्योपजायते ।
नाभिमूलाच्च गम्भीरः किञ्चित्तारस्वभावकः ।४८।
प्राणोऽपानः समानश्च उदानो व्यान एव च ।
एतेषां समवायेन जायते पञ्चमः स्वरः ।४९।
गत्वा नाभेरधोभागं वस्तिं प्राप्योर्द्धगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ।५०।
षड्जादयः षडेतेऽत्र स्वराः सर्वे मनोहराः ।
निषीदन्ति यतो लोके निषादस्तेन कथ्यते ।५१।

तत्र ध्वनिसाम्यकथनद्वारेण तद्रूपमाह—

मयूरः षड्जमाख्याति ऋषभं वक्ति चातकः ।
छागो गान्धारमाचष्टे क्रौञ्चो वदति मध्यमम् ।५२।
कोकिलः पञ्चमं ब्रूते भेको वदति धैवतम् ।
निषादं भाषते हस्तीत्येवं ब्रह्मादिसम्मतम् ।५३।

शिवसंहितायां दामोदरस्तु—

मयूर-वृषभ-च्छाग-क्रोष्टृ-कोकिल-वाजिनः ।
मातङ्गश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ।५४। इति

किं च—

ते वादि-संवादिविवाद्यनुवाद्यभिधाः पुनः ।
स्वराश्चतुर्विधाः प्रोक्तास्तत्र वादी स कथ्यते ।५५।
प्रचुरो यः प्रयोगेषु वक्ति रागादिनिश्चयम् ।
समश्रुतिस्तु संवादी पञ्चमस्य न मः क्वचित् ।५६।
गनीविवादिनौ स्यातां रिधयो(?) र्वातु तौ तयोः ।
अनुवादी भवेच्छेष इति दत्तिलसम्मतम् ।५७।

यः प्रयोगेषु प्रचुरो बहुलः सन् रागादिनिश्चयं कथयति बहुधा प्रयुक्तोऽमुकरागोऽयमिति निश्चयं करोति स वादी स्वरः। पञ्चमस्य समश्रुतिस्तुल्यश्रुतिर्यः स्वरः स संवादी क्वचिन्न मः। कोऽर्थः? मो मध्यमः स्वरः, क्वचित् संबादी न भवति। गनी गान्धार-निषादौ रिधयोः ऋषभधैवतयोः विवादिनौ शत्रू भवतः। वेति पक्षान्तरे। तौ गान्धारनिषादौ तयोः धैवतनिषादयोः विवादिनौ भवतः। शेषः, एतेभ्योऽवशिष्टा ये स्वरास्तेऽनुवादिस्वराः भवन्ति।

किं च—

वादी-नृपस्तथाऽमात्यः संवाद्यथ विवाद्यरिः।
अनुवादी ह्यनुचरो राज्ञः पात्रस्य चेरितः।५८।

वादिसंवादिनोरनुवादी अनुचरतीत्यर्थः।

अथ ग्रामाः—

ग्रामः स्वराणामतिसूक्ष्मभावः संयोजनस्थानकुलं त्रिधा सः।
षड्जस्तथा मध्यम एव भूम्यां गान्धारनामा किल देवलोके ।५९।

अपरं च—

स्वराणां सुव्यवस्थानां समूहो ग्राम इष्यते ।इति।

तत्र—

पञ्चमश्चेन्निर्विकारी षड्जग्रामस्तदोच्यते।
यद्युपान्तश्रुतिस्थोऽयं ग्रामः स्यान्मध्यमस्तदा ।६०।

अयं पञ्चमः यदि उपान्तश्रुतिस्थो भवतीत्यर्थः।

गान्धारो देवगेयत्वान्न मयात्रोपवर्णितः।
जातिभिः श्रुतिभिश्चैव स्वरा ग्रामत्वमागताः ।६१।

कोहलोऽपि—

सप्तैव मूर्च्छनाश्चात्र प्रतिग्रामं प्रकीर्त्तिताः।
आदि द्वि त्रि चतुः पञ्च षट्सप्तस्वपि ता मताः ।६२।
षड्जान्निषादान्तं नेस्तु(?) धान्तं धात्पान्तमिष्यते।
पान्मान्तं मध्यमाद्गान्तं गान्धाराद्दृषभान्तकम्।
ऋषभात्सान्तमित्याहुः षड्जग्रामस्य मूर्च्छनाः ।६३।

तदुदाहरणम्—

१—स रि ग म प ध नि च, २—नि स रि ग म प ध च,
३—ध नि स रि ग म प च, ४—प ध नि स रि ग म च,
५—म प ध नि स रि ग च, ६—ग म प ध नि स रि च,
७—रि ग म प ध नि स च, इति षड्जग्राममूर्च्छना ।

अथोच्यते सुबोधाय मध्यमग्राममूर्च्छनाः ।
माद्गान्तं गाद्गभान्तमृषभात्सान्तमिष्यते ।
सान्न्यन्तं नेद्धवतान्तं धात्पान्तं पाच्चमान्तकम् ।६४।

एतदुदाहरणम्—

१—म प ध नि स रि ग इति, २—ग म प ध नि स रि च,
३—रि ग म प ध नि स, ४—स रि ग म प ध नि च,
५—नि स रि ग म प ध च, ६—ध नि स रि ग म प च,
७—प ध नि स रि ग म च, इति मध्यमग्राममूर्च्छनाः ।

गान्धारस्य त्वनपयुक्ततया नोक्ताः ।

अथ मूर्च्छनाः—

यत्र स्वरो मूर्च्छित एव रागतां
प्राप्तस्तमाहुर्मुनयश्च मूर्च्छनाम् ।
ग्रामोद्भवास्ताः स्वरसप्तसंयुता-
स्तानत्र ये स्युः पुनरेकविंशतिः ।६५।

स रि ग म प ध नीति षड्जग्रामस्यमूर्च्छनाः ।
म प ध नि स रि गेति मध्यमग्राममूर्च्छनाः ।
ग म प ध नि स रीति गान्धारग्राममूर्च्छनाः ।

श्रीनारायणभट्टिटीकायां मूर्च्छनानां चतुर्द्दशबिधत्वं लिखितम् । तत्तु गान्धारग्राममूर्च्छनानां ग्रहणादिति वेदितव्यम् ।

अथासां नामानि—

ललिता मध्यमा चित्रा रोहिणी च मतङ्गजा ।
सौबीरा वर्ण्णमध्या च षड्जमध्या च पञ्चमा ।६६।

मत्सरी मृदुमध्या च शुद्धान्ता च कलावती ।
तीव्रा रौद्रा तथा ब्राह्मी वैष्णवी खेचरी (रि) वरा ।६७।
नादावती विशाला च त्रिषु ग्रामेषु मूर्च्छना: ।
एकविंशतिरित्युक्ताः मूर्च्छनाश्चन्द्रमौलिना ।६८।

एतत्प्रयोजनमाह—

शिवाग्रे मूर्च्छनां कृत्वा ब्रह्महापि विमुच्यते ।

अथ ताना:—

मूर्च्छना एव तानाः स्युः शुद्धा आरोहणाश्रिताः ।

दामोदरस्तु—

विस्तार्यन्ते प्रयोगा ये मूर्च्छना शेषसंश्रयाः ।
तानास्तेऽप्यूनपञ्चाशत् सप्तस्वरसमुद्भवाः ।६९।
तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक् ।
भेदा बहुतरास्तेषां कस्तान् कार्त्स्न्येन वक्ष्यति ।७०।
ग्रामाणां मूर्च्छनानां च तानानां बहवोऽभिधाः ।
प्रकृतानुपयोगित्वादज्ञेयत्वाच्च नेतराः ।७१।

तदुक्तं तानाधिकारे—

तानाः पञ्चसहस्राणि त्रयस्त्रिंशद्भवन्त्यमी ।
अग्निष्टोमिकतानेन शिवं स्तुत्वा शिवो भवेत् ।७२।
तानानामिह शुद्धानामग्निष्टोमादिकाभिधाः ।
सन्ति प्रयोगवैधुर्यान्न मया ताः प्रकीर्त्तिताः ।७३।

अथ वर्ण्णमाह—

स्वरोगानक्रियारम्भप्रयुक्तो वर्ण्ण उच्यते ।
स्थाय्यारोह्यवरोही च संचारीति चतुर्विधः ।७४।

प्रत्येकं लक्षणमाह—

स्थायं स्थायं प्रयोगः स्यादेकस्यैव स्वरस्य चेत् ।
स्थायिवर्ण्णः स विज्ञेयः परावन्वर्थसंज्ञकौ ।७५।

परौ आरोही स्वरोऽवरोहीस्वरश्च तौ । अन्वर्थसंज्ञकौ, अनुगतार्थनामानौ, आरोहतीत्यारोही, अवरोहतीत्यवरोहीत्यर्थः ।

एतत्संमिश्रणाद्वर्ण्णः संचारीति निगद्यते । एतेषां स्थाय्यारोह्यवरोही-स्वराणाम् ।

वर्ण्णा भवन्त्यलङ्कारा रचनायां विशेषतः ।

तत्र च—

षड्विंशतिः स्थायिनः स्यु रोहिणो द्वादशैव तु ।
सञ्चारिणो द्वादशैव द्वादशैवावरोहिणः ।७५।
इति प्रसिद्धालङ्कारा द्विषष्ठिपरिकीर्त्तिताः ।
ग्रन्थविस्तरतो भीतेर्मया नेह प्रकीर्त्तिताः ।७६।

मत्कृतालङ्कारचन्द्रिकायां सर्वे प्रपञ्चिताः ।

अलङ्कारप्रयोजनमाह—

स्वरज्ञाने दृढाभ्यासो रक्ति (?) लाभश्च जायते ।
वर्णज्ञानविचित्रत्वमलङ्कारप्रयोजनम् ।७७।

ग्रहस्वरमाह—

ग्रहस्वरः स इत्युक्तो यो गीतादौ समर्पितः ।

अंशस्वरमाह—

यो रक्तिव्यञ्जको ज्ञेयो यस्य सर्वेऽनुगामिनः ।
यः स्वयं ग्रहणं याति न्यासादीनां प्रयोगतः ।७८।
यस्य सर्वत्र बाहुल्यं स वाद्यंशो नृपोपमः ।

वादी रागादिनिर्णयकर्त्तेति गीतप्रकाशकारः । यः स्वयं ग्रहणं-यातीत्यनेन अंशस्वरस्यैव ग्रहस्वरकारणत्वमित्यर्थः ।

अतएव माघे—

अनल्पत्वात् प्रधानत्वादंशस्येवेतरे स्वराः ।
विजिगीषोर्नृपतयः प्रयान्ति परिवारताम् ।७९।

न्यासस्वरमाह—

न्यासस्वरस्तु स प्रोक्तो यो गीतादिसमाप्तिकृत् ।

जातिमाह—

यस्या रागजनिस्तु जातिरिह सा रागस्य मातापि सा
शुद्धाख्या विकृताद्वयोश्चमिलनात् संकीर्णकाश्च त्रिधा ।८०।

किं च—

> शुद्धास्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।
> ता एव विकृताः शेषा जाता विकृतसंकरात् ॥८१। इति

द्विधात्यन्ये ।

तदुक्तं हरिनायकेन—

> शुद्धाभिर्विकृताभिश्च मिलित्वा जातयः पुनः ।
> अष्टादशसमुद्दिष्टास्तारगाणां च मातरः ॥८२।

अयमेव पक्षः साधीयानिव प्रतिभाति । यतः प्राचीनाचार्यै-रङ्गीकृतः । तदुक्तं निवन्धान्तरे—

> षड्जार्षभी च गान्धारी मध्यमा पञ्चमी तथा ।
> धैवती चाथ नैषादी सप्तैताः शुद्धजातयः ।८३।
>
> स्यात् षड्ज-कैशिकी षड्ज-मध्यमा च ततः परम् ।
> गान्धार-पञ्चमान्ध्री च षड्जा दिव्यवती तथा ।८४।
> कार्मारवी नन्दयन्ती गान्धारोदीच्यवाऽपि च ।
> मध्यमोदीच्यवा रक्तगान्धारी कैशिकीत्यपि ।८५।
>
> एवमेकादशप्रोक्ता विकृता भरतादिभिः ।
> शुद्धा सिद्धा विकृतानामथ हेतून् प्रचक्ष्महे ।८६।
> षाड्जगान्धारिकायोगाज्जायते षड्जकैशिकी ।
> षड्जिकामध्यमाभ्यां तु जाता गान्धारपञ्चमी ।८७।
>
> गान्धार्यार्षभिकाभ्यां तु जातिरान्ध्री प्रजायते ।
> षाड्जगान्धारिका तद्वद्धैवती-मिश्रितास्त्विमाः ।८८।
> षड्जोदीच्यवतीं जातिं कुर्युः कार्मारवीं पुनः ।
> उत्पादयति नैषादीं पञ्चम्यार्षभिकाऽपि च ।८९।
>
> निन्दयन्तीं तु गान्धारीं पञ्चम्यार्षभिकान्विता ।
> गान्धारी-धैवती-षाड्जी मध्यमेति युतास्त्विमाः ।९०।
> गान्धारोदीच्य वां कुर्युर्मध्यमोदीच्य वां पुनः ।
> एता एव विना षाड्ज्या पञ्चम्या सह कुर्वते ।९१।

एता गान्धारीधैवती-मध्यमाः—

कुर्युस्ता रक्तगान्धारीं नैषादीं च न धैवतीम् ।

ता गान्धारीपञ्चमीमध्यमाः—

आर्षभीं धैवतीं त्यक्त्वा पञ्चभ्यः कैशिकी भवेत् ।
पञ्चभ्यः षड्जगान्धारीमध्यमा-पञ्चमी-नैषादीभ्यः ।९२।

अथासां ग्रामसम्बन्धमाह—

षाड्जर्षभी धैवती च नैषादी षड्जकैशिकी ।
षड्जोदीच्यवती चैव षड्जमध्या तथापरा ।९३।

षड्जग्रामोद्भवाः सप्त जातयः कीर्त्तिता बुधैः ।
गान्धारी रक्तगान्धारी गान्धारोदीच्यवा पुनः ।९४।

पञ्चमी चैव गान्धारपञ्चम्यान्ध्री तथैव च ।
नन्दयन्ती तथा कर्मारवी गन्या च कैशिकी ।९५।

अन्या षड्जकैशिकीतो भिन्नाः—

इत्येकादश विज्ञेया जातयो मध्यमोद्भवाः ।
एवमष्टादशानां हि जातीनां सम्भवः स्मृतः ।९६।

श्रुतिमारभ्य जात्यन्तं मया यद्यत्समीरितम् ।
तत्तु वीणास्वेव किंचिद्बुधैर्ज्ञेयं न चान्यतः ।९७।

उद्दिष्टनष्टप्रस्तारखण्डमेरुमुखं तु यत् ।
सङ्गीतानुपयुक्तत्वान्नोक्तं तत्कौतुकं परम् ।९८।

अथ रागमाह—

यैस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्त्तिनाम् ।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः ।९९।

गोपीभिर्गीतमारब्धमेकैकं कृष्णसन्निधौ ।
तेन जातानि रागाणां सहस्राणि तु षोडश ।१००।

एषु रागेषु षट्त्रिंशद्रागा जगति विश्रुताः ।
सन्ति मेरोश्चतुर्दिक्षु सर्वे तेऽपीति केचन ।१०१।

अथ पुंस्त्रीभेदेन रागानाह—दामोदरः—

रागा षडेव तु प्रोक्ता रागिण्यस्त्रिंशदेव हि ।
भैरवोऽथ वसन्तश्च रागो मालवकौशिकः ।१०२।
श्रीरागो मेघरागश्च नटनारायणस्तथा ।
एते पुमांसः षड्रागाः क्रमात्तद्रागिणीर्वदे ।१०३।
भैरवी कैशिकी चैव भाषा(सा) वेलावली तथा ।
वङ्गाली चेति रागिण्यो भैरवस्येति वल्लभाः ।१०४।
आन्दोलिता (आलोकिता) च देशाख्या लोला प्रथममञ्जरी ।
मल्लारी चेति रागिण्य वसन्तस्य पदानुगाः ।१०५।
गौरी गुण्डकिरी चैव वराडी च क्षमावती ।
कर्ण्णाटी चैव रागिण्यः प्रिया मालवकौशिके ।१०६।
गान्धारी देवगान्धारी मालवश्रीश्च शावरी ।
रामकिर्यपि रागिण्यः श्रीरागस्य प्रिया इमाः ।१०७।
ललिता मालसी सौरी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुवल्लभाः ।१०८।
तारामणिस्तथाभीरी कामोदी गुज्जरी तथा ।
ककुभा चेति रागिण्यो नटनारायणप्रियाः ।१०९।

पञ्चमसारसंहितायां तु—

मालवश्चैव मल्लारः श्रीरागश्च वसन्तकः ।
हिन्दोलश्चाथ कर्णाटः षट् पुंरागाः प्रकीर्तिताः ।११०।
धनासी मालसी राम-केरी च सिन्धुडा तथा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ।१११।
वेलावली च प्रवरा कानडा माधवी तथा ।
कोडा केदारिका चैव मल्लारस्य प्रिया इमाः ।११२।
वेलाबली च गौरी च गान्धारी सुभगा तथा ।
कौमारी चैव वैराटी श्रीरागस्य प्रिया इमाः ।११३।
तोडी च पञ्चमी चैव ललिता पड(नट) मञ्जरी ।
गुर्ज्जरी च विभासा च वसन्तस्य प्रिया इमाः ।११४।

मायूरी दीपिका चैव देशकारी च पाहृडा ।
वराडी मारहट्टी च एता हिन्दोलयोषितः ।११५।
नाटिका अथ भूपाली रामकेरी गडा तथा ।
कामोदी चाथ कल्याणी कर्णाटस्य प्रिया इमाः ।११६।

ममठाचार्यकृत सङ्गीतरत्नमालायाम्—

कर्णाट-नाट-मल्लारा देशाख्यो मालवस्तथा ।
वसन्तश्चेति रागज्ञैः पुंरागाः षट् प्रकीर्तिताः ।११७।
चन्दनी मालवश्रीश्च सिन्धु वेलावली तथा ।
प्रपातनी विभाषाख्या कर्णाटस्यैव नायिकाः ।११८।
काम्वोजी नाटभाषाख्या नाटिका गुणमञ्जरी ।
शेखरी मुखरी चेति तथा पाठीनमञ्जरी ।११९।
मधुकारी दुग्धकारी देशी मल्लारवल्लभाः ।
गुज्जरीरामकेरी च गुण्डकेरी सुरेहिका ।१२०।
धनासी च वराडी च देशाख्यस्य च वल्लभाः ।
शिरी केदारसंज्ञा च मेघमार्जनिका तथा ।१२१।
व (सि) न्धुश्चिन्ता च नरणी मालवस्यावला मताः ।
भैरवी व (र) ङ्गहारी च मेघतानि (लि) सुपञ्चमी ।१२२।
अमरा तोडिका गौरी (डी) वसन्तस्यैव नायिकाः ।

केचित्तु पुंरागाण्यष्टाविंशतिरित्याहुः—तदुक्तं कौमुद्याम्—

भैरवो भूपतिश्चैव श्रीरागः पडमञ्जरी ।
वासन्तिकश्च भूपालः सारङ्गो मालवस्तथा ।१२३।
एते सङ्गीतशास्त्रज्ञैः पुमांसश्च प्रकीर्त्तिताः ।इति।

श्रीराग इत्यादि गणयित्वा चतुर्विंशतिरागिण्यस्तास्तेषां स्त्रिय ईरिताः इति ।

दाक्षिणात्यनिबन्धे रागविवेके—

भैरवश्चापि भूपालः श्रीरागः पढमञ्जरी ।
वसन्तो मालवश्चैव वङ्गालो नाटकस्तथा ।
एतेऽष्टरागाः कथिताः पुंरागा इति सूरिभिः ।१२४।

रागाणां स्त्रीपुंस्त्वविवेचने फलमाह—नारदः—

रागं चेदालपेत्पूर्वं तत्पत्नीं तदनन्तरम् ।
अन्यपत्नी न गातव्या नृपाज्ञायां न दूषणम् ।१२५।

अतएवास्यानतिप्रयोजनत्वात् हरिनायकादिभिर्न लिखितम् । अत्र विरोधस्तु लक्ष्या (कल्पा) न्तराभिप्रायेण परिहरणीयः । किं च—

देशे देशे भिन्ननाम्नां रागाणां तत्त्वनिर्णयम् ।
कोऽपि कर्तुं न शक्नोति निरणायि न तन्मया ।१२६।

तथापि—सङ्गीतसार-(हरिनायक) रत्नमाला-गीतप्रकाश-मुख्य दर्शितवर्त्मनैव—

सद्वैणिकैः सह विचार्य तथानुभूय
देशानुगुण्यविधिना हि विवेच्यते तत् ।
संपूर्णाः षाडवास्तत्र औडवाश्चेति ते त्रिधा ।

सम्पूर्णरागलक्षणम्—

सम्पूर्णास्ते तु ये तत्र जायन्ते सप्तभिः स्वरैः ।

के त इत्याह—के—रागाः ।

श्रीराग-नट्ट-कर्णाट-रेवगुप्त-वसन्तकाः
शुद्धभैरव-बङ्गाल-सोमरागास्त्रपञ्चमाः ।१२७।
कामोदो मेघरागश्च तथा द्राविडगौडकः ।
वराडी गुर्जरी तोडी मालवश्रीश्च सैन्धवी ।१२८।
देवक्रीश्चैव रामक्रीस्तथा पञ्चममञ्जरी ।
नट्टा वेल्लावली गौडीत्याद्याः सम्पूर्णका मताः ।१२९।

आदिपदेन अन्येऽपि नाटाद्या गृह्यन्ते—

तदुक्तं सङ्गीतसारे—

नाटघण्टारवौ नट्टनारायणकभूपती
शङ्कराभरणश्चेति पूर्णा रागा इमे मताः ।१३०।

एतद्गानफलमाह—कोहलः—

आयुर्धर्म-यशः-कीर्ति-वृद्धि-सौख्य-धनानि च ।
राज्याभिवृद्धिः सन्तानः पूर्णरागेषु जायते ।१३१।इति।

एषामुक्तक्रमेण लक्षणमाह—

जातिन्यासग्रहग्रामांशेषु षाड्जोऽल्पपञ्चमः ।
शृङ्गारवीरयोर्गेयः श्रीरागो गीतकोविदैः ।१३२।

अथ दामोदर-कलाङ्कुर-नारदसंहिता-चन्द्रिका-रत्नमालादिषु निर्णीता मूर्त्तयो यथास्थानमुत्कीर्त्यन्ते ।

नारदसंहितायाम्—

श्रीरागः—**लीलाविहारेण वसन्तकाले** (वनान्तराले)
चिन्वन् प्रसूनानि बधूसहायः ।
विलासिवेशोऽसितदिव्यमूर्त्तिः
श्रीराग एष प्रथितः पृथिव्याम् ।१३३।

सर्वेषां गानकालः पश्चात् कथयिष्यते—

नटः—

श्रीरागवत्तथा नाटः किन्तु नैषोऽल्पपञ्चमः ।
ध-रि-तारो नि-मन्द्रश्च गमकैरुत्कटैर्युतः ।१३४।

श्रीरागवदिति श्रीरागो यथा जात्यादिषु षाड्जस्तथेत्यर्थः । विशेषस्तु धैवतऋषभयोस्तारः । निषादे मन्द्रः । एवमेव वक्ष्यमाणरागेषु बोद्धव्यम् ।

मर्त्तिस्तु निबन्धान्तरे—

अङ्कास्त्रधन्वा ऋजुतां नयन् वाणान् शुकद्युतिः ।
आसनस्थो युवा चारुवेशो नट्टस्तु वाहुजः ।१३५।

कर्णाटः—

कर्ण्णाटः तद्वदाख्यातो नि-न्यास-ग्रहणांशकः ।

मूर्त्तिस्तु—

कृपाणपाणिर्गजदन्तखण्ड-
मेकं वहन् दक्षिणकर्णपूरम् ।
संस्तूयमानः सुरचारणौघैः
कर्ण्णाट-रागः शिखिकण्ठनीलः ।१३६।

नारदसंहितायां त्वन्यथा दृश्यते—

कृपाणपाणिस्तुरगाधिरूढो

मयूर-कण्ठोपम-कण्ठकान्तिः।

स्फुरच्छितोष्णीषधरः प्रयाति

कर्ण्णाटरागो हरिणान् विहन्तुम्।१३७।

रेवगुप्तः—

रेवगुप्तो रि-ग्रहांशो मान्तो मर्षतमोद्भवः।

मूर्त्तिस्तु निबन्धान्तरे—

ाङ्के निषर्णां सुरतान्तखिन्ना-

माश्वासयन् स्वाञ्चलवीजनेन।

सीमन्तिनीं श्वासचलत्कुचान्तां

सुवर्णकान्तिः किल रेवगुप्तः।१३८।

वसन्तः—

षड्जमध्यमिका-जातः षड्ज-न्यास-ग्रहांशकः।

गेया वसन्तरागोऽयं वसन्तसमये बुधैः।१३९।

मूर्त्तिस्तु—

शिखण्डवर्होच्चयवद्धचूडः

पुष्णन् पिकं चूतलताङ्कुरेण।

भ्रमन्मुदाराममनङ्गमूर्त्ति-

र्मतो मतङ्गस्य वसन्तरागः।१४०।

नारदसंहितायां तु—

चूताङ्कुरेणैव कृतावतंसो

विघूर्णमानारुणनेत्रपद्मः।

पीताम्वरः काञ्चनचारुदेहो

वसन्तरागो युवति-प्रियश्च।१४१।

भैरवः—

धैवतांश-ग्रहन्यासयुक्तस्याच्छुद्धभैरवः।

सकम्पमन्द्र-गान्धारो गेयो मध्यान्हतः परम्।१४२।

मूर्त्तिस्तु निबन्धान्तरे—

सचन्द्रहासं फलकं दधानो
निबद्धकक्षो दृढबद्धचूडः।
गतीर्वितन्वन् बहुधा पदातिः
प्रचण्डरूपः किल भैरवोऽयम्।१४३।

अन्यस्तु औड़वे वक्ष्यते—

वङ्गालः—

वङ्गाल-कौशिकी-जातः षड्ज-न्यास-ग्रहांशकः।
सकम्पमन्द्र-गान्धारो गेयः करुण-हासयोः।१४४।

मूर्त्तिस्तु—

मनोज्ञमौञ्जीगुणगुम्फिताङ्ग-
स्त्वचं दधानो धरणीरुहस्य।
चण्डः कुमारः कमनीयमूर्त्ति-
र्वङ्गालरागः शुचि-साम-गानः।१४५।

सोमः—

जातिन्यासग्रहांशेषु षाड्जो वीरे-घनागमे।
नि-तारः प-नि-बाहुल्यः सोमरागोऽत्र गीयते।१४६।

अस्य मूर्त्तिस्तु चन्द्रिकायाम्—

निशाङ्गनां वक्षसि शाययित्वा
कलङ्कदम्भात् सुरतश्रमार्त्ताम्।
स्खलत्करः सालसलोचनश्रीः
कामी सुधापाण्डर एव सोमः।१४७।

आम्रपञ्चमः—

आन्ध्रीजाति-समुत्पन्नः मध्यम-ग्राम-गोचरः।
गान्धारांशग्रहन्यासो रागस्यादाम्रपञ्चमः।१४८।

आन्ध्रीजातिस्तूक्तैव—

अयमेवामरपञ्चमोऽप्युच्यते।

मूर्तिस्तु तत्रैव—

युवाऽतसी-सून-समानकान्तिः
श्रीखण्डपङ्काद्रसमस्तदेहः ।
वीणाप्रवीणोऽमरपञ्चमोऽयं
गीतेन मुग्धीकृतदेवराजः ।१४६।

कामोदः—

कामोदः करुणे हास्ये नितारो बहुकम्पनः ।
षाड्जो जाति-ग्रहांशेषु यामार्द्धन्यासमन्दगः ।१५०।

यामात् प्रहरादूर्द्ध्वं गानकाल इत्यर्थः । मूर्त्तिस्तु—

अक्षमालां करे धृत्वा वसानस्तारवीं त्वचम् ।
जपन् जन्हुसुतातीरे कामोदः परिकीर्त्तितः ।१५१।

नारदसंहितायां तु—

भर्त्रा समं पार्थसि हेमवर्णां-
पयो विहारेण सरोरुहाणि ।
विचिन्वती सौरभमोदमाना
कामोदिकेयं कथिता विदग्धैः ।१५२।

मेघरागः—

वीरे धांश-ग्रहन्यासः षाड्जधैवतिकोद्भवः ।
गेयो घनागमे मेघरागोऽयं मन्द्रहीनकः ।१५३।

मूर्त्तिस्तु निबन्धान्तरे—

पर्यङ्के प्रियया सार्द्धमासीनमुपवीणयन् ।
पीताम्वरो सुभूषाढ्यो मेघरागो घनद्युतिः ।१५४।

द्राविडगौडः—

निषादांशग्रहन्यासः षड्ज-मध्यम (पञ्चम) संकुलः ।
गेयो द्राविडगौडोऽयं वीरशृङ्गारयोर्निशि ।१५५।

गौडस्य द्वैविध्यं कोहलीये—

तुरष्कगौडो द्राविडगौड इति । तुरष्कगौडस्तु औडवे वक्ष्यते ।

मूर्त्तिस्तु निबन्धान्तरे ।

अंसाप्तकर्ण्णः शिशिरांशुधामा
कृकाटिकाचुम्बितचारुचूडः।
स्रग्वी जपन् पाणिधृताक्षदर्भो
विप्रो युवा द्राविडगौड़ एषः।१५६।

वराडी—

प्रहरादूर्द्धतो गेया भिन्न-पञ्चम-सम्भवा।
षड्जन्यासग्रहांशैषा वराडी भरतोदिता।१५७।

अस्यास्त्रैविध्यं तु उद्देशस्थाने उक्तम्। रत्नमालायां—शुद्धवराडी, द्राविडवराडी, देशीवराडीति भेदात्। कौमुद्यां तु षाडवमध्ये गणिता।

मूर्त्तिस्तु—

विनोदयन्ती दयितं च गौरी
सुकङ्कणा चामरचालनेन।
कर्णे दधाना सुरपुष्पगुच्छं
वराङ्गनेयं कथिता वराडी।१५८।

नारदसंहितायां तु, अन्यथा दृश्यते—

कर्णे दधाना सुरपुष्पयुग्मं
सुवृत्तिवक्षोजमनोहराङ्गी
स्मेरानना चारु विलोलनेत्रा
गौराङ्गयष्टिः कथिता वराडी।१५९।

गुज्जरी—

गुज्जरी रि ग्रहांशान्ता जाता पञ्चमषाडवात्।
क्वचिन्मांशापि षस्रादौ गेया शृङ्गारवर्द्धिनी।१६०।

षाडवः षड्जस्वरः। सङ्गीतसारे तु सौराष्ट्रगुज्जरी दक्षिणगुज्जरीति भेदद्वयमाह। रत्नमालायाम्—
'दशधा गुज्जरी प्रोक्ते'त्यादि उक्तम्, तत्प्रपञ्चभयान्न लिखितम्।

मूर्त्तिस्तु—

श्यामा सुकेशी मलय-द्रुमाणां
मृदूल्लसत्पल्लवतल्पयाता ।
श्रुतेः स्वराणां दधती विभागं
तन्त्रीमुखी दक्षिणगुज्जरीयम् ।१६१।

सहितायां तु—

कर्ण्णोत्पलासङ्गिमधुव्रतानां
संश्रृण्वती मञ्जुलकूजितानि ।
कान्तान्तिकं गन्तुमनाः प्रदोषे
सा गुज्जरी वेशकलाञ्चिताङ्गी ।१६२।

तोडी—

मध्यमांशग्रहन्यासा तोडिका शुद्धषाडवात्
जाता मध्याह्नसमये गेया श्रृङ्गारवीरयोः ।१६३।

मूर्त्तिस्तु—

उन्निद्रपङ्केरुहचारुनेत्रा
कुरङ्गशावं कलमाङ्कुरेण ।
सम्भावयन्ती विपिनोपकण्ठे
तोडीयमिन्दीवरदामरम्या ।१६४।

मालवश्रीः—

मालवश्री शरद्गेया जाता मालवकैशिकात् ।
एषा षड्जग्रहन्यासा पार्वतीप्रीतिकारिणी ।१६५।

आर्षभी-धैवती-र्वज्जिताः शुद्धजातयः कैशिकीजातिवाच्या । प्रमाण-मुक्तं जातिविवेचनावसरे । मूर्त्तिस्तु—

लीलारविन्दस्य दलानि बाला
विभावयन्ती तनुदेहयष्टिः ।
मालूरवृक्षस्य तले निषण्णा
शोणा मृदुर्मालवश्रीत्युदिष्टा ।१६६।

संहितायां तु—

करावधूताम्वुजपुष्परम्या
इतस्ततश्चा रुविलोकयन्ती ।
कण्ठ-स्फुरन् मौक्तिक-चारूहारा
सा मालसी सं कथिता विचित्रा ।१६७।

मालवश्रीरियमेव मालसीति, उच्यते ।

सैन्धवी—

सैन्धवी पञ्चमाज्जाता ग्रहांशन्यासपञ्चमा ।
मध्यान्हादूर्ध्वतो गेया श्रृङ्गारे करुणेऽपि च ।१६८।

सैन्धवी सिन्धुडेति प्रसिद्धा—मूर्त्तिस्तु—

सदिन्द्रनीलद्युतिरम्वुजाक्षी
प्रवादयन्ती कपिलासयन्त्रम् ।
रत्नैर्विचित्राभरणा सुकेशी
सा सिन्धुडा कान्तसमीपसंस्था ।१६९।

देवकृतिः, वा देवकिरी—

षड्जन्यास-ग्रहांशायं वीरे देवकृतिर्मता ।
असावृतुषु सर्वेषु गातव्या समयेषु च ।१७०।

इयमेव शुद्धवसन्त इति कृष्णदत्तः ।

मूर्त्तिस्तु—

भ्रमन्ती नन्दने श्यामा पुष्पावचयतत्परा ।
ख्यांता देवकिरी ह्येषा करार्पितसखीकरा ।१७१।

रामकृतिर्वा रामकिरी ।

प्रहराभ्यन्तरे गेया षड्जन्यासग्रहांशका ।
षड्जर्षभग्रहारम्भा तज्ज्ञै रामकृतिर्मता ।१७२।

मूर्त्तिस्तु—

स्वर्णप्रभा-भासुर-भूषणाढ्य
नीलं निचोलं वपुषा वहन्ती ।
कान्ते सदोपान्त (प्रदोषान्त) मधिश्रितेऽपि
मानोन्नता रामकिरी प्रदिष्टा ।१७३।

प्रथममञ्जरी—

पञ्चमांश ग्रहन्यास धरितारा गमोत्कटा ।
शृङ्गारे चोत्सवे गेया प्रातः प्रथम-मञ्जरी ।१७४।

मर्त्तिस्तु—

वियोगिनी कान्त-वितीर्ण-पुष्प-
स्रजं वहन्ती वपुषाऽतिमुग्धा ।
आश्वास्यमाना प्रियया च सख्या
विधूसराङ्गी पढमञ्जरीयम् ।१७५।

पढमञ्जरी इयमेव प्रथममञ्जरीत्युच्यते ।

नट्टा—

नट्टा नटवदाख्याता सकम्पान्दोलितस्वरा।
हास्येऽद्भुते च शृङ्गारे गातव्या निशि मङ्गले ।१७६।

मूर्त्तिस्तु निवन्धान्तरे—

विदेशस्थस्य कान्तस्य वृत्तान्तमतिविह्वला ।
नट्टा रहितवेशौघा पृच्छन्तीकान्तमादरात् ।१७७।

वेलावली—

धैवतांश-ग्रहन्यासा समन्द्रा च समस्वराः ।
शृङ्गारे करुणे चैव गेया वेलावली वुधैः ।१७८।

मूर्त्तिस्तु निबन्धान्तरे—

सङ्केतदीक्षां दयितस्य दत्त्वा
वितन्वती भूषणमङ्गयष्टेः ।
मुहुः स्मरन्ती स्मरमिष्टदेवं
वेलावली नीलसरोजकान्तिः ।१७९।

नारदसहितायां तु ईषद्भेदेनोक्ता वेलावली ।

गौडी—

ग्रहांशन्यास-षड्जा स्याद् गौडी मालवकैशिकात् ।
वीरशृङ्गारयोर्गेया सकम्पान्दोलितस्वरा ।१८०।

मूर्त्तिस्तु—

शुचि-हरिचन्दन-पङ्कै-
रतिसहितं मन्मथं पुरःकृत्वा ।
गौरतनुर्बहु विधिना
गौडी परिपूजयत्येषा ।१८१।

नाटः—

नाटे निशि शुगैर्वीरे षड्जांशो गमकोत्कटः ।

मूर्त्तिस्तु—

तुरङ्गमस्कन्ध-निवद्धरागः
स्वर्णप्रभः शोणितशोणगात्रः ।
संग्रामभूमौ विचरन् धृतासि-
र्नाटोऽयमुक्तः किल काश्यपेन ।१८२।

घण्टारवः—

घण्टारवो धैवतजः प्रतापे सर्वदाऽपि च ।

मूर्त्तिस्तु सङ्गीतरत्नमालायाम्—

पसरदिभवरस्य स्कन्धमारुढ उद्यत्
कनकरुचिरमध्यं धूनयन् शर्वलाग्रम् ।
प्रदलितरिपुसैन्यो भीमघण्टारवेण
स्फुरितकनककान्तिर्भाति घण्टारवोऽयम् ।१८६।

नटनारायणः—

धैवतांश-ग्रहन्यासो नटनारायणो दिवा ।

मूर्तिस्तु रत्नमालायाम्—

स्त्रीवेशधारी पुरुषो नवीनः
संगीतशाले भ्रमिमादधानः ।
गायन् सतालं सलयं मनोज्ञः
स्यान्नट्टनारायण राग एषः ।१८७।

भूपतिः—

मध्यमांश-ग्रहन्यासो भूपतिः करुणे दिवा ।

मूर्त्तिस्तु निवन्धान्तरे—

सिंहासनगतश्वेत-चामर-द्वयवीजितः ।
मन्त्रिभिर्वेष्टितः श्यामच्छत्राढ्यो रागभूपतिः ।१८८।

शङ्कराभरणः—

वीरे निशि निषादांशः शङ्कराभरणः सदा ।

मूर्त्तिस्तु रत्नमालायाम्—

व्याघ्रचर्मशकलं पिदधानो
भोगि-हारवलयाङ्गदभूषः ।
सान्द्रभूतिपरिलिप्त-शरीरः
शङ्कराभरण एष उदीतः ।१८९।

अथ षाडवा उच्यन्ते—तत्र च

षाडवास्तेऽभिधीयन्ते रागा ये षट्स्वरोत्थिताः ।

के ते इत्याह—

गौड़ः कर्ण्णाटगौडश्च देशी धन्नासिका तथा ।
कोलाहला च वल्लारी देशाख्या शावरी तथा ।१९०।
खम्भावती हर्षपुरी मल्लारी हुञ्चिका ततः ।
इत्याद्या षाडवाः प्रोक्ता हरिनायकसम्मताः ।१९१।

आदिपदेनान्येऽपि श्रीकण्ठाद्या गृह्यन्ते ।

तदुक्तं सङ्गीतसारे—

श्रीकण्ठश्चैव भौली च तारसालगगौडकः ।
शुद्धाभीरी मधुकिरी छाया नीलोत्पलापि च ।१९२।

षाडवगणने फलमाह कोहलः—

संग्रामे वीरतारूप-गुणलावण्य-कीर्त्तनम् ।
गाने षाडवरागाणां गदितं पूर्वसूरिभिः ।१६३।

क्रमेण लक्षणमाह—

गौड़ः—

निषादांशग्रहन्यासो गौडः स्यात्पञ्चमोज्झितः ।
वीरश्रृङ्गारयोर्गेया दिनान्ते विरलर्षभः ।१६४।

मूर्त्तिस्तु निबन्धान्तरे—

विधाय शम्भुं सुरनिम्नगातटे
मुदार्चयन् नीलसरोज-संघैः ।
मनोज्ञमूर्त्तिर्दधदंशुके सिते
त्वगासनस्थो द्विज एष गौडः ।१६५।

कर्ण्णाटगौडः—

निषादांश-ग्रह-न्यास-युक्तः पञ्चमवर्जितः ।
एष कर्ण्णाटगौडस्तु कर्णाटवदुदाहृतः ।१६६।

कर्णाटवदिति कर्ण्णाटोक्तगानकाल-रस-मूर्त्यान्वितः इत्यर्थः । अत्र कर्ण्णाटबङ्गाल इति गीतप्रकाश-सङ्गीतसारयोः दृश्यते ।

तत्स्वरूपं तु—

गान्धारांश-ग्रहन्यासः षाड्जः पञ्चमवर्जितः ।
एष कर्ण्णाटवङ्गालः श्रृङ्गारे टक्कवंशजः ।१६७।

टक्कलक्षणमाह मम्मठः—

नाटकर्ण्णाटयोर्योगे टक्करागः नपुंसकः ।इति।

मूर्त्तिस्तु वङ्गालवद् ।

देशी—

रेवगुप्तोद्भवा देशी पत्यक्ता म-नि-विस्तरा ।
निन्यासांशग्रहा प्रातर्गेया करुणशान्तयोः ।१६८।

मूर्त्तिस्तु रत्नमालायाम्—

गजपतिगतिरेणीलोचनेन्दीवराङ्गी
पृथुलतरनितम्बालम्बि बेणी-भुजङ्गा ।
तनुतरतनुवल्ली वीतकौसुम्भवासा
इयमुदयति देशी वाणिनी (रागिणी) चारुहासा ।१९९।

धन्नासी—

षांशाधन्नासिका जाता शुद्धकैशिकमध्यमात् ।
षड्जग्रहामध्यमान्ता रिहीना विजये सदा ।२००।

सदा सर्वकालेषु गेया इत्यर्थः ।

मूर्त्तिस्तु—

दूर्वादलश्यामतनुर्मनोज्ञा
कान्तं लिखन्ती फलके विदग्धा
वाला गलल्लोचनवारिबिन्दु-
निस्यन्दधौतस्तनहृद्धनासी ।२०१।

कोलाहला—

षड्जन्यास-ग्रहा कोलाहला टक्ककुलोद्भवा ।
मधमांशा पहीना च कलहे गमकोत्कटा ।२०२।

मूर्त्तिस्तु—

उन्मत्तपुंस्कोकिलवृन्दरम्य-
नादस्वरं गायति कृष्णगाथाः ।
वशी सदा सर्वपुरः प्रवर्त्ती
कोलाहलोऽयं तरुणोऽसिताङ्गः ।२०३।

न च पूर्वमस्य स्त्रीलिङ्गत्वमिह पुंलिङ्गत्वमित्यसंगतिरिति वाच्यम् ।
यत्—

'दृश्यते नैव कुत्रापि रागाणां लिङ्गनिर्णय' । इति
सर्वग्रन्थकारसम्मतम् । एवमन्यत्रापि द्रष्टव्यम् ।

वल्लाली—

हिन्दोलान्वयसंपन्ना वल्लाली ष-ग्रहांशकाः ।
शृङ्गाराख्यो ध-मन्द्रा च रि-हीना न्यास-षड्जिका ।२०४।

मूर्त्तिस्तु निबन्धान्तरे—

सख्याप्रबोधमानापि कान्ते रोषं न मुञ्चति ।
परावृत्तमुखी श्यामा वल्लारी प्रौढनायिका ।२०५।

देशाख्यः—

गान्धारपञ्चमाज्जाता देशाख्यर्षभवर्जिता ।
गान्धारांश-ग्रहन्यासा शान्तशृङ्गारयोः प्रगे ।२०६।

प्रगे प्रातर्गेया इत्यर्थः ।

मूर्त्तिस्तु—

आस्फोटनाविष्कृतलोमहर्षो
नियुद्धसंनद्ध-विशालबाहुः ।
प्रांशुः प्रचण्डद्युतिर्हेमगौरो
देशाख्यरागः स हि मल्लराजः ।२०७।

शावरी—

शावरी धवतान्ता च ग-तारामन्द्र-मध्यमा ।
म-ग्रहांशोऽल्पषड्जा च पहीना करुणे मता ।२०८।

मूर्त्तिस्तु कलाङ्कुरनिबन्धे—

श्रीखण्डशैलशिखरे शिखिबर्हवासा
मातङ्ग-मौक्तिक-कृतोत्तम-हारयष्टिः ।
आकृष्य चन्दनतरोः शवरी भुजङ्ग-
माबन्धती वलयमुज्ज्वलनीलकान्तिः ।२०९।

खम्भावती—

धैवतांश-ग्रहन्यासा सान्दोला म-नि-मण्डिता ।
खम्भावती पहीना च शृङ्गारे निशि गीयते ।२१०।

मूर्त्तिस्तु तत्रैव—

वासोवसाना शरदभ्र शुभ्रं विरञ्चिदेवोपरिकर्मदक्षा ।
कुन्दावदाता चतुराननस्य खम्भावती लब्ध-समृद्धसेवा ।२११।

हर्षपुरी—

जाता हर्षपुरी षड्जमन्द्रामालव-कैशिकात् ।
षड्जाद्यन्ता तारमध्या ध-हीना विजये मता ।२१२।

मूर्त्तिस्तु निबन्धान्तरे—

निपात्य तल्पे सुदृढानुरागा
त्कान्तं रते तान्तमवेत्य मुग्धा ।
प्रौढाङ्गना पौरुषमाचरन्ती
मनोहरा हर्षपुरी प्रदिष्टा ।२१३।

मल्लारी—

पञ्चमांशग्रहन्यासा प-हीना मन्द्र-मध्यमा ।
शृङ्गारे दुर्द्दिने गेया मल्लारी परिकीर्त्तिता ।२१४।

अयमेव माधवादिरुच्यते इति 'गोपगोविन्द' टीकाकारः ।

मूर्त्तिस्तु—

वस्पष्टकृष्णाजिनमध्यवर्त्ती
कान्तः पवित्रः स्थविरोऽतिगौरः ।
कुर्वन् कथाः तुम्वरुनारदाभ्यां
श्रीमाधवादिः कथितो मुनीन्द्रः ।२१५।

'गृण्हन् करे केतककुन्तयष्टिमिति ग्रन्थान्तरे पाठः ।

हुंच्छिका—

आन्दोलितम-पा (ध-गा, स-गा, स-मा) धान्तग्रहा मध्यम-वर्जिता ।
गेया यामद्वयादूर्द्ध्वं शृङ्गारे हुंछिका वुधैः ।२१६।

मूर्त्तिस्तु निबन्धान्तरे—

दूर्वादल-श्यामरुचिर्विवस्त्रा
वलाद्विशन्ती दयितोरुमध्ये ।
स्कन्धान्तरप्रेरित दक्षहस्त—
धृतस्तनान्ता किल हुंच्छिका स्यात् ।२१७।

श्रीकण्ठः—

गेयोत्सवे ग (प) रहिता धान्ता श्रीकण्ठिका मता।

मूर्त्तिस्तु निबन्धान्तरे—

कान्तस्य कुन्तलश्रेणीं शोषयन्त्यञ्जनद्युतिः।
क्वणत्सुवर्णवलयावलिः श्रीकण्ठिका मता।२१८।

भौली—

प्रोज्झिता ष-ग्रहा मौली प्रातर्गेया सुरस्तुतौ।

मूर्त्तिस्तु निबन्धान्तरे—

निधायास्फोटनैरङ्के लालयन्ती सुतं मुहुः।
कुर्वती विविधालापं भौली मौलि-मनोहरा।२१९।

तारा—

तारा दिवा रतौ युद्धे निशादांशा म-वर्जिता।

मूर्त्तिस्तु निबन्धान्तरे—

अङ्गहारान् शिक्षयन्ती कुमारान् नृत्यमन्दिरे।
तारा माराङ्गनाकारा नाट्याटोपविदां वरा।२२०।

सालगगौड:—

(मालवगौड इति नामान्तरं पुस्तकान्तरे।)

मांशः प-हीनो वीरे च रतौ मालवगौडकः।

मूर्त्तिस्तु—

बीणाविनोद-प्रतिपन्नपाण-
गृह्णन् कथां नारदसंप्रयोगाम्।
श्यामो युवा विप्रकुलप्रसूतः
स सालगो नाट्यमुनिप्रणीतः।२२१।

आभीरी—

धान्ताभीरी धैवतजा रि-हीना च शुचौ प्रगे।

मूर्त्तिस्तु कलाङ्करोक्ता—

वाचालकङ्कणविभूषितवाहुवल्लि-
स्निग्धचम्पकमनोहरगात्रयष्टिः ।
श्रीखण्डशैलशिखरे गजमौक्तिकोघै-
राभीरिका विदधती स्रजमिन्दुशुभ्राम् ।२२२।

निबन्धान्तरे तु अन्यथा दृश्यते—

दधिमन्थनसिञ्जान-मेखलाङ्गदकङ्कणा ।
स्वेदार्द्रवदनाम्भोजाऽऽभीरी गोपालवल्लभा ।२२३।

मधुकिरी—

धांशग्रहामधुकिरी ग-हीना करुणादिके ।

मूर्त्तिस्तु—

आताम्रमौलिनेत्रा चम्पकगौरी कृतरतारम्भा ।
मुखमधुलुब्धान् भ्रमरान् मधुकिरिका वारयत्येषा ।२२४।

छाया—

षड्जग्रहा म-रहिता छाया शृङ्गारवीरयोः ।

मूर्त्तिस्तु निबन्धान्तरे—

सूर्यप्रिया सूर्यमयूखदूना
आल्हादयन्ती पथिकान् स्वकान्त्या ।
करे दधानाऽरुणपद्ममालां
छाया प्रदिष्टेह मनोज्ञरूपा ।२२५।

नीलोत्पला—

नीलोत्पला धैवतजा र-हीना, बीभत्सरौद्रेषु सदैव गेया ।

मूर्त्तिस्तु निबन्धान्तरे—

कृपाणखर्परे पाण्यो विभ्राणामुक्तमूर्धजा ।
नीलोत्पलघनश्यामा भीषणा च दिगम्बरा ।२२६।

इति षाडवाः ।

अथ औडवा उच्यन्ते--

ते ख्याता औडवा ये हि जायन्ते पञ्चभिः स्वरैः ।

के त इत्याह--

मध्यमादिश्च मल्लारो देशपालश्च मालवः ।
हिन्दोलो भैरवो नाग-ध्वनिर्गोप्तकृतिस्तथा ।२२७।
ललिता च ततः छाया तोडी वेलावती तथा ।
प्रतापपूर्विका प्रोक्ता सैन्धवी-द्वितयं तथा ।२२८।
इत्याद्या औडवाः प्रोक्ता रागा जनमनोहराः ।

आदिपदेन तुरुष्कगौडादयोऽपि गृह्यन्ते । तदुक्तं सङ्गीतसारे औडवगणने--

तुरुष्कगौडो गान्धारः पुलिन्दा मेघरञ्जिका ।इति।

औडवगणने फलमाह कोहलः--

व्याधिनाशे शत्रुनाशे भयशोकविनाशने ।
औडवास्तु प्रगातव्या ग्रहशान्त्यर्थकर्मणि ।२२९।

मध्यमादिः--

मध्यमादिर्म-ग्रहान्ता मध्यमग्रामगोचरः ।
अयं सायं तु गातव्यः शृङ्गारे रि-ध-वर्जितः ।२३०।

मूर्त्तिस्तु चन्द्रिकायाम्--

अतितरुणवयःस्थः (श्रीः) कुन्दकर्पूरकान्तिः
युवतिभजनदक्षः क्रौञ्चचाटूक्तिभाषः ।
अरुणजलजनेत्रः स्कन्धसन्यस्तवीणः
स्मितमधुररदाली राजते मध्यमादिः ।२३१।

मल्लारः--

ांशन्यासः पान्वयतो मल्लारः स-प-वर्जितः(?) ।
सदा वर्षास्विष्टरसे गमन्द्रस्तारसप्तमः ।२३२।

मूर्त्तिस्तु—

भृङ्गावदातं पलितं दधानः
प्रलम्बकर्णः कुमुदेन्दुवर्ण्णः ।
कौपीनवासाः शुचिहारधारी
मल्लाररागः कथितस्तपस्वी ।२३३।

देशपालः—

न्यंशन्यासग्रहो देशपालः सान्दोलषड्जकः ।
वीरभृङ्गारयोः सायं टक्कवंशो रि-पोज्झितः ।२३४।

इयमेव देशकारीत्युच्यते ।

मूर्त्तिस्तु नारदसंहितायाम्—

सार्द्धं सखीभिर्विजने वसन्ती
विचित्रवक्षोजयुगक्षतानि ।
निरीक्ष्यमाणामपि दर्पणेषु
सा देशकारी कथिता गुणज्ञैः ।२३५।

देशपालः, अयमेव केदार उच्यते इति गीतप्रकाशकारः तथा सत्यस्य मूर्त्तिर्भिन्ना । तदुक्तं चन्द्रिकायाम् —

चिरप्रवासी जलदावलोकाद्-
विचिन्तयन्नीलसरोरुहाक्षीम् ।
कामी युवा गीतकलाभिलाषी
केदाररागस्तरुणोऽरुणाभः ।२३६।

मालवः—

रि-प-हीनष्टक्कवंश्यो ग-भूरिः स-ध-कम्पितः ।
नि-न्यासांशग्रहः सायं निशि वा मालवः शुचौ ।२३७।

मूर्त्तिस्तु—

नितम्बिनीचुम्बित-वक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मलवरागराजः ।२३८।

हिन्दोलः—

षड्जन्यास ग्रहांशोऽयं हिन्दोलो रि-प-वर्जितः ।
अधैवत्यार्षभीजातो वीरशृङ्गारयोः सदा ।२३९।

धैवतमार्षभीं विना अन्यजात्युत्पन्न इत्यर्थः । सदा सर्वेष्वपि कालेषु ।

मूर्त्तिस्तु—

नितम्बिनीमन्दतरङ्गितासु
दोलासु खेलासुखमादधानः ।
खर्वः कपोतद्युतिकर्बुरश्री—
हिन्दोलरागः कथितो मुनीन्द्रैः ।२४०।

भैरवः—

भिन्नषड्जसमुत्पन्नो भैरवोऽपि रि-धोज्झितः ।
ध-ग्रहांशो मध्यमान्तो गेया मङ्गलकर्मणि ।२४१।

इयमेव भैरवी । तदुक्तं दामोदरे—

भैरवी कैशिकी चैव भैरवस्यैव वल्लभाः ।इति।

मूर्त्तिस्तु—

सरोवरस्थे स्फटिकस्य मण्डपे
सरोरुहैः शङ्करमर्चयन्ती ।
तालप्रयोगैः प्रतिबद्धगीता
गौरी तनुर्नारदभैरवीयम् ।२४२।

नागध्वनिः—

टक्कान्वयभवो नागध्वनीरि-ध-विवर्जितः ।
षड्जन्यास-ग्रहांशोऽयं गेयो वीररसे दिवा ।२४३।

मूर्त्तिस्तु निबन्धान्तरे—

नागध्वनिः समारूढगजो हिङ्गुलसन्निभः ।
सितवासाः कुन्तकरो युवा राजकुलोद्भवः ।२४४।

गोण्डकी—

षड्जन्यासग्रहांशेषा गोण्डकी म-परिष्कृता ।
रि-ध-हीना दिनादौ तु गातव्येष्टरसे बुधैः ।२४५।

मूर्त्तिस्तु—

रतोत्सुका कान्तपथ-प्रतीक्षा–
मापादयन्ती मृदुपुष्पतल्पे ।
इतस्ततः प्रेषितदृष्टिरार्त्ता
श्यामाङ्गिका गोण्डकिरी प्रदिष्टा ।२४६।

ललिता—

टक्कान्वय-समुद्भूता ललिता ललितस्वरा ।
षड्जन्यास-ग्रहांशाच स-मन्द्रा रि-प-र्वाजिता ।
शृङ्गारवीरयोर्गेया निशान्ते च दिनादिके ।२४७।

मूर्त्तिस्तु—

प्रफुल्लसप्तच्छदमालधारी
युवातिगौरोऽलसलोचनश्रीः ।
विनिसृतो वासगृहात् प्रभाते
विलासिवेशो ललितः प्रदिष्टः ।२४८।

छायातोडी—

छायातोडी रि-प-त्यक्ता संजाता षाडवान्वये ।
मृदुकम्पस्वरा मांशग्रह-न्यासा दिवातनी ।२४९।

मूर्त्तिस्तु तोडीतुल्या पूर्णरागमध्ये उक्ता ।

प्रतापवेलावली—

ककुभस्य कुले जाता प्रतापोपपदा दिवा ।
ज्ञेया वेलावली तज्ज्ञैः ध-ग्रहान्ता रि-पोज्झिता ।२५०।

मूर्त्तिस्तु वेलावली तुल्या ।

सैन्धवी—

षड्जन्यास-ग्रहांशान्या सैन्धवी नि-ग-र्वाजिता ।
मृदुकम्पस्वरा ज्ञेया जाता मालवकैशिकात् ।२५१।

द्वितीया सैन्धवी—

द्वितीया सैन्धवी भिन्नषड्जजाऽऽन्दोलितस्वरा।
धैवतांश-ग्रहन्यासा शृङ्गारे रि-प-वर्जिता।२५२।

मूर्त्तिस्तूभयोरपि पूर्णसैन्धवीवत्।

तुरष्कगौड:—

वीरे च रौद्रे च तुरष्कगौडो
निषादजांशो रि-प-वर्जितश्च।२५३।

मूर्त्तिस्तु निबन्धान्तरे—

तुरष्कगौड आरूढहयः पक्केष्टकारुचिः।
शरचापधरश्चाय(श्चण्ड उष्णीष)मुष्णीषी कवचावृतः।
।२५४।

गान्धार:—

गान्धारको मध्यमजश्चमान्तः
स-पोज्झितः स्यात् करुणे सदैव।२५५।

मूर्त्तिस्तु—

जटां दधानः कृतभूतिभूषः
काषायवासास्तनुदेहयष्टिः।
सयोगपट्टः कृतनत्रमुद्रो
गान्धाररागः कथितस्तपस्वी।२५६।

पुलिन्दी—

गपोज्झिता षड्जभवा सदा स्यात्
पुलिन्दिकाऽभीष्टरसेषु धान्ता।२५७।

मूर्त्तिस्तु निबन्धान्तरे—

गुञ्जापुञ्जोल्लसद्भूषा पल्लवौघकृताम्वरा।
कण्डोलबीणां दधती पुलिन्दीन्दीवर-द्युतिः।२५८।

मेघरञ्जी—

धपोज्झिताषड्जभवा च गान्ता
दिवा च वीरे किल मेघरञ्जी।२५९।

मूर्त्तिस्तु निबन्धान्तरे—

श्रुतौ दधाना नवकर्णिकार-
मारामगा केशर-पुष्प-काञ्ची।
अध्यापयन्ती स्वकरस्थसारीं
श्रीरामरामेति च मेघरञ्जी।२६०।

इत्यौडवाः

अथ सङ्कीर्णाः—तत्र हरिनायकः—

एषामन्योन्यसंसर्गात् रागाणां बहुशोऽभिधाः।
तत्र केचित्तु सङ्कीर्णाः कथ्यन्ते श्रुतिशोभनाः।२६१।

पौरवी—

देशाख्यायाश्चाथ मल्लारिकायाः
स्यादंशाभ्यां पौरवीयं प्रदिष्टा।२६२।

मञ्जुकल्याणिका—

वाराड्याख्या नाटकन्नाटकाभ्यः
संभूतेयं मञ्जुकल्याणिका सा।२६३।

मूर्त्तिस्तु—

सृष्ट्वा मालां ध्यायमाना भ्रमन्ती
दृष्ट्वा कृष्णं कुञ्जमध्येवसानम्।
दत्त्वा हृष्टाऽऽकृष्टचित्ता बभूव
वृन्दारण्ये मञ्जुकल्याणिकाख्या।२६४।

साराङ्गा—

सारङ्गास्यात्तोड़िधन्नासिकाभ्यां ।२६५।

गौरी—

श्रीरागात्स्याद्गौड़रागाच्च गौरी।२६६।

नट्टमल्लारिका—

जाता नटस्याथमल्लारिकस्य
स्यादंशाभ्यां नट्टमल्लारिका च।२६७।

वल्लवी—

देशाख्या-शावरीयोगाद्वल्लवी परिकीर्त्तिता।

कन्नाटिका—

कन्नाटतो भैरवतोंऽशकाभ्यां

कन्नाटिकाख्या गदिता सकम्पा ।२६८।

मुखावरी—

सैन्धवीतोडिकायोगात् समुत्पन्ना मुखावरी।

मूर्त्तिस्तु—

देवपुष्पं करे धृत्वा तिष्ठत्येकान्तमन्दिरे ।

गीतभिनयविज्ञाता रक्तवर्णा मुखावरी ।२६९।

आशावरी—

मल्लारी सन्धवी तोडी-योगादाशावरी भवेत् ।

रामकेलिः—

गुज्जरी देशिका संगाद्रामकेलिरजायत ।२७०।

स चन्द्रहासःफलकं दधानो

निबद्धवक्षो दृढबद्धचूडः ।

गतिं वितन्वन् बहुधा पदातिः

प्रचण्डरूपः किल भैरवोऽयम् ।२७१।

सुनीलवर्ण्णा पृथुगात्रयष्टिः

विशालनेत्रा बरगुञ्जवामा ।

शङ्खं च दण्डं दधती कराभ्यां

केदारगौडा कथिता गुणज्ञैः ।२७२।

स्निग्धा श्यामा सुकेशी करधृतकमलाकान्तयुक् पुष्पवाट्यां

भ्रामन्ती भृङ्गलोभ्या विजनवनतटे रन्तुकामा युवाश्रीः ।

धृत्वा पीतांशुकं या कुसुमचययुतैर्मूर्द्धजैः शोभमाना

स्वर्णालङ्कारयुक्ता स्मरसदृशवपुः वङ्गलाश्रीः प्रविष्टा ।२७३।

राज्ञः प्रयाणे सितवस्त्रधारी

शुक्लां दधानाः खलु पुष्पमालाः ।

धृत्वोदकुम्भं फलपल्लवाढ्यं

विराजते मङ्गलराग एषः ।२७४।

अन्येऽपि सन्ति भूयांसो रागाः सङ्कीर्णलक्षणाः ।
ये ये यथा श्रुता देशे ज्ञेयास्ते ते तथा बुधैः ।२७५।

अत्र केषु केष्वपि रागेषु गानसमय उक्तः, तथापि प्रतिदेशं भिन्नतया क्वचित् क्वचित् दृष्टत्वात्तद्विवेकाय शिशुबोधनाय च पुनर्लिख्यते । तत्र दामोदरः—

प्रातर्गेयश्च देशाख्यो ललितः पढमञ्जरिः ।
विभासो भैरवी चैव कामोदो गोण्डकिर्यपि ।२७६।
एका वराडी मध्यान्हे सायं कर्णाट-मालवौ ।
नाटश्चैव विशेषेण शेषा गेयाश्च सर्वदा ।२७७।
हिन्दोलश्च वसन्तश्च वसन्ते रञ्जकावुभौ ।
नाटो गौडो वराडी च गुज्जरी देशिरेव च ।२७८।
पूर्वाह्णे गानमेतेषां निषिद्धमिति तद्विदः ।
नैवापराह्णे गातव्यौ भैरवी-ललितौ क्वचित् ।२७९।

पञ्चमसारसंहितायाम्—
विभासा ललिता चैव कामोदी पढमञ्जरी ।
रामकेली रामकिरी वल्लारी चैव गुज्जरी ।२८०।
देशकारी च सुभगा पञ्चमी च गड़ा तुडी ।
भैरवी चैव कौमारी रागिण्यो दशपञ्च च ।२८१।
एताः पूर्वाह्णकाले तु गेयास्तद्गानकोविदैः ।
वराडी मारवी कोडा वैराडी चापि धानसी ।२८२।
वेलावली मारहट्टी सप्तैता रागयोषितः ।
गेया मध्याह्नकाले च यथा भरतभाषितम् ।२८३।
गान्धारी दीपिका चैव कल्याणी प्रवरा तथा ।
अश्ववारा कानडा च गौरी केदार-पाहडा ।२८४।
माधवी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने रागिणीरेताः प्रगायन्ति मनीषिणः ।२८५।

मेघमल्लाररागस्य गानं वर्षासु सर्वदा ।
दशदण्डात् परं रात्रौ सर्वेषागानमीरितम् ।२८६।

दाक्षिणात्यास्तु कोहलनामग्राहं पठन्ति—

देशाख्या भैरवी शुद्धा शारङ्गाख्या च भैरवी ।
देवक्री रक्तहंसी च वा(मा)हुला रक्तरञ्जिका ।२८७।
एताः सूर्यांशुतो जाताः सायंकालेषु निन्दिताः ।
प्रभाते येन गीयन्ते स नरः सुखमेधते ।२८८।
शुद्धा नट्टा च सारङ्गी शुद्धा नट्टा वराडिका ।
वरालिका द्राविडी च तथा नागवरालिका ।२८९।
छाया गौली तथा चान्या वाहुल्यान्दोलिता तथा ।
मल्लारिका तथा छाया-गौली कर्ण्णाटिकाह्वया ।२९०।
गौलो मालवगौलश्च रामकिर्यस्तथैव च ।
छायाराम कृते रञ्जि छाया सर्ववरालिका ।२९१।
कर्ण्णाटाह्वयवङ्गाला इत्येते चन्द्रमोंऽशजाः ।
एते रागाः विशेषेण प्रातःकालेषु निन्दिताः ।
सायमेषान्तु गानेन महतीं श्रियमाप्नुयात् ।२९२।

किं च—गीतगोबिन्दटीकायां लक्ष्मणभट्टः—

प्रातर्गुण्डकिरी सदा मलहरी देशाख्यका गुज्जरी
मध्याह्नेऽपि च रामकृद्द्वयमथो कर्ण्णाटनाटादयः ।
सायं मालविकाकृतेति सुधियो गायन्ति सायन्तने
शारङ्गं पुररेवगौरममरं प्रत्यूषतो भैरवीम् ।२९३।

कौमुद्याम्—

श्रीपञ्चमीं समारभ्य विष्णोः शयनमेवच ।
तावद्वसन्तो गायेत प्रभाते भैरवादिकम् ।२९४।
मध्यान्हे तु वराड्यादेः सायं कन्नाट-नाटयोः ।
श्रीरागमालवादेस्तु गाने दोषो न विद्यते ।२९५।इति।

इन्द्रपूजां समारभ्य यावद्गिरिसुतार्च्चनम् ।
तावदेव समुद्दिष्टं गानं वै मालवश्रियः ।२९६।
एवं तु बहुधाचार्यैर्गाने कालः समीरितः ।
यस्मिन्देशे यथा शिष्टैर्गीतविज्ञस्तथाचरेत् ।२९७।

अकाले गानदोषमाह—

समयोल्लङ्घनं गाने सर्वनाशकरं ध्रुवम् ।

अपवादमाह—

श्रेणीवन्धे नृपाज्ञायां रङ्गभूमौ न दोषभाक् ।२९८।

परिहारमाह—कोहलीये—

लोभान्मोहाच्च ये केचिद् गायन्ति च विरागतः ।
सुरसा गुज्जरी तस्य दोषं हन्तीति कथ्यते ।२९९।

अन्यत्रापि—

अवेलारागमाकर्ण्य तज्जदोषप्रशान्तये ।
ईशानं च हरिं स्तुत्वा मध्यमादिमनन्तरम् ।
गायेद्वा शृणुयाद्वापि तस्माद्दोषाद्विमुच्यते ।३००।

अकालगानप्रायश्चित्तमनयोरन्यतरत् कुर्यादित्यर्थः ।

रत्नमालायां—

वसन्तो रामकेरी च गुज्जरी सुरसापि च ।
सर्वस्मिन् गीयते काले नैव दोषोऽभिजायते ।३०१।

नारदस्तु विशेषमाह—

दशदण्डात् परं रात्रौ सर्वेषां गानमीरितम् ।

अथ पूर्वोक्तलक्षणस्य गीतस्य भेदानाह—

अनिवद्धं निवद्धं च द्विधा गीतमुदीरितम् ।

अथानिबद्धमाह—

आलप्तिरनिवद्धं स्याद्रागालपनरूपिणी ।३०२।

तदुक्तम्—

आलप्तिर्बन्धहीनत्वादनिवद्धमितीरितम् ।इति।

रागस्यालापनं प्रकटीकरणम्—हरिनायकस्तु—

वर्णालङ्कारसंयुक्ता गमकस्थानचित्रता ।

आलप्तिरुच्यते तज्ज्ञैः भूरि-भङ्गिमनोहरा ।३०३।

एतेन तालानां सर्वेषां आलापे प्रवेशः। वर्णालङ्कारास्तु निरर्थकहुंकारादिशब्दाः, संगीतोक्त-सरिगमेत्यादि।

वर्णालङ्कारश्च—

आलप्तेर्बहुधाभेदा न प्रपञ्चभियेरिताः ।

निबद्धमाह—

बद्धं धातुभिरङ्गैश्च निवद्धमभिधीयते ।

शुद्धं छायालगं क्षुद्रमिति तच्च त्रिधा मतम् ।३०४।

तत्र शुद्धमाह—

आलापैर्धातुभिश्चाङ्गैः संयुक्तं शुद्धमुच्यते ।

आलापोऽत्र सार्थकपदैरेवेति सांप्रदायिकाः। हरिनायकस्तु—आलापो गमकालप्तिरक्षरैर्वर्जिता मता, इत्याह सारे तु—

शुद्धं सालप (ग)-सङ्कीर्ण-भेदाद्गीतं त्रिधा मतम् ।

तत्र क्षुद्रगीतमेव सङ्कीर्णशब्देनोच्यते। तच्च स्यात्त्रिविधं तु शुद्धकमिदं छायालगं क्षुद्रकमिति तेनैवोक्तत्वात्। दामोदरोक्तं कथयिष्यते। हरिनायकस्तु—

संज्ञात्रयनिवद्धस्य प्रबन्धो वस्तुरूपकम् ।

चतुर्भिर्धातुभिर्बद्धस्त्वङ्गैः षड्भिश्च कल्पितः ।

प्रकृष्टो यश्च बन्धःस्यात् स प्रबन्धो निगद्यते ।३०५।

एतेन शुद्धगीतमेव प्रबन्ध इत्युच्यते। त्रिभिश्चतुर्भिरपि धातुभिः इत्यर्थः।

त्र्यादिभिर्धातुभिश्चाङ्गैः पञ्चभिर्वस्तु कथ्यते ।

द्विधातुकं तथा द्व्यङ्गं रूपकं परिकीर्त्तितम् ।३०६।इति।

अथ धातुमाह्—प्रबन्धावयवो धातुः। अवयवो भागविशेषः। स चतुर्धा प्रकीर्तितः। उद्ग्राहक मेलापक ध्रुवाभोगा इति क्रमात्।

उद्ग्राहः प्रथमो भागस्ततो मेलापकः स्मृतः।
ध्रुवत्वाच्च ध्रुवः पश्चादाभोगस्त्वन्तिमो मतः।३०७।

सम्प्रति तु आभोगध्रुवयोर्मध्ये मेलापकधातोः प्रयोगः कुत्रापि न दृश्यते। अतएव तस्य त्यागेन प्रबन्धावयवो धातुः, स त्रिधेति गीतप्रकाशकारेणोक्तम्। उद्ग्राहध्रुवाभोगरूपेण त्रिधेति भावः। तदुक्तं शिरोमणौ—

उद्ग्राहः प्रथमः पादः कथितः पूर्वसूरिभिः।
ध्रुवत्वाच्च ध्रुवो मध्य आभोगश्चान्तिमः स्मृतः।३०८।

ध्रुवत्वान् निश्चलत्वात् पुनः पुनरुपादानादित्यर्थः। यत्तु हरिनायकेनोक्तम्।

ध्रुवाभोगान्तरे जातो धातुरन्योऽन्तराभिधः।
स तु सा-लगसूडस्थो रूपकेष्वेव दृश्यते।३०९।इति।

तस्यापि इदानीं क्वापि प्रयोगो न दृश्यते। तद्बीजं तु तेनैवोक्तम्।

मेलापकान्तराख्यौ तु न भवेतां क्वचित् क्वचित्।इति।

आभोगमाह्—

यत्रैव कविनाम स्यात् स आभोग इतीरितः।

अतः आभोगे एव कविनाम दातव्यं, न तु यत्र कविनाम स आभोग इति। तदुक्तम्—

आभोगे कवि नामस्यात्तथा नायक नाम च।

अथाङ्गान्याह्—

प्रबन्धस्य षडङ्गानि स्वरश्च विरुदं पदम्।
तेनकः पाटतालौच स्वराः सरिगमादयः।३१०।
गुणोल्लेखतया यत्तद्विरुदं परिकीर्तितम्।
अतोऽन्यवाचिकं यत्तु तत्पदं समुदाहृतम्।३११।

तेनेति शब्दस्तेनः स्यान्मङ्गलार्थोऽवधारितः ।
धां धां धुग धुगेत्याद्याः पाटवाद्याक्षरोत्कराः ।
आदियत्यादिकास्तालास्तालः स कथयिष्यते ।३१२।

दामोदरस्तु अङ्गमध्ये पदपरित्यागेन गमकमाह । किं तु गीतगुणमध्ये गमकः पूर्वाचार्यैर्लिखितः, नत्वङ्गतया । तस्माद् गमकशब्दोऽत्र पदवाचक इत्यवधेयम् । गीतप्रकाशकारेण तु वाक्यस्वरपाटतेनाख्यानि चत्वार्यङ्गानि उक्तानि । तन्मते तु तालोऽङ्गत्वेन गदितः । पद-विरुदे वाक्यान्तर्गततया पृथक् न लिख्यते । किं त्वेतत्प्राचीनाचार्यैरलिखितत्वादनादेयम् ।

अथ जातिमाह—

जातयः स्युः प्रबन्धानां पञ्चैव मुनिसम्मताः ।
मेदिनी नन्दिनी दीपिन्यथ स्यात्पावनी तथा ।३१३।
तारावली तथैतासां लक्षणं प्रतिपद्यते ।
षडङ्गा मेदिनी प्रोक्ता पञ्चाङ्गा नन्दिनी तथा ।३१४।
दीपिनी चतुरङ्गा स्यात्पावनी त्र्यङ्गका मता ।
द्व्यङ्गा तारावली प्रोक्ता पुराणैर्गीतवेदिभिः ।३१५।

एतेन एकाङ्गः प्रबन्धो न भवतीति प्रतिपादितम् ।

शुद्धप्रबन्धभेदः—

भेदः शुद्धप्रबन्धानामानन्त्यादेक एव हि ।

तत्रापि—

तालेनैकेन वा द्वाभ्यां त्रिभिर्वा बहुभिस्तथा ।
प्रबन्धान् सुकविर्नूनं यथेच्छमुपकल्पयेत् ।३१६।

किं च—

बहुतालाः प्रबन्धास्तु रागैर्बहुभिरेव च ।
एकरागेण वा कल्प्याः पाटादीनां विधानतः ।३१७।
आदिमध्यान्तविन्यासात् पाटादीनां विधानतः ।
भेदा बहुतरास्तेषां कस्तान् कार्त्स्न्येन वक्ष्यति ।३१८।

तदुक्तम्—

न रागाणां न तालानां न वाद्यानां विशेषतः ।

नापि प्रवन्धगीतानामन्तो जगति विद्यते ।३१९।

तत्प्रकारमाह—

तत्राभोगे कवेर्नाम तथा नायक नाम च ।

एकतालीं निवध्नीयादालापानन्तरे तथा ।३२०।

इदानीन्तनैस्तु आलापाभोगयोरेकत्र कविनायकयोर्नाम कुर्वन्ति, तत्र मूलं न पश्यामः । किं चात्र प्रथमतस्तालो गीयते । यस्तु तेनैव—

गीतावसाने दातव्यं मानं गानसमाप्तये ।

शक्तिवर्ण्यविशेषेण नामान्येषां च कारयेत् ।३२१।

शक्तिविशेषेण यथा—

अकारादिक्षकारान्ताक्षरविन्यासान् मातृकाप्रबन्धः । किं च—सरिगमेत्यादि स्वरनामाक्षरविन्यासविशेषवशाद्वाञ्छितार्थ-प्रकाशनेन स्वरार्थ-प्रवन्ध इति । वर्ण्यविशेषेण यथा—विष्णुवर्णने विष्णुप्रकाश प्रवन्ध इति । किं च—आदितालादिकैस्तालैर्दशभिर्नवभिः पुनः । किं च—

आदितालादिकैस्तालैर्दशभिर्नवभिः पुनः ।

सप्तभिर्वापि कल्प्यन्ते प्रवन्धा रागरञ्जिताः ।३२२।

उदाहरणं तु 'सङ्गीतकौमुद्यां' धन्नासीरागेण जयनारायणेत्यादि गीतम् । मया तु ग्रन्थबाहुल्यभयादुदाहरणानि नोपन्यस्तानि । किं च—

एलाद्या दुष्करा सन्ति प्रबन्धा मुनिभाषिताः ।

तेभ्यः षड्विंशतिः प्रोक्ता हरिनायकसूरिणा ।३२३।

कथ्यन्ते क्रमशस्ते च नाम मात्रेण केवलम् ।

पञ्चतालेश्वरोवर्णस्वरश्चैवाङ्कचारिणी ।३२४।

स्वरार्थो मातृका चैव तथा रागकदम्वकः ।

स्वराद्यं करणं वर्त्तन्यथ तालार्णवस्तथा ।३२५।

श्रीरङ्गः श्रीविलासश्च पञ्चभङ्गिस्ततः परम् ।

पञ्चाननो मार्तलिकौ सिंहलीलस्तथापरः ।३२६।

त्रिभङ्गिर्हंसलीलश्च तथा हरविलासकः ।
सुदर्शनः स्वराङ्गः श्रीवर्द्धनो हर्षवर्द्धनः ।३२७।
वीरश्रीर्मङ्गलश्चैव पा(ला)हड़ी च प्रकीर्त्तितः ।
नवरत्नाभिधः प्रोक्तस्तथा शरभलीलकः ।३२८।
कण्ठाभरणनामा चेत्येते षड्विंशतिर्मताः ।
चन्द्रप्रकाशकाद्याश्च विद्यन्ते षट्तथा परे ।३२९।
संप्रत्येतेऽपि सुकराः कविभिर्न भवन्ति हि ।
एषु ये सुकराः पञ्चषास्तानेव हि चक्ष्महे ।३३०।
एभ्योऽन्यः कायवालाख्यः स एवादौ निरूप्यते ।

कायवालः—

यत्र तालाः प्रकाश्यन्ते पाटमात्रेण केवलम् ।
पदानां कल्पनाभोगे कायवालः स ईर्य्यते ।३३१।

उदाहरणं तु गीतप्रकाशे मृग्यम् ।

वर्ण्णस्वरः—

स्वरैः पाटैः पदैस्तेनैः रचनावाञ्छितक्रमात् ।
यस्यासीत्तेनकैर्न्यासः स वर्ण्णस्वर उच्यते ।३२३।
स्वरादेरादिविन्यासभेदादेषश्चतुर्विधः ।

स्वरादिवर्ण्णस्वरः, पाटादिवर्ण्णस्वरः, पदादिवर्ण्णस्वरः, तेनादिवर्ण्णस्वरश्च ।

स्वरार्थः—

यत्र स्वराक्षरैरेव वाञ्छितार्थोऽभिधीयते ।
स स्वरार्थो भवेद्द्वेधा शुद्धमिश्रप्रभेदतः ।३३३।

स्वराक्षरैः स रि ग म प ध निभिर्यथेच्छं वाञ्छितार्थो निवध्यते चेत्तदा स्वरार्थः । इति स्वरार्थः ।

मातृका—

एकैका मातृकावर्ण्णपूर्वकाणि पदानि चेत् ।
क्रमेण यत्र गीयन्ते मातृका सा त्रिधा मता ।३३४।
दिव्या च मानुषीदिव्यमानुषी चेति तत्र तु ।
दिव्या संस्कृतया वाचा मार्गतालैश्च गीयते ।३३५।

मानुषी प्राकृतगिरा देशीतालेन निर्मिता ।
द्वयोर्मिश्रयणादुक्ता मातृका दिव्य-मानुषी ।३३६।
तालेनैकेन रागेण बहुभिर्वा प्रयोगतः ।
सर्वमन्त्रमयी ह्येषा सर्वसिद्धिप्रदायिनी ।३३७।

मार्गदेशीतालौ वक्ष्येत, तयोर्मध्ये येन केनचिन्निर्मितेत्यर्थः ।

रागकदम्वः—

अन्यारागकदम्वोऽस्ति रागाणामेव दर्शनात् ।
अस्य रागकदम्वस्य भाषादेर्नियमो न हि ।३३८।

स्वल्परागकदम्वः, अन्यस्तु दुष्करत्वान्न लिखितः ।

तालार्ण्णवः—

तालार्ण्णवो भूरितालो भवेत्संस्कृतभाषया ।
योगाद्गद्यस्य पद्यस्य स द्वेधा परिकीर्त्तितः ।३३९।

श्रीरङ्गः—

तालै रागैश्चतुर्भिःस्याच्छ्रीरङ्गोऽन्ते पदान्वितः ।
पदैः सुप्तिङन्तैस्तैरन्ते प्रान्ते सुघट्टितः ।३४०।

श्रीविलासः—

स्वरान्तः श्रीविलासः स्यात्तालै रागैश्च पञ्चभिः ।

स्वराः सरिगमादयोऽन्ते देया इत्यर्थः । ततनकान्तः पञ्चभङ्गिः । श्रीविलास एव तेनांशाद्वान्तः । स्याचेत्तदा पञ्चभङ्गिर्भवति । "पाटैः पञ्चाननोऽन्तगैः" अस्यैवान्ते पाटाश्चेद्दीयन्ते तदा पञ्चाननः ।

सिंहलीलः—

स्वरैः पाटैश्च विरुदस्तेनकैर्यो विरच्यते ।
सिंहलीलेन तालेन सिंहलीलः स उच्यते ।३४१।

तालस्तु चूडामणौ—

सिंहलीलोलघोरन्ते दत्रयं परिकीर्त्तितम् ।

हंसलीलः—

स्वनामतालको हंसलीलोऽङ्घ्रि पदपाटजौ ।३४२।

स्वनामतालकः हंसलीलतालेन घटितः, अंघ्रिपदपाटकौ कोऽर्थः, एकः पादः पदैर्निर्मितः, एकस्तु पाटैरित्यर्थः ।
तालस्तु रत्नमालायाम्—

हंसलीलो विरामान्तं लघुद्वयमुदाहृतम् ।इति।
यत्र वीररसेन स्यात् संग्रामर्दवितस्तुतिः ।
बहुभिश्चरणैश्चैवं लाहडी (पाहड़ी) परिकीर्त्तिता ।३४३।

पावड इत्युत्कलदशभाषा ।

नात्रोक्ता दुष्कराः केचित् पञ्चताले श्व (स्व) रादयः ।
ईषद्भेदान्न सुकरा अप्युमातिलकादयः ।३४४।

अतो गीतप्रकाशकारेणोक्तम्, एतेषां लक्षणादिकं नात्र वर्णितमुक्तप्रकार-निर्विशेषादिति । किं च सूडप्रवन्धोऽपि शुद्धगीतमध्ये बहुभिर्लिखितः । तल्लक्षणं तु—

ताला नवादिका यत्र पाटादि रहिता यदि ।
सूडः प्रवन्धः कथितः एकरागनिवेशितः ।३४५।

अस्य पदविरुद-तालघटितत्वात् त्र्यङ्गत्वेन पावनी जातिः । ननु षडङ्गघटितस्यैव प्रवन्धत्वं तत् त्र्यङ्ग-घटितस्यास्य कथं प्रवन्धत्वमिति नाशङ्कनीयम् । यतो वचनवलादेवात्र प्रबन्धव्यवहारः । यथा पाटमात्रघटितस्यापि कायवालस्य एकाङ्गत्वेऽपि प्रवन्धत्वम् । अयं वाक्यस्वरूपाङ्गमात्रघटितत्वादेकाङ्ग इति गीतप्रकाशकारः । तन्मते तु अस्य चतुरङ्गत्वेन स्वरपाटतेनावर्जनाद्वाक्यमात्रघटितत्वम् ।
अथ छायालगमाह—

शुद्धस्य लगति छायां यत्तु छायालग विदुः ।
रञ्जकं तु भवेत्तालैराजाद्यैः सूड कल्पितम् ।३४६।

वहूनां तालानामेकत्रगुम्फनं सूडः । छायां लगतीत्यनंन शुद्धस्य यत् किञ्चिल्लक्षणेनेदं भवतीत्युक्तम् । तदुक्तम्—

तदुक्तम्—

उक्तानामेव भावानां छायामात्रं भवेद्यदि ।
छायालगः स विज्ञेयो मुनिभिर्भरतादिभिः ।३४७।

अस्य सालगमिति नामान्तरमिति । तदुक्तं हरिनायकेन—"अथ छायालगो यस्तु स एव सालगः" अस्य तु मतभेदाद्बहुत्वम् । तथा च दामोदर-पञ्चमसारसंहितयोः—

ध्रुवको मण्ठकश्चैव प्रतिमण्ठनिसारुकः ।
रासकः प्रतितालश्च तथाऽन्या चैक-तालिका ।३४८।
यतिश्च चर्च्चरी चेति सालगं सूडमीरितम् ।

ध्रुवकादीनां भेदमाह—

ध्रुवकाः षोडशप्रोक्ता मण्ठकाः षट्प्रकारकाः ।
प्रतिमण्ठाश्च पञ्चैव सप्त ख्याता निसारुकाः ।३४९।
चत्वारो रासकाः प्रोक्ताश्चत्वारो प्रतितालकाः ।
एकताली च त्रिविधा चतस्रो यतयो मताः ।३५०।
एकैव चर्च्चरीश्चेति सालगा कथिता इमे ।
केप्याहुश्चर्चरिकाद्याः सन्त्यन्ये दश सालगाः ।
ऊनविंशतिरेवं ते भवन्ति भुवि सालगाः ।३५१।

हरिनायकोऽपि—

आद्योध्रुवस्ततो मण्ठः प्रतिमण्ठक एव च ।
अड्डु(?)तालः प्रतीरास एकतालीत्यसौ मतः ।३५२।
अयं सूडः प्राक्प्रसिद्धः शार्ङ्गदेवस्य सम्मतः ।
इत्यादि सालगानां तु लोके सिद्धिर्यतो न हि ।३५३।
दुष्करत्वात्तन्न मया लक्षणैस्ते प्रकीर्त्तिताः ।
प्रयुज्यते संप्रति यः सूडो रम्यः कवीश्वरैः ।३५४।
स एव संप्रत्यस्माभिर्लिख्यते लोकसिद्धितः ।

तत्र च—

आदिर्यति निःसारुश्चाड्डुतालस्त्रिपुटस्तथा ।३५५।

रूपको झम्पको मण्ठ एकतालीति कीर्त्तिता।
एभिस्तु नवभिस्तालैः कल्पितः सूड उच्यते।३५६।
इत्येष रञ्जकः सूडो गाने वाद्ये च नर्तने।
न स्यात्प्रायोऽड्डुतालोऽत्रेत्याह दामोदरः स्वयम्।३५७।
केचित्कुडुक्कोपाड्डौ चात्राहुस्तेन भवेदयम्।
अप्येकादशतालात्मा स इदानीं विविच्यते।३५८।
प्रागादिर्यतिनिःसारुर्मण्ठादीनां यथाक्रमम्।
गानमन्ते चैकताल्या इत्येषः नियमः क्वचित्।३५९।

किं च—

आदितालो भवेदादावन्ते स्यादेकतालिका।
अन्येषां नियमाभाव एवमाहुश्च केचन।३६०।

संप्रति तत्तदुत्कलभाषाप्रबन्धेष्वप्यन्यतालेनापि प्रथमं यद्गानं दृश्यते तदनाकरमिव प्रतिभाति। अभियुक्तैरप्यवधेयम्। अथ तेषां ध्रुवमण्ठलक्षणमाह—

अथैतेष्वेव तालेषु केचित्स्युर्ध्रुवलक्षणाः।
मण्ठलक्षणकाः केचित्केचिच्चोभयलक्षणा।३६१।

तदुक्तम्—

ध्रुवाख्यौ यतिनिःसारू मण्ठान्त्यौ मण्ठलक्षणौ।

अन्त्य एकताली—

आदिरूपकझम्पाड्डु-त्रिपुटाः स्युर्द्विलक्षणाः।३६२।

द्विलक्षणा—ध्रुवलक्षणा मण्ठलक्षणाच—

कुड्डुको मण्ठलक्ष्म स्याद् द्विलक्ष्मापाड्डुतालकः।

सारे तु—

चंचत्पुटश्चाचपटः सिंह-विक्रीडितस्तथा।
सिंहनन्दनमुख्या ये तेऽपि स्युर्मण्ठलक्षणाः।३६३।

तत्र ध्रुवलक्षणमाह—

ज्ञेयः सध्रुवलक्षणो यदि भवेदुद्ग्राह एव ध्रुव-
स्तूच्चैर्खण्डमिह द्विधातु गदितं द्विर्गेयमेवोच्चकैः।

द्विधातु द्वयवयवम्(?), प्रथमखण्डापेक्षया द्वितीयखण्ड उच्चैर्गेयः। द्वित्रिमात्राधिकः प्रथमखण्डः सममात्रो वा इति केचित्।

उदाहरणं यथा—आदितालेन मल्लाररागेण—

जय जय शङ्कर किङ्कर-जनमव
भवभञ्जन जनरञ्जन आ।
नवशशिखण्डशिखण्डचण्डकर-
शशधर-वन्हिविलोचन आ रे।

इति प्रथमः खण्डः।

परशु-कपाल-कुरङ्ग-डम्बरुधर हर हर दुरितदुरन्तभयम्।
सुरतटिनीयुत मुकुटमहानट गौरी-लम्पट ति आ ईआ ईआरे।

इत्युच्चः खण्डः।

अत्र खण्डद्वयमपि द्विर्गेया, प्रथमखण्डापेक्षया द्वितीयखण्ड उच्चैर्गेयः। ध्रुवः।

नमदमरेश-किरीट-मञ्जुमणि
मार्जितनखपदचन्द्र विभो।
भव भवशरणं भूतिविभूषित
कृष्णदास इति गायति आ रे।

ततस्ति आ ई आरे इत्यादयो निरर्थकाः। सताला गीतलालित्यार्थं प्रयुज्यन्ते गायकैः। नेदं लक्षणप्रदिष्टम्। केचित्तु ध्रुवलक्षणस्य चातुर्विध्यमाहुः। तदुक्तम्—

'ध्रुवलक्ष्मा चतुर्द्धायं विनोदो वरदस्तथा।
नन्दकः कन्दुकश्चेति' स च सारे—
आलापादिध्रुवोऽयं मत इह करुणे गीयते कन्दुकाख्ये—
आलापान्तो ध्रुवो यो वरद इति मतो देवतानां स्तुतौ सः।
उद्ग्राहादिद्विखण्डो यदि भवति तथालापकादिः स नन्दो
गायेत्तं चोत्सवेषु स्फुटमथ कुतुके स्याद्विनोदोऽपि तद्वत्।३६४।

लक्षणव्यतिक्रमस्तु छन्दोऽनुरोधात् ।

अथ मण्ठलक्षणमाह—

स स्यान्मण्ठकलक्षणो यदि समावुद्ग्राहिकाभोगकौ ।
उद्ग्राहाद्द्विगुणोऽथ सार्द्धगुणको वास्याद्ध्रुवस्तत्र च ।

उद्ग्राहाभोगयोरपेक्षया ध्रुवो द्विगुणमात्रः, सार्द्धकगुणमात्रो वेत्यर्थः । समौ सममातृकौ । तदुक्तं हरिनायकेन—

साम्यं यत्र तु मात्राया उद्ग्राहाभोगयोरथ ।इति ।

उदाहरणमादिताले मल्लाररागेण—

द्वारावतीपुरमनुवलसंयुत उद्धवसहितो नियतिमयम् ।
अक्रूरोत्तमं सच्चिदानन्दक निरुपम समिति स्ति आ ई आ रे ।

इत्युद्ग्राहः ।

मुकुन्दनृपती राजति आ ।
विपुलभक्तितया हरिचरितं निखिलमनुकरोति आ रे ।

इति सार्द्धकगुणमात्रो ध्रुवः ।

विनतानन्दनकेतुरम्वुरुहकम्वुचक्रकरशोभी
सिन्धुसमीपे सततं विहरति कृष्णदास इति गायति आ रे ।

इत्याभोगः ।

इत्येषां सालगादन्यत्र प्रायिकत्वमित्येके—

तदुक्तं कौमुद्याम्—

अमी प्रोक्ताः प्रवन्धेषु बाहुल्येन स्थिताः पुनः ।
सालगे नियुता एभिर्विना तत्सम्भवो न हि ।३६५।

उदाहरणानि तु ग्रन्थान्तरे द्रष्टव्यानि । मया तु प्रपञ्चभिया नोक्तानि ।

ननु—

उक्तो द्विखण्ड उद्ग्राह आभोगोऽपि द्विखण्डकः ।
मण्ठलक्ष्मानुसारेण ध्रुवके खण्डकल्पना ।३६६।

इत्युक्तत्वात् उद्ग्राहाभोगयोर्द्विद्विखण्डात्मके सिद्धे उक्तोदाहरणे कथं बह्वखण्डाः दृश्यन्ते । उद्ग्राहादीनां द्विखण्डत्वेऽपि प्रतिखण्डमवान्तरखण्डकल्पनैरेव निर्णेयम् । अतो यावद्भिरवान्तरखण्डै-रञ्जकता भवति, तावन्त एव खण्डाः, उद्ग्राहादि खण्डे निवेशनीया । तदुक्तम्—

एकद्वित्रिचतुःखण्डे तालेषु विविधेषु च ।
उद्ग्राहादेः कल्पनां तु यथा लालित्यमाचरेत् ।३६७।

लालित्यं रञ्जकता । अथ खण्डलक्षणम्—

कुडुकादेकतालीनां खण्डः षोडशमात्रिकः ।
प्रान्तः खण्डश्चतुर्दशभिः मात्राभिरुपकल्प्यते ।३६८।
किं चात्राष्टममात्रायां भङ्गी यत्यात्मिका पुनः ।
गीते भङ्गीविशेषज्ञैरीषद्विश्रान्तिरुच्यते ।३६९।
खण्डो मात्रा चतुर्द्दशभिः यतित्रिपुटयोस्तथा ।
भङ्गीसप्तममात्रायां प्रान्तो द्वादशभिः स्मृतः ।३७०।
झम्पाड्डुतालयोर्बन्धो मात्राभिर्दशभिर्भवेत् ।
कुत्रापि पञ्चदशभिरूर्नविंशतिभिः क्वचित् ।३७१।
सर्वत्रैव हि पञ्चम्यां पञ्चम्यां भङ्गिरीरिता ।
खण्डो मात्राश्चतुर्द्दशभिस्ताले निःसारुनामनि ।३७२।
षष्ठ्यां दशम्यां भङ्गी स्यात् प्रान्तो द्वादशभिर्भवेत् ।
रूपके तु द्वादशभिर्मात्राभिः कथितो दलः ।३७३।
क्वाप्येकादशभिः कार्यास्ताभिरेवान्तिमो दलः ।
भङ्ग्यत्र षष्ठमात्रायामन्येरूपकबन्धगाः ।३७४।

तत्र संग्रहः—

एकद्विमात्रिकान्यूनाः सर्वेषु प्रान्तखण्डका ।इति।

एवं प्रकारेण बन्धे निश्चिते गानवशात्तालाः सम्पाद्यन्ते । ततस्तालानामावृत्तयो भवन्ति । ताश्च तालकालानुसारेण कल्पनीयाः ।

किञ्च—

मात्रावृत्ता भवन्त्येव तालास्तु निखिला अपि ।
मात्रा निबद्धखण्डे स्युस्ताला गानक्रमोत्थिताः ।३७५।

हरिनायकस्तु—

पञ्चादिका अष्टपरास्तालावृत्तय ईरिताः ।
ध्रुवलक्षणकस्याद्यखण्डे खण्डे द्वितीयके ।३७६।
एकद्वित्र्यधिकाः प्रोक्ताः अथ स्युर्मण्ठलक्षणे ।
सप्ताधिका नवपरा उद्ग्राहेऽथ ध्रुवे पुनः ।३७७।
आवृत्तयस्तु तालस्य दशाद्या द्वादशान्तकाः ।इति।

अपरं च—

तालावृत्ते स्तथाभोगे क्वचिन्न्यूनातिरिक्तते ।३७८।

परन्तु—

तालवृत्तेस्त्वनियमं वदन्त्यन्ये विपश्चितः ।

अन्यत्रापि—

"आवृत्तयस्त्वनियताः किल ताल(का)ना-
मित्येव केचिदिह गीतविदो वदन्ति ।"

अतएवोक्तम्—

कलाबहुलतालेषु सिंहनन्दनवादिषु ।
आवृत्तिरेका कथिता त्रिषूद्ग्राहादिकादिषु ।३७९।

एकया आवृत्या उद्ग्राहः, एकया आवृत्या ध्रुवः । एकया आवृत्या आभोगश्चेत्यर्थः । तर्हि कौमुद्यां सिंहनन्दनोदाहरणे—

'दधतं तं मुखशशिनं' इत्यादौ एका एव आवृत्तिरिति नाशङ्कनीयम् । तालमात्राणां उदाहरणमात्रमुक्तमादितालाद्युक्तोदाहरणवत् ।

बन्धसाम्यमाह—

कुडुकाद्येकतालीनां यतित्रिपुटयोस्तथा ।
झम्पाडुतालयोर्बन्धः समावेशः समः स्मृतः ।३८०।
अन्ये रूपकबन्धास्युर्निःसारुर्नान्यबन्धगः

अत्र नचैकस्मिन् बन्धे तालद्वयघातः कथं संगच्छते इति वाच्यम्। तालो हि घातविशेषः नियतसमयः। घातभेदेन यदि तालभेदा उत्पद्यन्ते तदा तयोरप्यविरोधो न कापि हानिरित्येतत् सर्वानुभवसिद्ध-मेवेति सर्वं समञ्जसम्।

तत्र छन्दोरत्नाकर—अथ तालाङ्गपरिभाषा

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्त-लघुस्तः ।३८१।

गुरुरेको गकारश्च लकारो लघुरेककः।
प्लुतः पकार इत्येव द्रुतश्च दः प्रकीर्त्तितः ।३८२।

अनुद्रुतो द्रुतश्चैव लघुर्गुरुरतः परम् ।
प्लुतश्चैव क्रमेणैव तालाङ्गानि च पञ्चधा।
अनुद्रुतं विनान्येषां दलगपात्मिका ।३८३।

अथ गुरुलघुसंज्ञा—

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्ण्णः संयोग-पूर्वश्च तथा पादान्तगोऽपि वा ।३८४।

अथ लघ्वादीनां मात्रादिनियममाह—

लघ्वेकमात्रं तु गुरुर्द्विमात्रं
प्लुतस्त्रिमात्रो द्रुतमर्धमात्रम्।
अनुद्रुतं तु द्रुतकार्द्धमात्रं
विराम इत्यस्य भवेच्च नाम ।३८५।

मात्राप्रमाणमाह—

तिर्यग्रेखानुद्रुताङ्गं शून्याकारं द्रुतं स्मृतम्।
लघु ऋज्वल्पिकारेखा रेखाधोवक्रिता गुरुः।
प्लुतं गुरोर्मूर्न्धिरेखा तिर्यक् चेद्दक्षपार्श्वगाः ।३८६।

एतेषां सावधिकघातस्थानमाह—

द्रुताश्रयं तु कथितं चतुरङ्गुलमूर्च्छितम् ।
लघुरष्टाङ्गुलः प्रोक्तः गुरुः स्यात् षोडशाङ्गुलः ।
प्लुतस्त्वष्टाङ्गुलश्चानुद्रुतः किञ्चित्करक्रिया ।३८७।

अथैषां धरणप्रकारमाह—

सशब्दं शब्दहीनं च तालस्य धरणं द्विधा ।
उच्चैर्घातः सशब्दःस्यादेक एव लघोः परम् ।३८८।
गुरौ घातद्वयं प्रोक्तमेको नादः परोऽस्वनः ।
सोऽप्यर्द्धं यति च लघोरर्द्धनादा द्रुताहृतिः ।३८९।
प्लुते घातः सशब्दस्यादेकोघातद्वयं ततः ।
तन्निःशब्दमेक ऊर्द्धं प्रपतेदपरस्त्वधः ।३९०।

तत्रायं प्रकारः—चतुरङ्गुलं शङ्कु भूमौ निखन्य तच्छिखापर्यन्तं करमुत्तोल्य पतने तत्समकालेन द्रुतघातः । एव लध्वावपि । गुरौ तु षोडशाङ्गुलात्मकं घातं अष्टाङ्गुलतया द्विधा विभज्य तन्मूलेऽष्टाङ्गुलसम्मिततया घातं दत्वा तदवधिकोऽस्वनो घात स्तदुपरिदेयः । घाताकारदर्शनमात्रं कर्तव्यमित्यर्थः । एवं प्लुतेऽपि चतुर्विंशाङ्गुलानि त्रिधा विभज्य घाता देयाः । अत्र सशब्दनिःशब्दता-तालघाते हस्तकविशेषा हरिनायकादावनुसन्धेयाः । द्रुतादेर्घातः कुत्र देय इत्याह—

द्रुतेर्लघौ गुरोर्मूले प्लुतमूले सशब्दकम् ।
निःशब्दं तु गुरोर्मन्र्धि प्लुतमूर्न्धि द्विवारकम् ।३९१।

अथ सूडाङ्गतालानाह—यतः

विना तालेन गीतादेर्गतिशुद्धिर्न जायते ।
कर्ण्णधारं विना नाव इवातस्तान् प्रचक्ष्महे ।३९२।
तत्राचार्यैस्तालशब्दे व्युत्पत्तिर्वहुधोदिता ।

तत्र हरिनायकः—

समयस्य समत्वेन रञ्जकत्वेन चाधिकम् ।
तालयत्येव संगीतं यत्तत्तालो निगद्यते ।३९३।

तालयति प्रतिष्ठापयति। तल प्रतिष्ठायां धातुः।

सारे तु—

तकार ईशो गिरिजा लकार-
स्तालस्ततः स्याच्छिवशक्तियोगात्।
तलेस्तुधातोर्घञ्विवेहताल-
स्तालोऽथवा स्यात्तलयोस्तु योगात्।३६४।

रत्नमालायाम्—

तकारः शरजन्मास्यादकारो विष्णुरुच्यते।
लकारो मारुतः प्रोक्तस्ताले देवा वसन्त्यमी।३६५।

वाचस्पतिस्तु—

हस्ताङ्गुलि प्रसारणाङ्कुचनादिक्रिया हि या।
तया कालस्य मानं यत् स ताल इह कथ्यते।३६६।
स्थितेष्वप्यन्यतालेषु प्रवन्धाङ्गतया पुनः।
आद्याद्येकदशानां च तालानां लक्षणं ब्रुवे।३६७।

तत्र आदिः—'आदिरेकेन लघुना रासोऽयं कैश्चिदुच्यते' तालानां ध्रुवलक्षणादिकमुक्तम्।

'जय सुरनायक वाञ्छितदायक' इति। संप्रति गायकपरम्परया सविराम-बिलम्वितलय-द्रुतत्रयेणादितालस्यावृत्तिद्वयं गायन्ति। तत् कुत्रापि नावलोक्यते। अहं पुनर्मन्ये द्रुतचतुष्टयेन लघुद्वयं भवति। तालावृत्तिद्वयं चतुर्द्रुतानि विभज्य एकं विश्राम्य तालावृत्तिद्वयं समर्थयन्ति।

अथ यतिः—

लघु द्वन्द्वाद्द्रुतद्वन्द्वं यतिरित्युच्यते वुधैः।
स चात्र द्विबिधा प्रोक्ता शुद्धा सत्रिपुटान्तरा।३६८।

त्रिपुटस्तालविशेषोऽन्तरे पदमध्ये यस्याः। अयं गीतमध्ये न प्रविशति। तत्र शुद्धा यथा—

"जय जय नरकनाशन दुष्टसंचय-विहित-शासन रे"

त्रिपुटान्तरा यथा—

अस्मद्गुरु-कविरत्न-पुरुषोत्तममिश्राणां रामचन्द्रोदय-(रामाभ्युदय) प्रबन्धे—

नौमि कौशिक-यागहिंसक-ताडकासुरनाशकम् ।

त्रिपुटः—

स स्सा रि ग म, रि ग म प ध प म प नि ध नि स्सा सा स्सा सा ।

दण्डकान्तरचारि मुनि परिदेविराक्षस-नाशकम् ।(?)

यतिः—

शारदाम्बुज मञ्जुमुखमखिलामरेश्वरवन्दितम् ।

ता ता आरि कु कु दिमिकि झेंक्गि थोङ्गि नाङ्गिट ता त्ता ता ।

अथ यतिः—

प्रमदभर-परिपूरितान्तर वारिजासनबन्दितम् ।।

अथ निःसारुः—

सविराम द्रुतद्वन्द्वान्निःसारौ तु लघुद्वयम् ।

'कमलाधव केशव मुरहरमामव भववन्दित' रे ।

अत्र षड्लघ्वक्षरोच्चारणकालो मात्रेति केचित् । अत्र द्रुतद्वन्दात् लघुद्वन्दमिति गीतप्रकाशकारः । किन्तु सविरामत्वं द्रुतद्वन्द्वस्य बहु सम्मतम् । अनुभवेनापि तथैवप्रतीयते, तथा सति कुडुकतालेन्यैक्यमिति चेत् लयवशेन भिन्नत्वं बोद्धव्यम् ।

षड्विधस्य निःसारोरयं वैकुन्दनामा निसारूरिति हरिनायकः ।

अथाडुतालः—

षड्विधोऽड्डुस्तत्रशङ्कुशीलौ ख्यातौ ब्रवीमि तौ ।

लघोद्रुतद्वयेन स्यात् शङ्कुः शृङ्गारवीरयोः ।३६६।

शान्ते गीलो विरामान्तद्रुतद्वन्द्वाल्लघुर्मतः ।

यथा—यदुमणे कुरु कृपामयीश्वर सदा । इदं द्वयोरप्युदाहरणम् । किन्तु शीलनामाड्डुतालस्य रूपकेन्यैक्यापातात् लयवशेन भिन्नत्वं ज्ञेयम् । अस्यैवोत्कलेषु दो-आडमान इति प्रसिद्धिः ।

अथ त्रिपुटः—

द्रुतत्रयं (द्वयं) विरामान्तं त्रिपुटः परिकीर्त्तितः ।

यथा—

नील भूधर-नायक त्वयि वसतु मामक-मानसम् ।

अथ रूपकम्—

रूपकन्तु विरामान्तं द्रुतद्वन्दमुदाहृतम् ।४००।

यथा—

नन्दतनय सुन्दरमुख नन्दय हरवन्द्य माम् ।

अथ झम्पकः—

झम्पको लो द्रुतद्वन्द्वात् स विरामादितीतरे ।

यथा—

लक्ष्मीश चक्रधर मां पाहि विबुधवर ।

सविराममेवात्रनुभूयत इति गीतप्रकाशकारः ।

अथ मण्ठकः—

सगणाल्लघवोऽशब्दाश्चत्वारो मण्ठके पुनः ।

अशब्दाः शब्दरहिताः । यथा—

नीलाचल-निलयदेव पाहि विबुधविहित सेव ।

अथैकताली—

द्रुतेनैकेनैकतालो सा त्रिधा परिकीर्त्तिता ।
विपुला चन्द्रिका रामा तत्रापि विपुलोच्यते ।४०१।
ध्रुवमात्रेण भिन्नत्वान्नोक्ते अत्र तथोत्तरे ।
आलाप पूर्विकोद्ग्राहा विपुलानन्ददायिनी ।४०२।

आलापं गीत्वा उद्ग्राहं गायेदित्यर्थः । अतएव एकतालीतः पूर्व-मालापगानमेतन्मूलकमेव ।

'गोवर्द्धनधर मामव मुरहर' ।

मतान्तरे तथोच्येते कुडुकोपाड्डुतालकौ ।
द्रुतद्वन्द्वाल्लयद्वन्द्वं कुडुकः परिकीर्त्तितः ।४०३।

ननु निःसारोर्निविरामपक्षे ऐक्यमापतितमिति चेल्लयवशाद्भिन्नं वेदितव्यम् । यथा—

'नीलाचलधव मामव मामव'.

अस्य प्रायशः क्षुद्रगीतेष्वेव प्रयोगो दृश्यते इति गीतप्रकाशकारः । किं तु 'गीतकौमुद्याम्', धन्नासी प्रबन्धे एष दत्तो वर्त्तते ।

धवलकलेवरमशितनिचोलमित्यादि । अयमेव सरिमान इति लौकिकी प्रसिद्धिरुत्कलेषु, अमुमेव पडितालं कथयन्ति इति गीतप्रकाशकारः । तत्तालनिष्णातैर्विवेचनीयम् ।

उपाङ्गुमाह—

उपाङ्गुताल एकेन द्रुतेन परिकीर्त्तितः ।

यथा— 'नमः कमलनाभ ते' लयवशादेकतालीतो भिन्नः । 'एवं तु नवभिः सूडः क्कचिदेकादशैरपि' अनयोरुदाहरणं संगीतकौमुदीगीतप्रकाशादौ द्रष्टव्यम् । मया तु प्रपञ्चभयान्न लिखितम् ।

तालाः प्रयोगानर्हा ये नोक्ताश्चैकं शतं बुधैः ।
तेप्यत्र तद्विदां प्रीत्यै लिख्यन्ते वीक्ष्य लक्षणैः ।४०४।
चञ्चत्पुटश्चाचपुटः षट्पितापुत्रकस्तथा ।
संपक्वेष्टक उद्घट्ट आदितालश्च दर्पणः ।४०५।
चर्च्चरी सिंहलीलश्च कन्दर्पः सिंहविक्रमः ।
श्रीरङ्गो रङ्गलीलश्च रङ्गतालपरिक्रमः ।४०६।
प्रत्यङ्गो गजलीलश्च त्रिभिन्नो वीरविक्रमः ।
हंसलीलो वर्ण्णलीलो राजचूडामणिस्तथा ।४०७।
रङ्गोद्योतो राजतालः सिंहविक्रीडितस्तथा ।
वनमाली वर्ण्णतालो मिश्रोरङ्गप्रदीपकः ।४०८।
हंसनादः सिंहनादो मल्लिकामोदसंज्ञकः ।
ततः शरभलीलश्च रङ्गाभरण एव च ।४०९।
ततस्तुरगलीलश्च तस्माच्च सिंहनन्दनः ।
जयश्रीर्विजयानन्दः प्रतितालो द्वितीयकः ।४१०।

मकरन्दः कीर्त्तितालो विजयो जयमङ्गलः ।
राजविद्याधरो मण्ठो जयतालः सुदुर्वलः ।४११।
ततो निःसारुकः क्रीडात्रिभङ्गः कोकिलप्रियः ।
श्रीकान्तो विन्दुमाली च समतालिश्च नन्दनः ।४१२।
उद्दीक्षणो मण्ठिकाच ढे(ते)ङ्किका वर्णमण्ठिका ।
अभिनन्दोऽन्तरक्रीडा लघुतालश्च दीपकः ।४१३।
अनङ्गतालो विषमो नान्दीकुन्दमुकुन्दकौ ।
एकताली च कङ्कालश्चतुस्तालश्च खुंखुडिः ।४१४।
अभङ्गो राजझङ्कारस्तथैव लघुशेखरः ।
प्रतापशेखरश्चान्यो गजझम्पश्चतुर्मुखः ।४१५।
झङ्कारः प्रतिमण्ठश्च तथा तालस्तृतीयकः ।
तस्मादुपरि विज्ञेयो वसन्तो ललितः शिवः ।४१६।
करशाखा च षट्तालो वर्द्धनो(वक्षो) वर्ण(यति)स्तथा ।
राजनारायणस्तस्माद्विद्वद्भिः परिकीर्त्तितः ।४१७।
मदनश्चैव विज्ञेयः पार्वतीरोचनस्तथा ।
ततः शारङ्गतालः स्यात्ततः श्रीनन्दिवर्द्धनः ।४१८।
लीलाविलोकितश्चान्यो ललितप्रिय एव च ।
जनकश्चैव लक्ष्मीशो राग (ज) वर्द्धनसंज्ञकः ।४१९।
उत्सवश्चेति तालानामेकेनैवाधिकं शतम् ।
एषामुक्तक्रमेणैव कलाविन्यास उच्यते ।४२०।
चंचत्पुटे च ल्पुतौ च भगौ चाचपुटे स्मृतौ ।
पलगा गलपाश्चैव षट्पितापुत्रके मताः ।४२१।
गत्रयं स्यात् प्लुताद्यन्तं संपक्वेष्टकनामनि ।
ताले गत्रयमुद्घट्टे आदौ तु लघुरेकक: ।४२२।
रासोऽयमुच्यते केश्चिद्दर्पणे दद्वयाद्गुरुः ।
एकान्तरा विरामाढ्यैश्चर्चरी षोडशद्रुतैः ।४२३।
लो दो दौ लः सिंहलीले कन्दर्पे दौ लघूगुरुः ।
गुरुत्रयाल्लपगलप्लुताः स्यात् सिंहविक्रमः ।४२४।

सलौ प्लुतौ च श्रीरङ्गः रङ्गलीले तु लौ गुरू ।
रङ्गताले द्रुतौ गश्च द्वौ द्रुतौ मः परिक्रमे ।४२५।
प्रत्यङ्गसंज्ञके ताले मगणः स्याल्लघुद्वयम् ।
राजलीले विरामान्तं ज्ञेयं लघुचतुष्टयम् ।४२६।
ताले त्रिभिन्ने ...दाः लादौ गो वीरविक्रमे ।
विरामि लौ हंसलीले वर्ण्णलीले तु दौ लगौ ।४२७।
राजचूडामणौ ताले द्रुतौ लश्च द्रुतौ लगौ ।
रङ्गद्योते मालगौ च रङ्गि गौ दौ गुरूलपौ ।४२८।
राज्ञि राजताले . . . .
ललपागो लगौ लश्च सिंहविक्रीडिते लगौ ।
चतुर्द्रुतानि लो दौ च गुरुस्याद्वनमालिनि ।४२९।
वर्ण्णताले गलौ दौ गः मिश्रताले दलौ गपौ ।
रङ्गप्रदीपे तगपाः हंसनादे लगौ दौगः ।४३०।
लतौ गः सिंहनादे स्यात् लौ दौ दौ मल्लिकादिके ।
लश्च दश्च लघू स्यातां ताले शरभलीलके ।४३१।
ताल्लपौ रङ्गाभरणे दौलस्तुरगलीलके ।

अयमेव हयलील उच्यते इति केचित् तन्न ।

हयलीलो विरामान्त-द्रुतद्वन्दाद्द्रुतद्वयम् ।४३२ ।इति।

हरिनायकोक्तेस्तालान्तरम्—

गुरुद्वयं लः प्लुतो लो गुरुर्दौ तः प्लुतो लघुः ।
प्लुतो गुरु लौ निःशब्दाश्चत्वारः सिंहनन्दने ।४३३।
जो लगौ विजयश्रीः विजयानन्दे लघुर्यगौ ।
लौ द्रुतौ प्रतिताले च द्रुतौ लश्च द्वितीयके ।४३४।
मकरन्दे द्रुतद्वन्द्वं कीर्त्तौ लपगलप्लुताः ।
प्लुताद्यन्तो गो विजये ललभा जयमङ्गले ।४३५।
लघुर्गुरुद्रुतौ ताले राजविद्याधराभिधे ।
सगणाल्लघवोऽशब्दाश्चत्वारो मण्ठके पुनः ।४३६।

जयताले तु जगणात् द्वौ लघू द्वौ द्रुतौ प्लुतः ।
सुदुर्वले दौ लघूं च निःसा ौ लाद्विरामौ लः (?) ।४३७।
द्रुताद्विरामिदं क्रीडा त्रिभङ्गिस्तु लघूगुरू ।
कोकिलप्रिये गुरुलपाः श्रीकान्ते तगणो लघुः ।४३८।
चत्वारस्तु द्रुतागुर्वोर्मध्ये स्युर्विन्दुमालिनि ।
समेलौ दौ दं विरामि नन्दने लौ द्रुतौ प्लुतः ।४३९।
उदीक्षणे लौ गुरुश्च मण्ठिका गद्वयात्प्लुतः ।
ढेङ्किका रगणो वर्ण्ण-मण्ठिका। लदलाद्रुतौ ।४४०।
लौ दौ गुरुश्चाभिनन्दे तुरगक्रीडा विरामिदाः ।
लघुताले चतुर्लाःस्युः दौ लौ गौ दीपके स्मृतौ ।४४१।
लघुः प्लुतोऽन्तः सगणो यत्र सोऽनङ्ग ईर्यते ।
विषमेऽष्टौ द्रुता मध्ये प्रान्ते च सविरामकाः ।४४२।
लदौ दलौ गुरुर्नान्दी तालोऽयं भरतोदितः ।
ल चतुष्काद्गुरुः कुन्दे मुकुन्दे लदवा लघ ।४४३।
द्रुते नैके नैकताली कथिता पूर्वसूरिभिः ।
चतुर्विधस्तु कङ्कालः पूर्ण्णःखण्डः समोऽसमः ।४४४।
त्रिद्रुतैर्दलगैः पूर्ण्णः खण्डे दाभ्यां गुरुद्वयम् ।
समे लघुर्गुरुद्वन्दात् विषमे लाद्गुरुद्वयम् ।४४५।
चतुस्ताले दत्रयाल्लौ केचित् गात् द चतुष्टयम् ।
विरामादि विरामान्तं ल चतुष्कं च खुंखुडी ।४४६।
अभङ्गे लप्लुतौ राजझङ्कारे रगणाद् द्रुतौ ।
एकेन सविरामेण लघुना लघुशेखरः ।४४७।
प्लुतात् प्रतापशिखरे विरमान्तं द्रुतद्वयम् ।
गजझम्पे गुरुस्त्वेको विरामान्तं द्रुतत्रयम् ।४४८।
चतुर्मुखाभिधे ताले जगणो लः प्लुतो भवेत् ।
पौ लो गौ लो चतुर्व्योम प्लुतस्तु यगणस्तथा ।४४९।
द्रुतद्वन्द्वं समुद्दिष्टं ताले झङ्कारके वुधैः ।
प्रतिमण्ठे सभगणौ कैश्चिन्माल इतीर्यते ।

स्यात्तृतीयाभिधे ताले विरामान्तं द्रुतत्रयम् ।
वसन्ते नगणान्मः स्यात् ललिते दद्वयाल्लगौ ।४५१।
शिवताले लाद्गुरुश्चै करशाखा चतुर्द्रुताः ।
षड्तालाख्ये बिन्दुषट्कं वर्द्धने दद्वयाल्लपौ ।४५२।
लौ दौ वर्णयतौ राजनारायणे द्रुतौ जगौ ।
द्रुतद्वन्दं लघुश्चैको मदने परिकीर्त्तितः ।४५३।
पार्वतीलोचने दौ द्वौ लददाभजजाः क्रमात् ।
शारङ्गतालः कथितो विरामान्तं चतुर्द्रुतम् ।४५४।
श्रीनन्दीवर्द्धने भात्पः लीलाताले दलप्लुताः ।
विलोकिते लगौ दौपः साल्लगौ ललितप्रिये ।४५५।
जनकाभिधताले स्यान्नयसाश्च प्लुतो गुरुः ।
द्रुतद्वन्दं विरामान्तं लक्ष्मीशो लौ प्लुतस्ततः ।४५६।
विन्दुद्वयं विरामान्तं दप्लुतौ रागवर्द्धने ।
उत्सवः कथितः प्राज्ञैर्लघोः पूर्वं प्लुतो यदि ।४५७।
एवमेकाधिकशतं मुक्तास्ताला मनीषिभिः ।
दामोदरादावेतेषां केषुचिद्दृश्यतेऽन्यथा ।३५८।
ऋषीणां मतवाहुल्याद्विकल्पत्वे च का क्षतिः ।
मया न लिखितास्तेऽत्र ग्रन्थवाहुल्यभीतितः ।४५९।
एषामादिप्रभृतयो ये ख्यातास्ते उदाहृताः ।
य एभ्योऽन्ये पञ्चषाश्च वुधैः सोदाहृतीरिताः ।४६०।
उदाहरणदानाय मयोच्यन्तेऽत्र ते पुनः ।
चञ्चत्पुटः चाचपुटो ढेंकिका वादकाकुलः।४६१।
नलकूवरकः सिंहनन्दनोऽपि निगद्यते ।
तपौ चञ्चत्पुटः प्रोक्तः. . . . ।४६२।
नन्दतनयमिन्दुवदनमञ्जननिभमाश्रये । अयमष्टकलः ।

भगौ चाचपुटे स्मृतौ । यथा—

नील-शिखरि-नाथमहं भावये । अयं षटकलः ।
गुरुर्लघुर्गुरुश्चैव ढेङ्किकाख्यः प्रकीर्त्तितः ।

यथा—

कमलनयन पाहि पाहि मां। अयं पञ्चकलः।

प्लुतौ लघुचतुष्कं च मौलौ द्रुतयुगं लघुः।

निःशब्दं लचतुष्कं च तालोऽयं वादकाकुलः।४६३।

यथा कौमुद्यां—

चन्द्रकचय चारुचूलमुत्पलशुभकर्णमूल-

मम्बुजनिभनयनयुग्मराजितम्।

निर्जितशशि तिलकुसुमप्रतिमनासिकान्वितं केशव

तववदनमिदं भावयेऽहमहर्निशम्। त्रिंशत्कलोऽयम्।

चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि।

लघ्वक्षराणि चत्वारि तालोऽयं नलकूवरः।४६४।

यथा तत्रैव—

पीताम्वरमिन्दीवर-सुन्दरतर-रोचिषम्।

गोपीजननयनवन्धनालयं जितरतिपतिरूपभुवनमोहनम्।

नमत नन्दनन्दनम्। अयं चतुर्विंशत् कलः।

सिंहनन्दनलक्षणं प्रकाशे—

गौ लपौ लगुरू दौ च गौ लपौ लपगा लघू।

निःशब्दं लचतुष्कं च ताले स्यात् सिंहनन्दने।४६५।

यथा कौमुद्याम्—

दधतं तं मुखशशिनं कुटिलकुन्तलावृतम्।

सरसिजमिव परिभ्रमभ्रमरराजि-विराजितम्।

सजलजलदकान्तिकाय कामकोटिनिन्दनम्।

भवजनता भय (व) च्छिदे भूमितनयसूदनम्।४६६।

अयं द्वात्रिंशत्तालः। एषु त्रिषु तालेषु वहुकलत्वात्-रञ्जकत्वापेक्षया तिसृभिरावृत्तिभिरुद्ग्राहादित्रयं कल्पनीयम्। चर्च्चितमेवाधस्तादिदं तालावृत्तिकथनप्रसङ्गे। उदाहरणं गीतप्रकाशे, मल्लाररागेण—

सुरभिसमयदिवसमेतं वीक्षितुमतिदुर्वला।

मुञ्चतिमुहुरम्बुनिवहमीक्षणभवमाकुला।

इन्दीन्दिर-निकररवाकर्णनमनुकम्पिता ।
कोकलकुलकाकलीभिरहह मोहमागता ।

उद्ग्राहः—

कठिनकृष्णकलय रे कामकदनवीथिका
विषमविरहविलुलिततनुर्बहु विलपति राधिका ।
चन्दनवनमारुतेन मन्दमन्दमागतम्
देहदाहमधिकमवति किं च हन्ति सन्ततम् ।

ध्रुवः—

किं च किरति कालकूटकलितकिरण-संचयम् ।
विधुरयुवति-मरणहेतुरजनि—रजनिपतिरयम् ।

आभोगः—

श्रृणुत कर्ण्णकुतुककारि कृष्णदास विरचनम् ।
गजपतिनृप हृदयहारि चार्व्सिहनन्दनम् ।४६७।

एषामप्रसिद्धत्वात् प्रसिद्धलक्षणोदाहरणानि उपन्यस्तानि । अस्मद्गुरुकविरत्नमिश्राणां प्रसिद्धतालसंग्राहकौ श्लोकौ भवतः । यथा—

लश्चादौ ललदौ यतौ द्रुतयुगाल्लोझम्पके दत्रयं
सारामं त्रिपुटे विरामि दयुगं रूपेतु मण्ठे गुरुः ।
निःसारौ सविराम-द-द्वय-लघू सारामदौ लोऽड्डुके
देनोपाड्डुमथैकताल्यपि च दं दौ लौ कुड्डुक्केऽपि च ।४६८।
रो ढेङ्कूयां गुरु सौ च चाचपुटके चञ्चत्पुटाख्ये तपौ
मोगः पः (पाः) पलनाधनेशतनये मण्ठेऽस्वनौ साम्नलौ ।
आदौ पौ नयमाभदौ द्रुतलघू नौमस्वनौ (चास्वनौ) काकुले
सिहेतः पलगा द्रुतौ तपलपाभोनौ लयुक् चास्वनः ।४६९।

अथ क्षुद्रगीतमाह—

तालधातुयुतं वाक्यमात्रं क्षुद्रमितीर्यते ।
बाहुल्येनेष्यते ह्यत्र ध्रुवमण्ठादिलक्षणम् ।४७०।

न खण्डाक्षरमात्रादिबन्धोऽपि परिगण्यते। किं च—

'आदिनिःसारुमण्ठैश्च वर्जितं क्षुद्रगीतकम्' इति सङ्गीतसारे गीतप्रकाशेऽपि दृश्यते, तत्र मूलं न पश्यामः।

सर्वो योज्येऽप्यनुप्रासस्तेष्वन्त्यस्यैव निश्चयः।

अन्त्यस्यान्त्यानुप्रासस्य, तदुक्तम्—

पञ्झटिकायां विरुदावल्यां क्षुद्रगीतादौ अन्त्यानुपासोऽयं निवेशनीयो विशेषज्ञैरिति।

स च यथा—दर्पणे—

व्यञ्जनं चेद्यथावस्थं पूर्वस्वरसमन्वितम्।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास उच्यते।४७१।
प्रबन्धादौ शुद्धगीते बाहुल्येनास्य संस्थितिः।

अस्यान्त्यानुप्रासस्य। एतेन शुद्धसालगयोरेवाक्षरमात्रानिर्णय इत्युक्तं भवति। क्षुद्रगीतस्य भेदानाह—

तच्चतुर्विधमेव स्यात्तत्र चित्रपदा क्रमात्।
चित्रकला ध्रुवपदा पाञ्चालीति प्रभेदतः।४७२।

अथ चित्रपदामाह—

केवलं पदमात्रेण वैचित्र्यं यत्र दृश्यते।
न धात्वादौ विचित्रत्वं ज्ञेया चित्रपदेति सा।४७३।

पदे वैचित्र्यं तु अकठोरानप्रासप्रसादादिगुणयुक्तत्वम्।

उदाहरणं गुण्डकेरी रागेण—

कलयति नयनं दिशि दिशि वनितं
पङ्कजमिवमृदुमारुतचलितम्।
केलिसदनं प्रविशति राधा,
प्रतिपदसमुदितमनसिजवाधा।

ध्रुवः—

जनयतु रुद्रगजेशमुदितं रामानन्दरायकविगदितम्।४७४।

ध्रुवे सममात्रिकत्वात् मण्ठलक्षणयोगेन नेदं सालगगीतम् । तत्र हि ध्रुवे तु द्विगुणः सार्द्धैकगुणो वा स मण्ठक इति लक्षणात् ।

अथ चित्रकलामाह—

उद्ग्राहाभोगयोर्मात्रा समान्यूना ध्रुवे यदि ।
त्र्याद्यष्टाविधपादाढ्या ज्ञेया चित्रकला हि सा ।४७५।

त्रिपदा चतुष्पदा यावदष्टपदा चित्रकलाया भेदाः । यथा—

गीतगोविन्दे—गुज्जरीरागेण—

हरिरभिसरति वहति मधुपवने
किमपरमधिकसुखं सखि भवने ।
माधवे मा कुरु मानिनि मानमये ! । ध्रुवः

इत्याद्यनन्तरम्—

श्रीजयदेवकवेरिदमुदितं
सुखयतु सुजनजनं हरिचरितम् ।

आभोगः—

अत्र गीतप्रकाशकारेण गीतमुदाहृतम् । मल्लाररागेण—

अनारतविषयोपभुजो मम दिनानीश गतानि वृथा ।
मनागपि न स्मरति मनो मे जनार्दन तव चरणकथा ।

उद्ग्राहः—

का गतिरच्युत मे, आगतमन्तकभयमत्युग्रम् ।

ध्रुवः—

दैवी तव माया दनुजान्तक देव तया मोहितहृदयम्
पावय दासं परमपदाधिप श्रीवरधर्मपुरुष सदा ।

आभोगः—अत्र उद्ग्राहाभोगयोरसममात्रिकत्वात् कथं चित्रकला-भवितुमर्हतीति विचार्यमभियुक्तैः । किं च—क्षुद्रगीतानामन्त्यानुप्रासस्यावश्यकतया कथं वा तल्लक्षणमनुगतं स्यादितिसन्दिहानै-रेवावसितमस्माभिः ।

अथ ध्रुवपदामाह—

ध्रुवं गीत्वा भिन्नधातुर्यत्राभोगस्तु गीयते ।
उक्तयोर्लक्षणयुता सैका ध्रुवपदा मता ।
भिन्नधातुभिरुद्ग्राह ध्रुवाभोगैः परा द्विधा ।४७६।

ध्रुवपदा द्विधेति सम्बन्धः । उक्तयोश्चित्रकलाचित्रपदयोः । तत्रैका ध्रुवेणाभोगेन च पदद्वयवती । ध्रुवगानानन्तरमेवाभोगगानमिति तात्पर्य्यम् । भिन्नधात्विति धातुरत्र तालविशेष इति गीतप्रकाशे—एकस्मिन्भागे भङ्ग्या अन्यथागानमिति, केचित् । अत्र प्रथमाया उदाहरणमस्मद्गुरूणां कविरत्नमिश्राणाम् ।

मारवीरागेण रूपकतालेन—

ध्रुवः—

सुजन वद मुररिपु नाम,
दुष्कृतमपहाय याहि दुर्लभहरिधाम ।

आभोगः—

पुत्रमित्रवान्धवगणमिह न कलय सत्यम् ।
पुरुषोत्तममिश्रगदितमनुभावय नित्यम् ।

इमामेव पाश्चात्यभाषायां छुटि(?) किलेति वदन्ति । परा अन्या ध्रुवपदेत्यर्थः । इयमुद्ग्राहध्रुवाभोगरूपेण पदत्रयवती । अत्रोदाहरणं मम गुज्जरीरागेणादितालेन ।

उद्ग्राहः—

माधव परमपुरुष सुरनायक दशरथनन्दन धृतधरणे ।
मधुसूदन नरकासुरनाशन कमलालय भवभय-तरणे ।

ध्रुवः—

जय जय जनकसुताधव राघव पीताम्वर गिरिधर नृहरे ।
नन्दतनय गरुडध्वज मनसिजतात विजयसख कृष्ण हरे ।

आभोगः—

रथ-चरणायुध कमठ गदाग्रज दीनपतित जय जनित विधे
नारायणनृपगजपतिमीश्वर पाहि कृपालय लोकनिधे ।४७७।

आसामन्योन्यसाङ्कर्याद्भेदा बहुतरा मताः ।
ग्रन्थबाहुल्यभीतेन मया ते नेह वर्णिताः ।
तत्र चेदाग्रहो गीतगोविन्दे बहु वीक्ष्यताम् ।
मया दिङ्मात्रमत्रापि बोधाय समुदीर्यते ।४७८।

कामोदीरागेण, कुडुकतालेन—

ध्रुवः—

आननमिदमरुणं तव सुन्दरि कथमिवहाटकगौरम् ।
अभिनवमिहिरकिरण-चय-चुम्बितकनकजलजरुचिचौरम् ।
राधे, न कुरु मनो मयि परुषं
त्यज सखि विफलरुषम् ।
मध्यममिदमधुना तव विधुमुखि निकटीभवदुरुभङ्गम् ।
मन्दरगिरिवर वन्धुरकुचभर भूरितराहितसङ्गम् ।
दारुणमणिधरणीं किमु पश्यसि दूरीकृतवरहासम् ।
चंचलयालिदृगञ्चलमाननमञ्चय मुञ्च न हासं
आज्ञापयतु करोमि पदं तव लोतकमपि विनयेऽहम् ।
नारायणगजपतिकृतिरुदयति गीतमुदारतरेयम् ।४७९।

अथ पाञ्चालीमाह—

अति विस्तारपदता पञ्च प्रोक्ता मनीषिभिः ।
सा यत्रा स्तौति सा प्रोक्ता पाञ्चाली भरतादिभिः ।४८०।

इति हरिनायकेनास्य निर्वचनं कृतम् ।

पाञ्चाली बहुभिः पादैः द्विविधा सा ध्रुवाऽध्रुवा ।

ध्रुवसहिता ध्रुवरहिता च । उदाहरणे सुलभम् । अस्या गौडे पाञ्चालीति प्रसिद्धिः ।

एवं भाषान्तरे ज्ञेयं गीतं गीतविशारदैः ।

तदुक्तं—

दिव्यं च मानुषं चैव गीतं स्याद्दिव्यमानुषम् ।४८१।
दिव्यं संस्कृतसम्पन्नं मानुषं प्राकृतोत्थितम् ।
संस्कृतं प्राकृतोत्थं च दिव्यमानुषमुच्यते ।४८२।

केचिद्देशविशेषोत्थभाषया मानुषं विदुः।
अङ्गवङ्गकलिङ्गाद्या देशभाषादिहेतवः ।४८३।
येषु येषु च देशेषु या भाषाः छेकवल्लभाः।
तास्तु तत्तज्जनालापादाहृत्य प्रतियोजयेत् ।४८४।

कोहलीये तु कश्चन विशेष उक्तः, स यथा—

सममर्द्धसमं चेति विषमं गीतकं त्रिधा।
पदैः समानमात्रैस्तु चतुर्भिः सम उच्यते ।४८५।
तृतीयप्रथमौ पादौ समौ तु द्वे चतुर्थकौ।
जायते यस्य गीतस्य तदर्द्धसममीरितम् ।४८६।
चत्वारोऽपि पृथक्पादा यस्य मात्रानुसंख्यया।
तद्गीतं विषमं प्राहुर्मुनयो भरतादयः ।४८७।

इदं सङ्करगीतविषयमिव प्रतिभाति। अपरेऽपि विशेषा हरिनायकादिभिः लिखिताः सन्ति, मया तु ते नातिप्रयोजनत्वादुपेक्षिताः।

अथ गीतगुणाः—

गीतस्याथ गुणाग्रहोलययतिर्मानस्य वैचित्र्यकं
स्याद्धातोः पुनरुक्तता नवनवं तं चेति नैकार्थता।
मातौ रागसुरम्यताऽथ गमकस्यार्थस्य नैर्मल्यकं
तेन्नानां स्वरपाटयोश्च विविधाकारेण संयोजनम् ।४८८।

किं च—

एषु सर्वेष्वपि गुणेष्वावश्यकतमं त्विदम्।
गुणालङ्काररसवद् वाक्यस्य ग्रहणं तु यत्।

अथ ग्रहमाह—

तालो गीतगतेः साम्यकारी तस्य ग्रहास्त्रयः।
अनागतसमातीत-संज्ञाः सर्वत्र ते मताः ।४८९।

अनागतमाह—

गीतारम्भाद्यदा पूर्वं समुच्चार्याक्षरद्वयम्।
तालस्य न्यसनादुक्तस्तदैवानागतो ग्रहः ।४९०।

अत्र गीतादौ यदक्षरमधिकं गृह्यते तदनागतम् । तालाभ्यन्तरे कदापि न प्रविष्टम् । यथा—

'जय जय कमलाकुचचन्दनमण्डनवक्षःस्थलदुर्जनखण्डन
षण्ढासन-दण्डन-पण्डित पुण्डरीक-लोचनु आ ।

अत्र निःसारिताले जय जयेत्यक्षरचतुष्टयं तालवाह्यमेव । कमलेत्यारभ्य तालः पठति । सममाह—

गीतोच्चारणमात्रेण यदा तालस्य संगतिः ।
तदा समग्रहः प्रोक्तः समकालसमुद्भवात् ।४६१।

यथोदाहृतानि मण्ठादौ ।

अथातीतमाह—

कला या तु पतिष्यन्ति पश्चात् सा प्रथमे यदि ।
विन्यस्य गीयते तालस्तदातीतग्रहः स्मृतः ।४६२।

लक्षणमतिक्रम्य गृह्यत इत्यत्र ग्रहः । यथा गीतगोविन्दे—

'शिशिरशीतलमञ्जुवञ्जुलमृदुलविषचयसंकुलं' इत्यादि यतितालेन गीयते । अत्र हि प्रथमं लघुद्वयं, पश्चाद्द्रुतद्वयं, अत्र प्रथमं द्रुतद्व पतति, प्रान्ते लघुद्वयमेव ।

एवं सर्वेषु तालेषु त्रिविधो ग्रह ईष्यते ।
केचित्तु केषुचित्ताल-विशेषेषूचिरे ग्रहम् ।४६३।

यथा संगीतसारे—कुडुक्कादि तालेष्वतीतग्रहःस्यात्तथैवात्र यत्यादिकेऽनागतश्च । समाख्योऽपि निःसारुकतालादौ च केचित्तथानागतातीतयो वैपरित्यम् । अनागतातीतयो वैपरीत्यं तु अनागतग्रहे अतीतग्रहलक्षणमतीतग्रहे अनागतग्रहलक्षणमाहुरित्यर्थः ।

उक्तं च—

अतीताक्षरसंयुक्तस्तालः संन्यस्यते यदि ।
तदातीतग्रहः प्रोक्त इति . . . . . ।४६४।

अथ लयः—

गीत वाद्य-पदन्यास-क्रियाणां समता मिथः ।
तथा क्रियाकालयोर्वा लय इत्युच्यते वुधैः ।४६५।
इति वाचस्पतिः ।

हरिनायकस्तु—

क्रियान्तरेण विश्रान्तिलय इत्यभिधीयते ।
स त्रिधा कथितः प्राज्ञैर्द्रुतो मध्यो विलम्वितः ।४९६।
एकमात्रो द्रुतो मध्ये विश्रान्तिर्द्विगुणात् द्रुतात् ।
विलम्वितस्तु द्विगुणः सर्वेऽमी सर्वतालगाः ।४९७।

केचित्तु—

त्रिपुटोपाड्डमण्ठैकतालीझम्पासु च द्रुतः ।
आदौ कुडुकनिःसारौ लयोमध्येऽभिधीयते ।४९८।
रूपके चाड्डताले च यतौ ज्ञेयो विलम्वितः ।

इत्याहुः—किन्तु सर्वगतित्वमेव साधीयः प्रतिभाति । लयस्य तालविशेषरूपत्वाद् वक्ष्यमाणस्रोतोवहादि-लक्षणयोगाच्च । यतिमाह—

लयप्रवर्तनस्यैव नियमोऽसौ यतिर्भवेत् ।
स्रोतोवहा समा गोपुच्छिकेति त्रिविधैव सा ।४९९।

स्रोतोवहामाह—

आदिमध्यावसानेषु क्रमेण यदि गीयते ।
चिरमध्यद्रुतलया तदा स्रोतोवहा मता ।५००।

आदौ बिलम्बितलया मध्ये मध्यलयो प्रान्ते द्रुतलयेत्यर्थः ।

समामाह—

आदिमध्यावसानेषु लयैकत्वे समा स्मृता ।

गोपुच्छिकामाह—

लयैर्गोपुच्छिका प्रोक्ता द्रुतमध्यविलम्वितैः ।५०१।

आदौ द्रुता, मध्ये मध्या, अन्ते विलम्वितेति क्रमः ।

मानमाह—

विश्रान्तिकारिणीकालक्रियामानमिहोच्यते ।
तालविश्रामकारित्वान्मानं ताल समाप्तिकृत् ।५०२।
तच्चेद् ध्रुवे द्वितीयायां कलायां निपतेत्तदा ।
आवर्त्तो वर्द्धमानाख्यस्ताले तालज्ञसम्मतः ।५०३।

मानं ध्रुवे त्वन्तिमायां कलायां निपतेद्यदा ।
आवर्त्तोहीयमानाख्यस्तदा प्रोक्तो मनीषिभिः ।५०४।

हीयमानावर्त्तस्य उत्कलभाषायां टाङ्कमान(?)इति प्रसिद्धिः । अनयोरुदाहरणं गीतप्रकाशेऽनुसरणीयम् । अस्य वैचित्र्यं प्रकरणानुरोधेन द्रुतमध्यविलम्बितानुसरणम् । अथ धातोः पुनरुक्तता । गीतावयवस्य पुनःपुनर्गानम् । नवनवत्वं च वारं वारं गीयमानमपि रञ्जनातिरेकेण नवनवमिव प्रतीयमानत्वम् । मातोर्वाक्यस्यनैकार्थता । एकार्थं वाक्यभङ्ग्यन्तरेण न प्रयोज्यमित्यर्थः । धातुमातुलक्षणमुक्तम् । रागसुरम्यतामाह—

कर्णप्रियं यतिस्थं स्याद्भङ्गियुक्तं सुखावहम् ।
मन्द्र मध्यमताराढ्यं रागरम्यत्वमीरितम् ।५०५।

गमकमाह—

स्वरस्य कम्पो गमकः श्रोतृचित्तसुखावहः ।
तस्य प्रभेदास्तिरपः स्फुरितः कम्पितस्तथा ।५०६।
लीनआन्दोलितवली त्रिभिन्नकुरलाहताः । (?)
उन्नामितः प्लावितश्च हूंकृतो मुद्रितस्तथा ।५०७।
यमितो मिश्रितः पञ्च दशेति परिकीर्त्तिताः ।

एषां लक्षणमाह—

लघिष्ठडमरुध्वान कम्पानुकृतिसुन्दरः ।
द्रुततुर्यांशवेगेन तिरिपः परिकीर्त्तितः ।५०८।
वेगे द्रुततुरीयांशनिर्मिते स्फुरितो मतः ।
द्रुतार्द्धमानवेगेन कम्पितं गमकं विदुः ।५०९।
लीनस्तु द्रुतवेगेनान्दोलितो लघुवेगतः ।
वलिर्विविधवक्रत्वयुक्तोवेगवशाद्भवेत् ।५१०।
त्रिभिन्नस्तु त्रिषु स्थानेष्वविश्रान्तघनस्वरः ।
कुर (रु) लीर्वलिरेवस्याद्ग्रन्थिलः कण्ठकोमलः ।५११।
स्वरमग्रिममाहत्य निवृत्तस्त्वाहतो मतः ।
उन्नामितः स तु प्रोक्तो यः स्वरानुत्तरोत्तरान् ।५१२।

क्रमाद्गच्छेत् प्लावितस्तु ; प्लुतगानेन कम्पनम् ।
हृदयङ्गमहूंकारः गम्भीरो हूंकृतो मतः ।४१३।
मुखमुद्रण-संभूतो मुद्रितो गमको भवेत् ।
स्वराणां नमनादुक्तो नामितो ध्वनिवेदिभिः ।५१४।
एतेषां मिलनान्मिश्रस्तस्यस्युर्भूरयो भिदाः ।
नोक्ताः प्रयोगानर्हत्वादज्ञेयत्वाच्च ते मया ।५१५।

एतदभ्यासप्रकारस्तु—

माघ-पौष-निशायान्तु शेषप्रहरमात्रके ।
साधकः सलिले स्थित्वा गमकान् साधयेत्सुधीः ।५१६।

केचित्तु—

स्वरस्य कम्पो गमकः स्वरभेदात् स सप्तधा । इति ।

सप्तस्वरभेदेन सप्तप्रकारो भवतीत्यर्थः । इदं तु नारदसंहितायां दृष्टम् ।

अथार्थनैमल्यम् ।

उच्चारणेन वाक्यस्य सम्यगर्थाववोधनम् ।
सुखतादोषरसयुगर्थनैर्मल्यमेव तत् ।५१७।
तेन्नपाटस्वराणां च वैचित्र्येण निवेशनम् ।
पाटस्वरान्ते तेन्नस्य प्रयोगो नादितः क्वचित् ५१८।

कविसंप्रदायेन स्वरपाटानन्तरमेव तेन्नस्य प्रयोगो न प्रबन्धादावित्यर्थः

किं च—

प्रस्तारनष्टोद्दिष्टादि वर्ग-ग्रह-गणांशकाः ।
प्रकृतानुपयोगित्वान्न ते ग्रन्थे मयोदिताः ।५१९।
गणाद्यभावे ये दोषा उक्तास्तेषामनित्यता ।
नित्यदोषा वुधैरुक्ता य उच्यन्तेऽत्र ते मया ।५२०।

यथा—

तालहीने कायरोगो धातुहीने धनक्षयः ।
धातुमातुपदं यत्र नास्ति तद्गीतकं रिपुः ।५२१।

अथ गीतदोषानाह—

गीतेषु दोषाः स्खलनादि वाण्याः
तालांघ्रिभावेन निबन्धनं च ।
स्याद्धातुमात्वादिहृतिः कटूक्तिः
रसादिहानिः श्रवणाप्रियत्वम् ।५२२।
इत्यादि दोषा गीतेषु बहवो यदि सन्त्यपि ।
नोक्तास्ते चेद्ग्रहस्तेषां ज्ञाने तत्तद्विलोक्यताम् ।५२३।

यद्यपि हरिनायकेन—

गीते दीर्घो भवेद्ह्रस्वो ह्रस्वो दीर्घः क्वचित् क्वचित् ।
एकत्वे च क्वचिद्द्वित्वं द्वित्वे चैकत्वमेव च ।५२४।
श्लिष्टे विश्लिष्टता क्वापि क्वचिद्रेफस्य वैकृतम् ।
क्वचित्कोमलता गाढे गाढता कोमले क्वचित् ।५२५।

इत्याद्यविशेषणोक्तं तथापि भाषागीतविषयमेवेदम् ।
तदुक्तं गीतप्रकाशदामोदरयोः—

पौनरुक्त्यं न भाषाढ्ये गीते दोषोऽभिजायते ।
शीघ्रोच्चारे च वर्णानां तथा चैव प्रसारणे ।५२६।
लिङ्गान्यत्वे विसन्धौ च संयुक्ताक्षरमोक्षणे ।
असंयुक्तेऽपि संयोगे ह्रस्वदीर्घव्यतिक्रमे ।५२७।
भवन्त्येते च दोषाय संस्कृते प्राकृते तु न ।
वारद्वयाधिकं गीते पौनरुक्त्यं तु दोषभाक् ।५२८।

संगीतसारेऽप्येवमेवोक्तम् । संस्कृत-प्राकृतयोस्तु लक्षणहीनत्वं दोष एव । दुष्टपदत्वं-श्रुतिकटुत्वमित्यादि दोषाः काव्यप्रकाशादिभ्यो ज्ञातव्याः । नाद्रकवणिजो वहित्रचिन्तया प्रयोजनामात नास्माभिः लिखिताः ।

गायकलक्षणमाह—

गायकस्तु त्रिधा प्रोक्त उत्तमो मध्यमोऽधमः ।
मृष्टध्वनिः सुशारीरो नानारागप्रभेदवित् ।५२९।

ग्रहमानलयोपेतस्तालज्ञो विजितश्रमः ।
त्रिस्थानस्पर्शगमकेष्वनायासलसद्गतिः ।५३०।
प्रबन्धगानकुशलः सावधानः क्रियापरः ।
आयत्तकण्ठः स्थायिज्ञो निर्दोषो धारणान्वितः ।५३१।
उत्तमो मध्यमः प्रोक्तो गुणैः कतिपयैरितः ।
गुणयुक्तोऽपि दोषाढ्यो यस्तु सोऽधम उच्यते ।५३१।

सोऽपि पञ्चधा—तदुक्तम्—

शिक्षाकारोऽनुकारश्च रसिको रञ्जकस्तथा ।
भावज्ञश्चेति गीतज्ञाः पञ्चधा गायकं जगुः ।५३२।
अन्यूनगायने (शिक्षणे) दक्षः शिक्षाकारो मतः सताम् ।
अनुकार इति प्रोक्तः परभङ्ग्यनुकारकः ।५३३।
रसाविशिष्टो रसिको रञ्जकः श्रोतृरञ्जकः ।
गीतस्यातिशयाधानाद्भावुकः परिकीर्त्तितः ।५३४।
एकलो यमलो वृन्दो गायकश्चेति स त्रिधा ।
एक एव तु यो गायेदसावेकल-गायकः ।
स द्वितीयस्तु यमलः स वृन्दो वृन्द-गायकः ।५३५।

गायकदोषमाह—

भीतोऽव्यक्तपदः शिरोविचलितः फुत्कारको विस्वरः ।
स्यात् सन्दष्टरदो निमीलनयनो ग्रामाव्यवस्थस्तथा ।
गायन् वक्रतलः स्वरालपवहुलः स्याद्रागसंमिश्रकः ।
कम्प्राङ्गोऽनवधानको विरसकृत् काकस्वरः सत्वरः ।५३६।

क च—

वितालको गीततनुः प्रसारकः
करालकः च्छागगलोऽव्यवस्थितः ।
उत्फुल्लगण्डस्त्वनुनासिकः स्या-
देवं हि दुष्टः किल गायकः स्यात् ।५३७।
सन्त्यन्ये बहवो दोषा नोक्ता विस्तरशङ्कया ।
ग्रन्थान्तरेभ्यस्ते ज्ञेया अनुक्तागुणदोषकाः ।५३८।

अथ वाग्गेयलक्षणम्—

वाङ्मातुरुच्यते गेयं धातुरित्यभिधीयते ।
वाच्चं गेयं च कुरुते यः "स' वाग्गेय-कारकः ।५३९।
व्याकारकाव्यालंकाराशेष-कोष-विचक्षणः ।
स्मृत्यागमपुराणादि छन्दशास्त्रप्रभेदवित् ।५४०।
अशेषदेशभाषाज्ञः सर्वप्राकृत - कोविदः ।
नीतिशास्त्र-कलाशास्त्र-शिक्षाशास्त्रविशारदः ।५४१।
नानाधातु-विवेकज्ञो लयतानादितत्त्वबित् ।
द्रुतगीतविनिर्माता प्रबन्धकरणे कृती ।५४२।
त्रिस्थानगमकाभिज्ञो विविधालप्तितत्त्ववित् ।
सावधानश्च सर्वत्र श्रेष्ठोवाग्गेयकारकः ।५४३।
प्रवन्धकरणाशक्तो मध्यमो धातुमातुकृत् ।
धातुष्वन्यकृतेष्वेव तालमातुप्रदोऽधमः ।५४४।

अयमेव वयकार (?) इत्युच्यते । आलप्तेर्द्वैविध्यं कोहले—

रागालपनमालप्तिः प्रकटीकरणं तथा ।
सा द्विधा कथिता राग-रूपकादिविशेषतः ।५४५।

रागालप्तीरूपकालप्तिश्चोत । अनयोरपि बह्वो भेदार्दुज्ञेय-त्वादनतिप्रयोजनत्वाच्चोपेक्षिताः ।

यथामति मया ग्रन्थात् पुराणाच्चाधुनातनात् ।
यद्देशरीतेश्चालेखि शोध्यं गीत-वुधैस्तु तत् ।५४६।

इति श्रीमन्निखिलान्ववायोत्तुङ्गचोडगङ्गवंशावतंसाशेषगुणसद्मपद्मनाभ-भूमपतितनुजन्मनः महाराजाधिराजस्य साहित्यसङ्गीतार्णव-कर्ण्णधारकमणेः गजपतिवीरश्रीनारायणदेवस्य कृतौ संगीतनारायणे गीतनिर्ण्णयो नाम प्रथमः परिच्छेदः ।

द्वितीय-परिच्छेदः

अथ क्रमप्राप्तं वाद्यमाह्—

न वाद्येन विना यस्माद्गीतं तालं च शोभते।
तस्मान्माङ्गल्यमस्माभिर्वाद्यमत्र निगद्यते ।१।
ततमानद्धशुषिरघनानीति चतुर्विधम् ।
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।२।
वंश्यादिकं तु शुषिरं कांस्य-तालादिकं घनम् ।

तत्र ततं यथा दामोदरे—

आलावणी ब्रह्मवीणा किन्नरी लघुकिन्नरी ।
विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया ।३।
हस्तिका कुब्जिका कूर्मा (र्मी) सारङ्गी परिवादिनी ।
त्रिसरी शततन्त्री (चन्द्री) च नकुलौष्ठी च तंसरी ।४।
औदुम्वरी पिनाकी च निबद्धः पुष्कलस्तथा ।
गदावारणहस्तश्च रुद्रोऽथ स्वरमण्डलः ।५।
कपिलासो मधुस्यन्दी घोणे(षे)त्यादि ततं भवेत् ।
सिद्धैषां घटना लोके पारम्पर्योपदेशतः ।६।
तथापि वक्ष्ये द्वित्राणां लक्षणं ग्रन्थभीतितः ।

अलावणी यथा—

कनिष्ठिका परिस्प(स्य)र्धमध्यच्छिद्रेण संयुतः ।
दशमुष्टिमितो दण्डः खादिरो वैणवोऽथवा ।७।
अधः करभवानूर्ध्वे छत्रावल्ल्याभिशोभितः ।
नवाङ्गुलादधच्छिद्रो परिचन्द्रर्धसन्निभाम् ।८।
निवेश्य तुम्विकां तत्रालावुखण्डं निवेशयेत् ।
द्वादशाङ्गुलविस्तारं दृढ पर्व-मनोहरम् ।९।

तुम्बिका-वेध-मध्येन दण्डछिद्रेणनिर्मिताम् ।
अलावूमध्यगां डोरीं कृत्वा स्वल्पां च काष्ठिकाम् ।१०।
तथा संवेष्टय तन्मर्ध्ये काष्ठिकां भ्रामयेत्ततः ।
यथा स्यान्निश्चलालावूवन्धश्च करभोपरि ।११।
पञ्चाङ्गुलानि संत्यज्यालावूं स्वल्पां च वन्धयेत् ।
केणान्तर्निर्मिता पट्टमयी सूत्रकृताऽथवा ।१२।
समा श्लक्ष्णा दृढा तत्र देया तन्त्रीविचक्षणैः ।
तारे मन्द्रे च घोरे च त्रिस्थाने बिन्दुरिष्यते ।१३।
बिन्दुना समुपेतं तु तुम्वीं निक्षिप्य वक्षसि ।
मध्यमानामिकाभ्यां च वाद्या दक्षिणपाणिना ।१४।
तुम्वीमलं समुत्पत्य वामाङ्गुष्ठेन धारयेत् ।
ततस्ताभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते ।१५।
त्रिस्वरो दक्षिणः पाणिर्वामसूत्रचतुःस्वराः ।
अलावण्यां स्थिता ज्ञेयाः सप्त षड्जादयः स्वराः ।१६।
इयं चालावणी प्रोक्ता मनः श्रवण-रञ्जनी ।
प्रत्यक्षा सारदा-देवी वीणारूपेण संस्थिता ।१७।

इत्यलावणी

अथ कच्छपी—

अपरा कच्छपी वीणा सैव रूपवती क्वचित् ।

इयमेव रूपवतीत्युच्यते इत्यर्थः ।

अष्टादशाङ्गुलं दैर्घ्यं शिरस्तस्याः प्रकीर्त्तितम् ।
चतुर्द्दशाङ्गुलं सार्द्धं प्रशस्तं च भवेच्छिरः ।१८।
गलं पञ्चाङ्गुलं प्राहुः पाशस्त्ये तत्र तद्विदः ।
कच्छपस्यैव तत्पृष्ठं क्रमतश्चोन्नतानतम् ।१९।
दशिकाद्व्यङ्गुला सार्द्धा शिरोमध्यस्थिता मता ।
किञ्चिन्निम्ना सुवलिता पञ्चरन्ध्रसमन्विता ।२०।
क्रोडभित्तिः शिरोगर्त्ते निर्मातव्या निजोपमा ।
गलान्ते कर्ण्णिका च स्याद्दशाङ्गुलमिता मता ।२१।

अर्द्धचन्द्राकृतिः सा तु वलिता पृष्ठदेशतः ।
दण्डात् षडङ्गुलोच्चा स्याद्दण्डोऽङ्गुलिदशद्वयः ।२२।
एकाङ्गुलाधिको मूले क्रमात्स्थूलोऽग्रतः कृशः ।
विधाय शून्यं तद्गर्भं पिधानं तत्र दापयेत् ।२३।
त्रयोदशाङ्गुलमितो दण्डपुच्छस्तु दीर्घतः ।
तत्र सप्ताङ्गुलं दैर्घ्यमुन्नतं च षडङ्गुलम् ।२४।
सारीगृहमिति प्रोक्तं त्रिश्रेणी कलितं च तत् ।
तत्पश्चात् पुच्छ इत्युक्तः षडङ्गुलश्च दैर्घ्यभाक् ।२५।
मत्स्यपुच्छाकृतिर्वक्रो नाना सुभरणान्वितः ।
मोटन्यः पञ्च कर्तव्यास्ताश्च स्युः सारिकाभिधाः ।२६।
तासां विलत्रयं कार्यं दक्षिणे वामतो द्वयम् ।
दण्डान्ते कलिका न्यास्या तन्त्रीणां तत्र संस्थितिः ।२६।
शिरोगर्त्तः पिधातव्यश्चर्मणा कोमलेन च ।
पित्तलेनातिशुभ्रेण तस्योपरि निवेशयेत् ।२८।
अङ्गुलोच्चां मकरिकां पञ्चरेखान्वितां पुनः ।
दशारन्ध्रेषु पञ्चाथ पट्टसूत्रविनिर्मिताः ।२९
क्षिपेत्प्रतिदशास्तासु वन्धीयात्तन्द्रिकाकृतिः ।
छागाद्यन्त्रभवा मन्द्रे मध्य चवाथ पट्टजा ।३०।
तन्त्रीद्वयीं समगुणां संहतां तारके न्यसेत् ।
तारात्परं न्यसेत्तन्त्रीं सूक्ष्मां तां मध्यमां विदुः ।३१।
एता यथाक्रमं स्थाप्याः क्रोडान्मकरिकोपरि ।
एवंविधायां कच्छप्यां विविधाः करसारणाः ।३२।
ताः परम्परया ज्ञेयास्तज्ज्ञानामुपदेशतः ।
एषा मनोहरा वीणा दार्वस्याः खादिरादिकम् ।३३।
इति कच्छपी वीणा ।

अथ सारङ्गी घटनाप्रकारमाह—

गाम्भारी पानसी वापि सारदारुद्रुवापि वा
त्रिवितस्तिमिता दैर्घ्ये शिरः पञ्चदशाङ्गुलम् ।३४।

तत्तु सर्पफणाकारं तन्मध्ये दशिका भवेत् ।
गलभागे क्रमान्न्यूनं तस्मादुच्चान्तर्कणिका ।३५।
अस्या अधःस्थितो दण्डो दैर्ध्ये स तु दशाङ्गुलः ।
स्थूलमूलः कृशाग्रश्च क्रमेण वलितो भवेत् ।३६।
दण्डस्य शिरसश्चैव गर्भं शून्यं च कारयेत् ।
दण्डस्य पृष्ठदेशे तु शिरसः क्रोडतस्तथा ।३७।
सारीगृहं भवेदस्याः सारङ्ग्याश्चतुरस्रकम् ।
दैर्ध्ये षडङ्गुलं प्रोक्तं प्राशस्त्ये चतुरङ्गुलम् ।३८।
शून्ये गर्भश्च तस्याथ गाम्भीर्ये चतुरङ्गुलः ।
तिस्रस्तत्रैव मोटन्यो विन्यस्यास्तु विलत्रये ।३९।
अग्रं तत्र सचूडं स्याद्यथा देवकुले तथा ।
अस्याः शिरः पिधातव्यं कच्छप्या इव चर्मणा ।४०।
स्थाप्या मकरिका तत्र त्रिरेखाङ्गुष्ठनिर्मिता ।
दशाग्रे कलिका देया सारिरेका स्थिता भवेत् ।४१।
तिस्रस्तन्त्र्यः पट्टसूत्रभवाः स्थाप्या अनुक्रमात् ।
निर्मायैवं धनुर्वंशपृष्ठस्य त्रिदशाङ्गुलम् ।४२।
अश्वपुच्छसमाकृष्टैर्वालैरस्य गुणो मतः ।
तं घृष्ट्वा सालनिर्यासैस्तेन तन्त्रीस्तु वादयेत् ।४३।
एषा सारङ्गिका वाद्या तज्ज्ञानामुपदेशतः ।

इति सारङ्गीलक्षणम् ।

अथ रुद्रवीणा—

दण्डोऽस्या रुद्रवीणाया मुष्टचैकादशसम्मितः ।
भ्रमदङ्गुष्ठाग्रमितं शुषिरं तस्य कीर्त्तितम् ।४४।
दण्डस्योभयतो दण्डं (देयं) कांस्यं सम्वरकद्वयम् ।
पश्चात् सम्वरकं चात्र छत्रीकृतशिरो भवेत् ।४५।
दण्डस्य वेष्टनं सार्द्धं पञ्चाङ्गुलमिहोदितम् ।
तम्मिता नगरी (मकरी) तस्याः कर्तव्या सुन्दराकृतिः ।४६।

ककुभो रुद्रवीणायास्त्रिशिराः परिकीर्त्तिताः ।
उर्द्ध्वं शिरसि दातव्या लौहपत्रीसमन्विता ।४७।
मूलतन्त्री तदुपरिन्यस्या ल्लोह्ी ततः परम् ।
दक्षिणे शिरसि न्यस्येत् श्रुति-तन्त्रीद्वयं क्रमात् ।४८।
एवं तु ककुभं तत्र वीणादण्डे निवेशयेत् ।
अङ्गुलोच्चं तूर्द्ध्वशिरोऽङ्गुष्ठमात्रं तु पार्श्वकम् ।४९।
सप्ताङ्गुलान्तरं तस्मात्तुम्वमन्यं निवेशयेत् ।
अन्यं ततश्चतुस्त्रिंशदङ्गुलान्तरमाक्षिपेत् ।५०।
अष्टादशाङ्गुलमुखं चक्रवे चारुगर्भकम् ।
(कुसुम्भ) सुकुम्भमुन्नतं कान्तं वर्त्तलं तुम्वयुग्मकम् ।५१।
औन्नत्ये किंचिदाधिक्यमनयोश्च प्रशस्यते ।
अर्द्धाङ्गुलान्तरं पश्चात्तुम्वस्य स्थापयेद्बुधः ।५२।
दण्डपृष्ठे रन्ध्रयुतेऽस्याः सरस्वतिकां शुभाम् ।
सम्वर-द्व्यङ्गुलोच्चां तां छत्राकृति-शिरोयुताम् ।५३।
ततः सार्द्धद्व्यङ्गुलान्ते एकां मोटनिकां न्यसेत् ।
पञ्चाङ्गुलान्तरं तस्यामग्रे वेष्टनिकान्विताम् ।५४।
पूर्वमोटनिका वेष्टरन्ध्रमेकं समन्ततः ।
लौहाङ्कुशं तु कर्तव्यं वर्त्तुलं वडिशाकृतिः ।५५।
तद्बन्धनगुणं तस्मिन् वेष्टरन्ध्रे निवेशयेत् ।
तत्परायां तु मोटन्या वेष्टरन्ध्रेऽङ्कुशं क्षिपेत् ।५६।
तन्मोटनी वृत्तरन्ध्र-सदृशं दण्डरन्ध्रकम् ।
सुयन्त्रिते तु तत्रैव बन्धीयान्मुखतन्त्रिकाम् ।५७।
तावच्च भ्रामयेत् पूर्वां मोटनीं च शनैः शनैः ।
न यावदेति स्वस्थानं तन्त्री यन्त्रविशारदः ।५८।
अस्याः त्वष्टादश प्रोक्ताः सारिकाः पूर्वसूरिभिः ।
तासां वृहत्तरा अष्टौ दश क्षुद्राः प्रकीर्त्तिताः ।५९।
एतास्तु तारवादिन्यस्तिष्ठन्ति पदिकोपरि ।
वितस्तिमात्रा पदिकाङ्गुष्ठोच्चा स्यास्तुगर्भकः ।६०।

तावच्छून्यस्तु कर्तव्यो यथा दण्डे स्थिरो भवेत् ।
दम (मद) नस्य च सिक्थस्य योगेन सुदृढीकृताः ।६१।
बृहतीनां तु सारीणां खननीयं तलं क्रमात् ।
एतास्तु सर्वावयवैः कथितास्त्वङ्गुलाबुधैः ।६२।
स्थाप्यो दण्डस्य ताः पृष्ठे यथा रागस्वरं पुनः ।
दमनस्य च सिक्थस्य योगेन सुदृढीकृताः ।६३।
सर्वासां लोहकलिकां मस्तके स्युः सुयन्त्रिताः ।
एकाङ्गुलोच्चाः क्षुद्राः स्युरिति सारिविनिर्णयः ।६४।
एवं विनिर्मिता रुद्रवीणा जनमनोहराः ।
अस्याः शिक्षा तु कर्तव्या दाक्षिणात्योपदेशतः ।६५।
इति रुद्रवीणा ।

एषैव तु विपञ्चीस्याद्विशेषो विनिगद्यते ।
तन्त्रीद्वयस्य स्थित्यर्थं वामभागे तु काकुभे ।६६।
उच्चोच्चद्विदलं कार्यं लौहपत्री समन्वितम् ।
मन्द्रतन्त्र्यर्थसंसिद्ध्यै दातव्ये अधिके इह ।६७।
बृहत्यौ सारिके न्यासस्तयोरपि च कथ्यते ।
मन्द्रपञ्चकमासाद्योभयतस्तिष्ठतो यथा ।६८।
रमण्यावनुरागिण्यौ कान्तमेकान्तवर्त्तिनम् ।
इत्यादि लक्षणोपेता रौद्र्यैव तु विपञ्चिका ।६९।
इति विपञ्ची ।

अथ कपिलासिका—

आद्या वीणा तु या प्रोक्ता सैव स्यात् कपिलासिका ।
दशमुष्टिमितश्चेकादशमुष्टिमितोऽपि वा ।७०।
आदायां दण्ड आख्यातः पादोनद्व्यङ्गुलं पुनः ।
शुषिरं तत्र कर्तव्यं वेष्टनेऽष्टाङ्गुलं पुनः ।७१।
तस्यैवोभयतो देयं रौप्यं सम्वरज (मकरिका) द्वयम् ।
तद्रन्ध्रे ककुभः स्थाप्यः पादोनद्व्यङ्गुलोन्नतः ।७२।

तद्दक्षिणे लोहकिलं तद्वद्धा लोहतन्त्रिका ।
नवाङ्गुलान्तरं तत्र ककुभात्तुम्वकं न्यसेत् ।७३।
अष्टादशाङ्गुलमुखं चक्रत्वे चारुगर्भकम् ।
सुकुम्भमुन्नता नम्रं कान्तिमद् वर्त्तुलं द्वयम् ।७४।
एवमन्यदपि स्थाप्यं वामर्मूद्धर्वादधः पुनः ।
तस्माद्वहिर्गते दण्डे बद्धस्तस्य दृढः पुनः ।
तस्मादधोऽपि वद्धव्यो दातव्योऽपि दृढ़ पुनः ।७५।
कांस्यैश्च पित्तलैर्वापि दातव्या नखरी वुधैः ।
एवं विनिर्मिता वीणा वैणिकैः कपिलासिका ।७६।
सुपक्ववंशजा काष्ठी दशाङ्गुलमिता मता ।
तां तु वामकरे धृत्वा तया संपीड्य तन्त्रिकाम् ।७७।
वादनीया सावधानै रागसाङ्कर्यकोविदैः ।
क्षुद्रगीतेषु सङ्कीर्णरागेष्वस्या विचित्रता ।७८।
इति कपिलासिका ।

अन्यासां लक्षणं नोक्तं ग्रन्थबाहुल्यभीतिना ।
तज्ज्ञानग्रहिलैर्ज्ञेयं तत्तद्ग्रन्थेभ्य एव हि ।७९।

आनद्धं यथा—

मर्द्दलो मुरजश्चैव चिक्का पटह चाङ्गवः ।
पणवः कुण्डली भेरी घंटवाद्यं च झर्झरः ।८०।
डमरुष्टमकिर्मन्था हुडुक्का मड्डुडिण्डिमैः ।
उपाङ्गदर्द्दुरावित्यादिकमानद्धमीरितम् ।८१।
आनद्धे मर्द्दलः श्रेष्ठः तस्मात्तल्लक्षणं ब्रुवे ।
मर्द्दलः खादिरः श्रेष्ठो हीनःस्यादन्यदारुजः ।८२।
रक्तचन्दनजो रम्यो गम्भीरध्वनिरुच्चकैः ।
सार्द्धहस्तप्रमाणं तु दैर्ध्यमस्य विधीयते ।८३।
त्रयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ।
दक्षिणं तु भवेद्हीनमेकेनार्द्धाङ्गुलेन वा ।८४।
करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ।

करणं नाम षण्मासमृत-वत्सचर्म। तदुक्तम्—

षण्मासीयो मृतोवत्सस्तत् चर्म करणं स्मृतम्।
मृत्तिकानिर्मितचैष मृदङ्गः परिकीर्त्तितः।८५।
पातयेत् खरली वाद्यनदनार्थं च मर्द्दलम्।

खरलिर्नाम लेप-विशेषः। तदुक्तम्—

विभूतिर्गैरिकं भक्तं केन्दुकेन च संयुतम्।
यद्वा चिपीटकं देयं जीवनीसत्त्वमिश्रितम्।
सर्वमेकत्र संपिष्टं तल्लेपः खलिरुच्यते।८६।

जीवनी हरीतकी। लेपस्तु दक्षिणपुटे देयः। तदुक्तम्—

वामे च पूरिकां लेपं दत्त्वा दद्याच्च दक्षिणे।इति।

पूरिका नाम भक्तचिपीटिका, लाजानामन्यतमेन जलपिष्टं भस्म।

अधुना तु—

ओदनं छागविड्भस्म भस्म चापि पुरातनम्
लोहविण्मूषयोश्चूर्णं समभागं सुषेषयेत्।
लेपयेद्दक्षिणपुटे लेपोऽयं वज्र ईरितः।८७।

पुरातन भस्मेति बहुदिनमेकत्र स्थितं यत्किंचिद्भस्म। मूषा इति ताम्राद्यावर्तनपात्रम्। कोयीति भाषायाम्।

तत्र मर्द्दलमुरजयोर्भेदमाह, विश्वकर्मा—

त्रयोदशाङ्गुलो वामे मुखे स्याद्द्वादशाङ्गुलः।
दक्षिणे तु मुखे धीरैः मर्द्दलः परिकीर्त्तितः।८८।
मुरजोऽष्टाङ्गुलो वामे दक्षे सप्ताङ्गुलो मुखे।
अङ्कूर्योर्द्ध्वक्या लिङ्गचभेदात् स त्रिधा परिकीर्त्तितः।८९।

तदुक्तं भरतेन—

हरीतक्या कृतस्त्वङ्कचो यवमध्यस्तथोर्द्ध्वकः।
आलिङ्गचश्चैव गोपुच्छसदृशः परिकीर्त्तितः।९०।

अथ वादनमार्गः—

वादनस्य चतुर्मार्गा ईरिता चन्द्रमौलिना ।
घटिताख्या विकृष्टा च गोमुख्या लप्तिका तथा ।६१।

उद्देशक्रमेण लक्षणमाह—

घटिता करमूलस्य विकृष्टाङ्गुलिमूलतः ।
गोमुखी चाग्रहस्तस्य चालनेन प्रकीर्त्तिताः ।६२।

करमूलस्य चालनेन घटिता इत्याद्यन्वयः ।

कनिष्ठाङ्गुलिसंयोगे सर्वाङ्गुलि विवर्त्तनात् ।
आलप्तिका समाख्याता नन्दिने चन्द्रमौलिना ।६३।

अथ त्रिप्रकारप्रहारमाह—

निगृहीतार्द्धनिगृहीतमुक्ताख्यं च मृदङ्गजम् ।
प्रहारत्रितयं प्रोक्तं नन्दिने चन्द्रमौलिना ।६४।

निगृहीताख्यमर्द्धनिगृहीताख्यं मुक्ताख्यं चेत्यर्थः ।

प्रत्येकलक्षणमाह—

करयोः पुटयोगेन निगृहीतमुदाहृतम् ।
स्यादर्द्धनिगृहीतं तु करस्यैकस्य मोक्षणात् ।६५।
उभयोश्च परित्यागात्तथैवान्तरघाततः ।
क्षणे क्षणे कलासश्च मुक्ताख्यः स उदाहृतः ।६६।

कलासो वादनविशेषः । स च कलासोऽर्द्धकलासश्च टिकिनी चार्द्धटिकिनी इत्यादि भरतोक्तः—

अन्ये च भरताद्युक्ताः प्रकारा वाद्यपाटयोः ।
सन्त्येवानन्त्यबाहुल्यभीत्या ते न मयोदिताः ।६७।
स्त्रीपुंनपुंसकत्वं चान्यैरुक्तं मर्द्दल-ध्वनेः ।
तदप्यलेखि न मया प्रायो बाहुल्यभीतितः ।६८।

अथ मार्दङ्गिकलक्षणम्—

धीरो वाद्यविशारदः प्रवचनः पाटक्षयव्यञ्जक–
स्तालाभ्यासरतः समस्त-गमकप्रौढप्रकाशक्षमः ।

नानावाद्यविवर्त्त-वर्त्तनपटुः स्वभ्यस्तगीतक्रमः ।
संतुष्टो मुखवादको द्रुतकरो मार्द्दङ्गिकः कीर्त्तितः ।९९।

अन्येषां लक्षणं विस्तरभयान्नोक्तम् । अथ शुषिरम् ।

वंशोऽथपारी मधुरी-तित्तिरी-शङ्ख काहलाः ।
डोडही मूरली वुक्का शृङ्गिकास्वरनाभयः ।१००।
शृङ्खलापिकवंशश्च चर्मवंशस्तथापरः ।
एते शुषिरभेदाःस्यु कथिताः पूर्वसूरिभिः ।१०१।

वंशलक्षणमाह—

वञ्जुलः सरलश्चैव पर्वदोषविवर्जितः ।
वैणवः खादिरो वापि रक्तचन्दनजोऽथवा ।१०२।
श्रीखण्डजोऽथसौवर्णो दन्तिदन्तमयोऽथवा ।
राजतस्ताम्रजो वापि लौहजः स्फाटिकोऽथवा ।
कनिष्ठाङ्गुलितुल्येन गर्भरन्ध्रेण शोभितः ।१०३।
शिल्पविद्याप्रवीणेन वंशः कार्यो मनोहरः ।
तत्र त्यक्त्वा शिरोदेशादधो निर्मितमङ्गुलम् ।१०४।
फुत्काररन्ध्रं कुर्वीत मितमङ्गुलिपर्वणा ।
पञ्चाङ्गुलानि संत्यज्य ताररन्ध्राणि कारयेत् ।१०५।
कुर्यात्तत्रान्यरन्ध्राणि सप्तसंख्यानि कौशलात् ।
वदरीवीजतुल्यानि संत्यज्यार्द्धार्द्धमङ्गुलम् ।१०६।
प्रान्तयोर्वन्धनं कार्यं स्वर्णाद्यैर्नादहेतवे ।
सिक्थकेन कला देया तेनसुस्वरता भवेत् ।१०७।

कला कलना । स्वर्णादिमुखवन्धस्थिरीकरणं सिक्थकेन सम्पादनीयमिति भावः । अयमुक्तप्रकारो वंशो नाम्ना पञ्चाङ्गुलः । एवं फुत्कार-रन्ध्रात् यावन्त्यङ्गुलानि परित्यज्य ताररन्ध्राणि कारयेत् । तानि तन्नामानि भवन्ति । यथा षडङ्गुलत्यागे षडङ्गुलनामा वंश इत्यष्टादशपर्यन्तम् । तदुक्तम्—

पञ्चाङ्गुलोऽयं वंशः स्यादेकैवाङ्गुलवर्द्धितः ।
षड़ङ्गुलादिनामा स्याद्यावदष्टाङ्गुलं पुनः ।१०८।

फुत्कारात्ताररन्ध्रस्य यावदङ्गुलमन्तरम् ।
तदेव नाम वंशस्य वांशिकैः परिकीर्त्तितः ।१०९।

तत्र त्याज्याङ्गुलमाह—

एकाङ्गुलो द्व्यङ्गुलश्च त्र्यङ्गुलश्चतुरङ्गुलः ।
अतितारतरत्वेन वांशिकैः समुपेक्षितः ।११०।
त्रयो दशाङ्गुलो वंशोऽपरः पञ्चदशाङ्गुलः ।
निन्दितो वंशतत्त्वज्ञैस्तथा सप्तदशाङ्गुलः ।१११।

फुत्काररन्ध्रादेतावदङ्गुलत्यागेन ताररन्ध्रं न कार्यमित्यर्थः । तत्राप्यङ्गलिविशेषत्यागेन श्रैष्ठ्यमाह—

महानन्दस्तथानन्दो विजयस्तु जयस्तथा ।
चत्वार उत्तमा वंशा मातङ्गमुनिसन्मताः ।११२।

ततः कथमेषां महानन्दादि संज्ञेत्याह—

दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः ।
द्वादशाङ्गुलिमानस्तु विजयः परिकीर्त्तितः ।
चतुर्दशाङ्गुलमितो जय इत्यभिधीयते ।११३।

एतेन दशैकादशद्वादशचतुर्दशाङ्गुलाः श्रेष्ठाः । पञ्चादिनवाङ्गुलान्तामध्या । एकद्वित्रिचतुस्त्रयोदशपञ्चदशाङ्गुलानि निन्दितेत्यर्थः ।

सुस्थानत्वं सुस्वरत्वमङ्गुलिसारणक्रिया ।
समस्तगमकज्ञानं रागरागाङ्गवेदिता ।१२४।
क्रियाभाषाविभाषासु दक्षता गीतवादने ।
सुस्थाने चापि दुःस्थाने नादनिर्माणकौशलम् ।११५।
गातृणां स्थानदातृत्वं तद्दोषाच्छादनं तथा ।
वांशिकस्य गुणा एते मया संक्षिप्य दर्शिताः ।११६।

गातृणां स्थान-दातृत्वं गायकानां गानविरतौ तत्पूरकत्वम् ।

अथास्य दोषाः—

बहुकृत्वः शिरःकम्पः स्वस्थानाप्राप्तिरेव च ।
वृथा प्रयोगबाहुल्यमल्पता गीतवादने ।
एभिर्दोषैर्युतोऽतीवनिन्दितो वांशिको मतः ।११७।

अथ रक्तवांशिकलक्षणम्—

स्थानकाभिनयाभिज्ञो गमकाढ्यः स्फुटाक्षरः ।
शीघ्रहस्तः कलाभिज्ञो वांशिको रक्त उच्यते ।११८।

अथाङ्गुलिगुणाः—

प्रयुक्तिरर्द्धयुक्तिश्चायुक्तिश्चेत्यङ्गुलेर्गुणाः ।

अथ फूत्कृतिगुणाः—

नैविड्यं प्रौढता चापि सुस्वरत्वं च शीघ्रता ।
माधुर्यमपि पञ्चामी फूत्कृतेषु गुणाः स्मृताः ।११९।

फूत्कारेषु दोषमाह—

सीत्कारबहुलस्तब्धो विस्वरः स्फुटितो लघुः ।
अमाधुर्यं च विज्ञेयाः षड्दोषाः फूत्कृते क्रमात् ।
नोक्तं लक्षणमन्येषां बाहुल्याच्चाप्रसिद्धितः ।१२०।

अथ घनम्—

करतालः कांस्यवलो जयघण्टोऽथशक्तिकः ।
(क)म्पका पटवाद्यं च घण्टातोद्यं च घर्घरम् ।१२१।
झञ्झातालश्च मञ्जीरः कर्त्तर्युङ्गुर एव च ।
द्वादशैते मुनीन्द्रेण कथिता घनसंज्ञकाः ।१२२।

तत्र करताललक्षणम्—

त्रयोदशाङ्गुलव्यासौ शुद्धकांस्यविनिर्मितौ ।
मध्ये मुखे स्तनाकारौ तन्मध्ये रज्जुगुम्फितौ ।१२३।
पद्मिनी-पत्रसदृशौ कराभ्यां रज्जुयन्त्रितौ ।
करतालावुभौ वाच्यौ पाटे झम्पकझैरिति ।१२४।

प्रकारान्तरमाह—तद्यथा—

त्रयोदश-यवन्यासं वक्त्रपिण्डं यवोन्नतम् ।
यवपञ्चकगम्भीरं मध्ये च यवसप्तकम् ।१२५।
विस्तृतं वर्त्तुलं निम्नं यवत्रयमितं ततः ।
पृष्ठतो मध्यदेशे च शिवलिङ्ग-समाकृतिम् ।१२६।

मध्ये गुन्जासमं छिद्रं पट्टसूत्रादिगुम्फितम ।
अत्यम्लपैष्ठिनिर्दग्धशुद्धकांस्य-विनिर्मितम् ।१२७।
काश्मीरादि समुद्भूतं तालमाहुर्मनीषिणः ।
सुनादं दक्षिणं तालं ततो हीनं च वामकम् ।१२८।
कुर्वीत तद्द्वयं धार्यं तर्जन्यङ्गुष्ठयोगतः ।
वामहस्तस्थ-तालस्य मध्यमं षड्ज-नादितम् ।१२९।
तिर्यग्दक्षिणतालस्य परिध्यंशेन ताडयेत् ।
तालाङ्गैर्वादयेच्चैव प्लुतदीर्घलघुद्रुतैः ।१३०।

इति करतालः ।

इतरेषां लक्षणं विस्तरभयादुपेक्षितम् । किं च—

ततं वाद्यं च देवानां गन्धर्वाणां च शौषिरम् ।
आनद्धं राक्षसानां च मानवानां घनं विदुः ।१३१।

इति घनः ।

इतिश्रीनिखिलान्ववा ेतुङ्गचोडगङ्गवंशावतंसाशेषगुणसम्पन्ननाम-भमिपतितनुजन्मनः महाराजाधिराजस्य साहित्यसङ्गीतार्णवकर्ण्णधारकमणेः, गजपतिवीरश्रीनारायणदेवस्य कृतौ संगीतनारायणे गीतनिर्ण्णयोनाम द्वितीयः परिच्छेदः ।

तृतीय-परिच्छेदः

अथ क्रमप्राप्तं नृत्यमाह। तत्रादौ नाटचवेदोत्पत्तिमाह—

इहानुश्रूयते ब्रह्मा शक्रेणाभ्यर्थितः पुरा।
चकाराकृष्य वेदेभ्यो नाटचवेदं च पञ्चमम्।१।
भरताय ददौ पूर्वं नाट्यवेदं चतुर्मुखः।
स नाट्य-नृत्य-नृत्तानि शम्भोरग्रे प्रयुक्तवान्।२।

तत्र च—

नर्तनं त्रिविधं नाट्यं नृत्यं नृत्तमिति क्रमात्।

तत्र नाटचं यथा—

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।
सोऽङ्गाभिनयनैर्युक्तो नाटचमित्युच्यते बुधैः।३।

अपरं च—

नाटक-स्थित-वाक्यार्थ-पदार्थाभिनयात्मकम्।
तदाद्यं भरतेनोक्तं रसभाव-समन्वितम्।४।
नाटकादिषु तन्नूनमुपयुक्तं मुनीश्वरैः।

अथ नृत्यमाह—

देशरीत्या प्रतीतो यस्तालमानलयाश्रितः।
सविलासोऽङ्गविक्षेपो नृत्यमित्युच्यते बुधैः।५।

विलासो यथा—

नायकालोकनादौ च विशेषो हि क्रियासु यः।
श्रृङ्गारचेष्टासहितो विलासः स निगद्यते।६।

नृत्तमाह—

गात्रविक्षेपमात्रं तु सर्वाभिनयवर्जितम्।
आङ्गिकोक्त-प्रकारेण नृत्तं नृत्यविदो विदुः।७।
एतत्त्रयं द्विधा प्रोक्तं मार्ग-देशी-प्रभेदतः।

तत्र मार्गमाह—

ब्रह्माद्यैर्मार्गितं शम्भोः प्रयुक्तं भरतादिभिः ।
गान्धर्वं वादनं नृत्यं यत्स मार्गः इति स्मृतः ।८।

देशीमाह—

देशे देशे नृपादीनां यदाल्हादकरं परम् ।
गानं वाद्यं तथा नृत्यं तद्देशीत्युच्यते वुधैः ।९।

कोहले तु भिन्नतयोक्तम्—

अतः परं प्रवक्ष्यामि नाट्य नृत्त (नृत्य) विकल्पनम् ।
नटस्यातिप्रवीणस्य कर्मत्वान्नाट्य उच्यते ।१०।
मार्गो देशीति नाट्यस्य भेदद्वयमुदाहृतम् ।
ब्रह्मणायत्तपस्तप्त्वा मार्गितं शिवयोः पुरा ।११।
मार्ग-नाट्यं ततः प्राहुस्तच्च विंशतिधोच्यते ।
नाटकं च प्रकरणं भाणः प्रहसनं डिमः ।१२।
व्यायोग-समवकारौ च वीथ्यङ्केहामृगा इति ।
रूपकाणि दशैतानि शङ्करेण वभाषिरे ।१३।
नाटिका प्रकरणिका भाणिका हासिका ततः ।
वियोगिनी च डिमिका वलोत्साहवती पुनः ।१४।
चित्रा जुगुप्सिता चैव विचित्रार्थेति दुर्गया ।
एवं मार्गं नाट्यमुक्तं शिवाभ्यां ब्रह्मणे पुरा ।१५।
दत्तिलादिभिरुक्तानि देशीरूपाणि षोडश ।
सट्टकं त्रोटकं गोष्ठी वृन्दकं च ततः परम् ।१६।
शिल्पकं प्रेक्षणं संलापकं चेति ततः परम् ।
हल्लीशरासकावुल्लाप्यकं श्रीगदितं तथा ।१७।
नाट्यरासक-दुर्मल्ली प्रस्थानं काव्यलासिके ।
इति षोडशदेशीरूपाणि ।

नृत्तानि द्वादशोक्तानि डोमिका भाणिका तथा
प्रस्थानकः भाणकश्च लासिका रासिका तथा ।१८।

दुर्मल्लिका विदग्धश्च शिल्पिनीं हस्ति (दण्डि) नी तथा।
उल्मुकी (भिल्लुकी) तुम्बिका चैव द्वादशोक्तानि सूरिभिः।
एषामलङ्कारशास्त्रे लक्षणं वहुधोदितम्।
तज्ज्ञानग्रहिलैस्तस्माज्ज्ञेयं नालेखि तन्मया।२०।

प्रकृतमनुस्त्रियते--

ताण्डवं लास्यमित्येतद्द्वयं द्वेधा निगद्यते।

द्वयं नृत्यं नृत्तं च। तत्र ताण्डवं यथा--

वर्द्धमानासारिताद्यैर्गीतैस्तत्र ध्रुवायुतम्।
करणैरङ्गहारैश्च प्राधान्येन प्रकीर्त्तितम्।
तण्डूक्तमुद्धतप्रायं प्रयोगं ताण्डवं विदुः।२१।

तण्डुर्नाम शम्भोर्गणविशेषः। करणाङ्गहारौ वक्ष्येते। वर्द्धमानं वाद्यविशेषः। असारिता यवनिका-विशेषः।

ध्रुवलक्षणं तु नाट्यदर्पणे।

प्रथयति पात्रविशेषं सामाजिकमनांसि रञ्जयति।
अथ संवन्धाति रसान्नाट्यविशेषो ध्रुवा गीतिः।२२।इति।
प्रेरणी बहुरूपं च तदेवं ताण्डवं द्विधा।

प्रेरणीताण्डवं बहुरूपताण्डवं चेति द्विधेत्यर्थः।

तत्र प्ररणी यथा--

अङ्गविक्षेपवाहुल्यं तथाभिनयशून्यता।
यत्र सा प्रेरणी प्रोक्ता संज्ञा देशीति लोकतः।२३।

बहुरूपं यथा दामोदरे--

छेदनं भेदनं यत्र बहुरूपमुखावलिः।
ताण्डवं बहुरूपं च वाणी....मुद्धतम्।२४।

कौमुदीसारयोस्तु बहुरूपलक्षणं अन्यथा दृश्यते।

तेना-गीतकवाद्य-पाटसहितं युक्तं पुरा वृत्तकै-
र्योवह्वद्भुत संयुतं निगदितं यत्सूत्रधारेण च।
स्यादाश्चर्यकरं तु वीररसगं शृङ्गारगं वा वुधैः
प्रोक्तं तद्बहुरूपकं बहुविधैर्भाषारसैः संयुतम्।२५।

अथ लास्यमाह—

लास्यं तु सुकुमाराङ्गं मकरध्वजवर्द्धनम् ।
स्फुरितं यौवतं चेति तदपि द्विविधं मतम् ।२६।

स्फुरितलास्यं यौवतलास्यं चेति द्विविधमित्यर्थः ।

यत्राद्येऽभिनये भावैरसैराश्लेषचुम्बनैः ।
नायिकानायकौ यत्र नृत्यतः स्फुरितं हि तत् ।२७।

स्फुरितमित्यत्र छुरितमिति चवर्गद्वितीयमपि केचित् पठन्ति । आद्ये-प्रधाने, रसैः—रसजनकैः, भावैश्चेष्टितैरित्यर्थः । आश्लेषचुम्बनैरिति, आश्लेषः आलिङ्गनं, बहुवचनमाद्यर्थम् । आश्लेषचुम्बनादिरहितैरित्यर्थः । आश्लेषचुम्बनैरिति केचित्, तन्न, रङ्गे आश्लेषादेरदर्शनीयत्वात् । तदपि वक्ष्यते ।—

यौवतलास्यमाह—

मधुरावद्ध-लीलाभिर्नटीभिर्यत्र नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ।२७

किं च—

शलिरित्यादिलास्याङ्गान्यन्यान्युक्तानि सूरिभिः ।
नाति प्रयोजनानीति न मयोक्तानि तानिह ।२८।

नृत्तमाह—

नृत्तं चापि त्रिधा प्रोक्तं विषमं विकटं लघु ।

विषमनृत्तं विकटनृत्तं लघुनृत्तं चेति त्रिविधम् ।

विषमं तत्समुद्दिष्टं यद्रज्जुभ्रमणादिकम् ।२९।
विरूपवेशोवयव-व्यापारं विकटं मतम् ।
उपेतं करणैरल्पैरञ्चिताद्यैः लघु स्मृतम् ।३०।

अञ्चितादिः करणविशेषः । स च वक्ष्यते । कोहलोक्ता नृत्त-विशेषा डोम्बिका भाणिकादयस्तूक्ता एव । नारदसहितायां तु—

पुंनृत्यं ताण्डवं प्रोक्तं स्त्री नृत्यं लास्यमुच्यते ।

इति साधारण्येनोक्तम् । किं च प्रेरणी वहुरूपत्वेन ताण्डवस्य द्वैविध्यम् । स्फुरितयौवतरूपतया लास्यस्य द्वैविध्यं च भरतकोहलादि प्राचीनाचार्यैराधुनिकैः शार्ङ्गदेवादिभिरपि न लिखितम्—किं च—

प्रकार-नाट्यमित्याहुः यद्रास-क्रीडनादिकम् ।

इति सङ्गीतकौमुद्यां तत्सारेऽप्येवं दृश्यते । तदप्याधुनिकैर्नाट्याचार्यै-रङ्गीकृतम् । यतः—

जनानुरञ्जनाद्धेतोर्मया तदपि कथ्यत ।

तद् यथा—

अष्टाभिर्गोपनारीभिरष्टाभिः कृष्णमूर्त्तिभिः ।
काष्ठानृत्यं प्रभवति कृतस्वस्तिकमण्डलम् ।३१।

इति काष्ठानृत्यम् ।

पिच्छगुच्छकरौ पानमत्तौ गीत्वा स्वभाषया ।
तुरुष्कौ नृत्यतो यत्र तन्नृत्यं जाकडीति च ।३२।

इति जाकडीनृत्यम् ।

नृत्यन्ति शवरा यत्र गायन्तो निजभाषया ।
तदिदं शावरं नृत्यमित्याहुः नृत्यकोविदाः ।३३।

इति शावरनृत्यम् ।

शावरीवेशयोर्गुञ्जापुञ्जभूषणयोः स्त्रियः ।
नित्यं कुरंजीतिविदुर्गायन्त्योश्च स्वभाषया ।३४।

इति कुरञ्जीनृत्यम् ।

मत्तानां च तुरुष्काणामपेयास्वादनान्तरम् ।
यः प्रकारः तेन नृत्यं विदुर्मत्तावलीं वुधाः ।३५

इति मत्तावलीनृत्यम् ।

इति प्रकार-नृत्यानि प्रोक्तान्याधुनिकैः पुनः ।
देशे दशेऽप्येवमेव देशीनृत्यं तथोह्यताम् ।३६।

तदुक्तं कौमुद्याम्—

यस्मिन् देशे च या रीतिर्या च भाषा मनोहरा ।
तयापि नृत्यं भवति प्रभूणां चित्तरञ्जनम् ।३७।

इति संक्षेपः

अथ नाट्यशाला—

कोहलाद्युक्तमार्गेण शालानिर्माणमाचरेत् ।
तत उद्धृत्य बाहुल्यभयात् किञ्चिन्मयोच्यते ।३८।

तत्र च—

भूशुद्धिबलिकर्मादि कृत्वाभित्तिं प्रयोजयेत् ।
भित्तिव्यापारनिवृत्तौ स्तम्भानां स्थापनं भवेत् ।३९।
शुभे दिने सानुकूले स्थिरनक्षत्रलग्नयोः ।
स्तम्भानां स्थापनं कुर्यात्त्रिरात्रोपोषितो गुरुः ।४०।
स्तम्भाःस्युः खादिराः साज्र्जाः पानसारक्तचन्दनाः ।
अग्रन्थयो ह्यसुषिराः स्थूलाग्राश्चातिपिच्छिलाः ।४१।

तत्र मन्त्रः—

यथाऽचलो गुरुर्मेरुर्हिमवांश्च यथाऽचलः ।
जयावहो नरेन्द्रस्य तथा त्वमचलो भव ।४२।
एवं मन्त्रं समुच्चार्य स्थापयेत् स्तम्भमव्रणम् ।
दृश्यते यावदेतेषां तदर्द्धं निखनेद्भुवि ।४३।
तेषां मूलानि यत्नेन सिकताभिः प्रपूरयेत् ।
विदध्याद्दीर्घविस्तारौ पात्रनाट्यानुरूपतः ।४४।

दामोदरस्तु—

हस्तविंशतिविस्तारा रङ्गभूमिर्मनोहरा । इत्याह ।
शाला मध्ये न कर्तव्यं स्तम्भानां स्थापनं वुधैः ।४५।
कुर्यादुपरिभागं तु दारुवृद्धिभिरावृतम् ।
गवाक्षभित्तयश्चित्रैः शालभञ्जीभिरन्विताः ।४६।
कलशैश्च पताकाभिर्वितानैस्तोरणैरपि ।
ऊर्द्धभागो युतः कार्यः पुष्पमाल्यैरलङ्कृतः ।४७।
अधोभागः कुट्टिमः स्यात् सुधाभिः परिलेपितः ।
नाति श्लक्ष्णं स्थलं कुर्यात्पादः स्खलतिचेत्तथा ।४८।
धाम्नस्तृतीयभागेन नेपथ्यं पश्चिमादिशि ।
कारयेत्तत्र यात्राणां वेशनातोद्यकानि च ।४९।

इति नाट्यशालाम् ।

अथ सभानिवेशनम्—

शालायाः पूर्वदिग्भागे कारयेन्नृपमण्डपम् ।
सर्वोपकरणैर्युक्तो विशेत्तत्र महीपतिः ।५०।
तुर्यत्रयविशेषज्ञः पारितोषिकदायकः ।
हीनाधिकविशेषज्ञो देशीमार्गविभागवित् ।५१।
हृष्टश्च रसभावज्ञः कलानाट्यविशारदः ।

महीपतिरिति नायकमात्रोपलक्षणम् । तदुक्तम्—

सङ्गीतज्ञैः सभासद्भिः प्रेक्षके नायके स्थिते ।
प्रविशेयुः रङ्गमध्यं तिष्ठन्तः साम्प्रदायिकाः ।५२।

इति, तल्लक्षणमपि—

विशेषज्ञस्तुर्यत्रितयनिपुणज्ञोऽभिनयवित्
रसालङ्कारज्ञः सकलगुणदोषैकनिकषः ।
पराभिप्रायज्ञो यशसि बहुमानधृतरुचिः
क्षमी दाता वीरो जगति गदितो नायक इति ।५३।

पुरो भूपस्य विप्राश्च मण्डपस्य च दक्षिणे ।
अमात्यराजपुत्राश्च उत्तराभित्तिमाश्रिताः ।५४।
पुरोभागे नरपतेः वेश्याः स्युः भित्तिमाश्रिताः ।
वन्दिनः कवयोऽत्रैव कलानाट्यविदोऽपि च ।५५।
नाट्यधाम्नो वहिर्योधमुख्यास्तिष्ठन्ति शस्त्रिणः ।
राज्ञोऽङ्गरक्षा तैः कार्या यावन्नाटकदर्शनम् ।५६।
गोष्ठीयात्रा-द्यूतनाट्यपुष्पावचययोषितः ।
राज्ञां विलासस्थानानि तस्माद्रक्ष्यः स तैः सदा ।५७।
तत्रोत्सार्याः प्रयत्नेन अवज्ञाताश्च शस्त्रिणः ।
तथा म्लेच्छाः पामराश्च तथा पाषण्डधर्मिणः ।५८।
राजाज्ञया सर्व एवोपविष्टाः स्युः सभासदः ।
अन्यथा पीडिताङ्गानां रसोद्बोधो न जायते ।५९।

अथ सभासदः—

मध्यस्था सावधानाश्च वाग्मिनो न्यायवेदिनः।
अगर्वा रसभावज्ञा तौर्यत्रितयकोविदाः ।६०।
त्रुटितात्रुटिताभिज्ञा असदादिनिषेधकाः ।
सानन्दारसभावज्ञा गुणिनः स्युः सभासदः।६१।

अथ पात्रलक्षणम्—

नृत्यस्य पालनात् पात्रं नर्तकः परिकीर्त्तितः।
यादृशं नृत्य-पात्रं स्याद्गीतं योज्यं तु तादृशम् ।६२।

अत्र स्त्रियः एव प्रधानप्रात्रम् । तदुक्तम्—

रसस्य च स्त्रियो मूलमात्तयौवनविभ्रमाः।
तस्मान्नाट्येषु पात्राणि स्त्रियः कार्याः प्रयत्नतः।६३।
लालित्यं सहजं तासां यतो नारोपितं ततः।
ताभिः प्रयुक्ताङ्गहारा न शोभन्ते कदाचन।६४।
सहजान्यारोपितयोः सहजस्तु विशिष्यते ।
उद्धता अप्यङ्गहाराः प्रयुक्ता हरिणीदृशाः ।६५।
शोभन्ते नितरां नित्यमर्द्धनारीश्वरो तथा।

तत्रादेयं पात्रम्—

वेश्याकुलयुवतिर्वा सौराष्ट्री लाटदेशजावापि ।
योज्या लास्यविधाने तदभावेऽन्यां प्रयुञ्जीत।६६।

अथ ग्राह्यस्त्रियः—

नातिदीर्घा न खर्वा च सुपक्ष्मा च सुलोचना।
सर्वाङ्गसुभगा चारुनितम्बजघनस्तना ।६७।
लयमानसमायुक्ता यतितालग्रहोत्तमा ।
कन्या सरभसा पुण्या नर्तकी समुदाहृता।६८।

अथ वर्ज्याः—

अत्युच्चा वामना स्थूला कृशाङ्गी दन्तुरालसा।
ीचस्तनोरुजघना पिङ्गाक्षी नृत्य-र्वाजता ।६९।

अथ पात्रस्यावस्थाभेदाः—

यौवनत्रितयं पात्रे प्रथमादिविभेदतः ।
नीचाधरस्तनाभोगकपोलजघनोरुकम् ।७०।
सुरतं प्रति सोत्साहं प्रथमं यौवनं मतम् ।
पीनोरुजघनं पीन-कठिनोच्चघनस्तनम् ।७१।
जीवितं यौवनस्योक्तं द्वितीयं यौवनं बुधैः ।
उन्मादकं श्रिया जुष्टं सम्पूर्णरति-नैपुणम् ।७२।
कामशिक्षितभावं तु तृतीयं यौवनं विदुः ।
श्लथाङ्गं जरसाक्लान्तमतिप्रौढवयोऽपि च ।७३।
वालं च वृद्धिहीनत्वान्न पात्रं जनरञ्जनम् ।

अथ पात्रगुणाः—

सौष्ठवं रूपसम्पत्तिश्चारुविस्तीर्णकर्णता ।
विशालनेत्रताविम्वाधरता कान्तदन्तता ।७४।
सुकम्वुकण्ठता वेल्ल-ल्लता सरलवाहुता ।
तनुमध्योन्नतस्थूलनितम्वकरभोरुता ।७५।
अत्युच्चपीनस्तनताघनोरुजघनाढ्यता ।
गौरता श्यामता चेति तज्ज्ञैः पात्रगुणाः स्मृताः ।७६।
व्यस्तानां वा समस्तानामेषां दोषविपर्ययः ।
गुणदोषौ परीक्ष्येत पात्रे नृत्यस्य सिद्धये ।७७।

संगृहीतमिदस्मद्गुरुचरणैः—

भ्रूनासिकाक्षिनटनेङ्गितहासरोष-
ह्रीदैन्य-लोतक-भयं स्मयविस्मयादीन् ।
या दर्शयेद्वचनगानगतिप्रवीणा
सा नर्तकी तदितरां प्रतिमां प्रतीहि ।७८।

अथ गात्रश्रमः—

विघ्नेशं भारतीं देवीं ब्रह्माविष्णुमहेश्वरान् ।
रङ्गे च देवतास्थाने वाद्यभाण्डानि च क्रमात् ।७९।

उपाध्यायं नृत्यकन्यास्तम्भयुग्मं च दण्डिकाम् ।
अर्चयित्वा सुलग्नाहे प्रारभेत श्रमं बुधः ।८०।
स्तम्भद्वयोपरिन्यस्य कन्यां हृदयसंस्थिताम् ।
हस्तग्राह्यां तिरश्चीनामवष्टम्भाय दण्डिकाम् ।८१।
वसित्वा चलनं (वसनं) शुभ्रं दृढमाधाय कञ्चुकम् ।
दण्डिकालम्बिनीकन्याऽभ्यसेदङ्गविवर्त्तनम् ।८२।
चलनं स्थापनं रेखां तालसाम्यं लयानपि ।
अङ्गानीति पुरोक्तानि लास्याङ्गान्यखिलान्यपि ।
गीतवाद्यानुगमनं शिक्षेत सुमनाः सती ।८३।

अथ उपाध्यायलक्षणम्—

रूपवान् नृत्यतत्त्वज्ञो वाद्यवादनवेदिता ।
वाद्यप्रबन्धनिर्माता कुशलो लय-तालयोः ।८४।
कोविदो मुखवाद्येषु शिष्यशिक्षण-दक्षिणः ।
प्रतिष्ठापयितागीतनृत्यवाद्यव्यवस्थितेः ।८५।
रञ्जकःस्यादुपाध्यायो नृत्यगीत (दोष) विधानवित् ।
कोट्टाद्रिकश्चारणश्च नटो नर्तक एव च ।
उपाध्यायविशेषत्वाश्चैते पृथगुदीरिताः ।८६।

अथ यवनिकाः—

कार्या यवनिका तत्र नीरन्ध्रा सूक्ष्मवाससा ।
धार्या सुरूपनारीभ्यां तत्तत्पात्र-प्रवेशने ।८७।
शुभ्रवर्णा च शृङ्गारे पीता वीरे प्रशस्यते ।
धूम्रवर्णा च करुणे कर्तव्या कपिशाऽद्भुते ।८८।
हास्ये विचित्रा कर्त्तव्या नीलवर्णा भयानके ।
बीभत्सके धूमलास्याद्रौद्रे रक्ता प्रशस्यते ।८९।
अरुणा वापि सर्वत्र कार्या यवनिका बुधैः ।

अथाभिनयः—

नर्त्तनेऽभिनयो मुख्यः सोऽवस्थान-कृतिर्भवेत् ।
आहार्य्यश्चाङ्गिकश्चैव वाचिकः सात्त्विकस्तथा ।९०।

स चतुर्द्धोदितो धीरैस्तत्राहार्यः प्रकीर्त्यते ।
मसीवेशश्मश्रुहेति-रेखा-प्रतिमुखादिकम् ।९१।
नैपथ्यं चेति तद्भेदा नाट्यविद्भिः प्रकीर्त्तिताः ।

तत्र मसी यथा—

शुद्धाः संयोगजाश्चोपवर्णा वर्णास्त्रिधा मताः ।
शुक्लेनीलश्च पीतश्च चतुर्थो रक्त एव च ।
एते स्वभावजा वर्णास्ततः शुद्धाः प्रकीर्त्तिताः ।९२।

तत्र द्रव्याणि—

शुक्लस्य कठिनी द्रव्यं तथा नीलस्य कज्ज्वलम् ।
हरितालं च पीतस्य रक्तस्यापि हि हिङ्गुलम् ।९३।

अथ संयोगजाः—

सितनीलसमायुक्तः कपोत इति कीर्त्तितः ।
सितपीत-समायुक्तः पाण्डुरः परिकीर्त्तितः ।९४।
सितरक्तसमायोगः पद्मवर्ण इहोदितः ।
नीलपीतसमायोगात्कषायो नाम जायते ।९५।
पीतरक्तसमायोगाद् गौरवर्ण्ण इहोदितः ।
एते संयोगजा वर्णा जायन्ते समभागतः ।९६।
उपवर्ण्णाश्च विषमाद्भागयोगाद्भवन्ति हि ।
शुक्लस्य भागो नीलस्य भागः पीतस्य संयुतः ।९७।
वलक्ष इति विज्ञेयो भरतेनोदितः पुरा ।
पीतस्यभागत्रितयमेकैकं नीलरक्तयोः ।९८।
संयुक्तो हरितो वर्ण्णो वर्ण्णकारिभिरीरितः ।
रक्तस्य भागद्वितयमेकैकं सितपीतयोः ।९९।
ब्रह्मणा भरतायोक्तः पिशङ्गो वर्ण्ण ईरितः ।
नीलस्य भागद्वितयमन्येषामेकयोगतः ।१००।
किर्मीर इति वर्ण्णस्य नाम चक्रे स्वयम्भुवा ।
शुभ्रस्य भागद्वितयमेकैकं नीलपीतयोः ।१०१।

धूमलः स समाख्यातो धूसरो रक्तयोगतः।
शुभ्रस्य नवभागाः स्युरेकैकं रक्तपीतयोः।१०२।
अस्थिवर्ण्णः स विज्ञेयः स्युर्भेदादितरेऽपि च।
सुधीभिरेते संतर्क्या बहुत्त्वान्नमयेरिताः।१०३।
यक्ष-किन्नर-नागानां वह्वास्य विकृताक्षयोः।
कृत्वा काष्ठमुखं चर्मनद्धं मस्या विलेपयेत्।१०४।
नर्तकानां विधिं ज्ञात्वा वयः प्रकृतिमेव च।
कुर्यादङ्गस्य रचनां देशजातिविशेषतः।१०५।
नागमर्त्यसुरादीनां मसी स्याल्लोकसिद्धितः
जिज्ञासा चेद्विशेषस्य भरताद्युक्तमीक्षताम्।
ते ते विशेषा न मया प्रोक्ता बाहुल्य-भीतितः।१०६।

अथ मसीनिर्माणम्—

हरितालो देवमयस्तं विना स्यान्मसी वृथा।
तदेव मन्त्रमुच्चार्य मन्त्रयेद्धरितालकम्।१०७।
वर्णिका ग्रहणार्थं त्वं निर्मितोऽसि स्वयम्भुवा।
सर्वसिद्धिप्रदो नाट्ये सर्वदेवैश्च वन्दितः।१०८।
सर्वपापहरः साक्षाद्धरिताल नमोऽस्तु ते।
तस्मात् प्रयच्छ मे सिद्धिं सर्वदेवमय प्रभो।१०९।
ततः स्निग्धे शिलापट्टे हरितालं च चूर्णयेत।
संयोजयेदिष्टकायाश्चूर्णं तत्र मनोहरम्।११०।
अतिश्लक्ष्णं जलैः सिक्त्वा मर्द्दयेदतिमात्रकम्।
तावद्विचूर्णयेद्यावत् परमाणूपमो भवेत्।१११।
श्वेतां च मृत्तिकां तत्र हरितालेन संयुताम्।
पानीयालोडितां कृत्वा तया वक्त्रं विलेपयेत्।११२।
विशोषितां मृदं कृत्वा कराभ्यां मर्द्दयेन्मुखम्।
समा श्लक्ष्णा यथा वक्त्रे समस्ते मृत्तिका भवेत्।११३।
नवनीतेन लिप्त्वाथ ध्वगं सर्ज्जरसोदितम्।
कृत्वा वक्त्रे लिपेत्तत्र हरितालं ततः समम्।११४।

अथ वेशः—

शुद्धो विचित्रो मलिनः त्रिविधो वेश उच्यते ।
येषां य उचितो वेशः क्रमात्तदपि कथ्यते ।११५।
धर्मकर्मणि युक्तानां पुंसां वा योषितामपि ।
अमात्यकञ्चुकिश्रेष्ठिद्विज-सिद्ध - पुरोधसाम् ।११६।
इत्यादीनां तु वेशः स्यात् शुद्धैर्भूषांशुकादिभिः ।
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।११७।
विचित्रवर्णः कर्तव्यो भूषणैर्वसनादिभिः ।
प्रमत्तोन्मत्तार्तपान्थाशोचिव्यसनि रोगिणाम् । ११८।
चौराणां दण्डपालानां मलिनो वेश उच्यते ।
शुक्लरक्त-विचित्राणि वासांस्युच्चावचानि च ।११९।
योजयेन्नाट्यतत्त्वज्ञो वेशयोः शुद्धचित्रयोः ।
कुर्याद्वेशे तु मलिने मलिनान्नविचक्षणः ।१२०।
सिद्धप्रव्राजकयतिर्वनौको ब्रह्मचारिणाम् ।
वासश्चीरैश्च कर्तव्यं रुद्राक्षं भस्मगुण्ठनम् ।१२१।
अन्तःपुरप्रयुक्ताः सन्न्यासि-लिङ्गि-तपस्विनः ।
सकपालिक-पाषाण्डाः कषाय-पटकञ्चुकाः ।१२२।
शम्भुस्तद्गण-चामुण्डा भूताद्याः चर्मवाससः ।
युयुत्सवः शिरस्त्राण-कवचादिभिरावृताः ।१२३।
एवं वेशा बुधैः कार्या देशजातिवयोऽनुगाः ।
उत्तमाधममध्यानां नृणां स्त्रीणामथापि वा ।१२४।

अथ श्मश्रुकर्म—

शुद्धं श्यामं विचित्रं च तथापिङ्गलमेव च ।
चतुर्धा श्मश्रुकर्म स्यात् पुनश्च त्रिविधं मतम् ।
श्मश्रुलं मध्यमं लिप्तं विनियोगोऽस्य कथ्यते ।१२५।

शुद्धं शुक्लं, श्यामं कालं, विचित्रं श्यामशुक्लं, पिङ्गल प्रसिद्धं, श्मश्रुलं दीर्घश्मश्रुयुक्तं, मध्यमं किञ्चिद्दीर्घं, लिप्तं चर्मलग्नम् ।

तपस्विनां च योगीनां पुरोधोऽमात्य-लिङ्गिनाम् ।
ऋषिस्थविरवन्दीनां शुद्धं श्मश्रुलमेव च ।१२६।
मध्यमं चित्रलं श्मश्रु दुःखि-व्यसनि-दीक्षिते ।
घोररौद्राभिनेतृणां मध्यमं श्मश्रु-पिङ्गलम् ।१२७।
दिव्या ये पुरुषाश्चैव सिद्धविद्याधरादयः ।
पार्थिवाश्च कुमाराश्च ये च राजोपजीविनः ।१२८।
शृङ्गारिणश्च ये मर्त्या यौवनोन्मादिनश्च ये ।
श्यामं लिप्तं श्मश्रुतेषां भरतादिभिरीरितम् ।१२९।

अथ हेतिः (प्रहरणम्)—

दशतालो भिन्दिपालो दशकुन्तो विधीयते ।
अष्टौ शतघ्नी शूलं च तोमरं शक्तिरेव च ।१३०।
अष्टतालं धनुर्ज्ञेयं चतुस्तालो शरासनी ।
चत्वारिंशदङ्गुलोऽसिश्चक्रं स्याद्वादशाङ्गुलम् ।
एवमेव समुन्नेयं गदाचर्मादिकस्य च ।१३१।

अथ रखाः—

कज्ज्वलेन यथाशोभं रेखा शृङ्गारिणो भवेत् ।
कपोल-भालनेत्रान्ते वलनं मसृणं समम् ।१३२।
ललाटे तिलकं कार्यं शुद्धं कज्ज्वलनिर्मितम् ।
रेखां दद्याच्च नेत्रान्ते ललाटे चालिकं लिखेत् ।१३३।
भ्रुवोः कण्ठे च रेखा तु समा शृङ्गारिणो भवेत् ।
गैरिकैर्वलयं रौद्रे वीरे गैरिक-लेखिका ।१३४।
विदूषके रावणादौ भृङ्ग्यादौ बहुधोदितम् ।
नालेखि तन्मया पात्रविशेषात्तत्तदुन्नयेत् ।१३५।

अथ प्रतिमुखम्—

मूर्न्धि यद्ध्रियते पुंभिः शोभार्थं चूलिकाश्रितम् ।
तद्धि प्रतिशिरो देशवयोजात्यनुरूपतः ।१३६।
तदाश्रितं विदध्यात्तु किरीटं मुकुटं वुधः ।
देवदानवगन्धर्वयक्षरक्षः पिनाकिनाम् ।१३७।

किरीटं रत्नभूयिष्टं द्वादशाल‍ङ्गुमुन्नतम् ।
नवशाखं च मुकुटं यथाशोभं प्रयोजयेत् ।१३८।
शम्भोशिरः सेन्दुखण्डं मातृ-तद्गणयोर्जटाः ।
सप्तशाखं तथा ब्राह्मे रुद्राणामपि तादृशम् ।१३९।
भुजङ्गानां तथा सप्तफणाःस्यरत्नदीपिताः ।
मनुष्याणां किरीटं तु स्याद्दष्टाङ्गुलमुन्नतम् ।१४०।
पञ्चशाखं तु मुकुटं बहुरत्नविभूषितम् ।
पिशाचानां च शोकार्तं विहारार्तं (विभदार्त्तं) तपस्विनाम् ।
नागानां मर्त्यनारीणां नैव प्रतिशिरो विधिः ।१४१।

मुकुटं प्रसिद्धम्, किरीटमवतंसविशेषः ।

अथ नेपथ्यम् —

नेपथ्यं तु वयः-कालदेशजातिविशेषतः ।
नानाविधं तथाप्येतच्चतुर्धा प्रोच्यते बुधैः ।१४२।
पुस्तमाल्यविभूषाङ्गपरिवर्त्तनभेदतः ।
शैलयान-विमानानि चर्मवर्मध्वजादयः ।१४३।
मृदा व दारुणा वाथ वस्त्रेणाप्यथ चर्मणा ।
लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते ।१४४।
शस्त्राणि सर्पविकृत(?)मुखानि च वपंषि च ।
यानि च क्रियते नाट्ये तत्पुस्तमिति कीर्त्यते ।१४५।
तत्त्रिधा सन्धितं चैव व्याजितं चेष्टितं तथा ।
कलिञ्जचर्मवस्त्रैश्च यत्पुस्तं क्रियते नटैः ।
सन्धितं तद् व्याजितं तु यन्त्रेण क्रियते हि यत् ।१४६।

कलिञ्जः काकतमिति प्रसिद्धम् ।

चेष्टते तत्र यद्भूयस्तत्तु चेष्टितमुच्यते ।१४७।

अथ माल्यम्—

गर्भितं गुम्फितं चैव वेष्टितं लम्बितं तथा ।
माल्यं चतुर्द्धा केशान्त-दृश्यादृश्यं तु गर्भितम् ।१४८।

केशोपरिष्टाद्ग्रथितं पुष्पं यद्गुम्फितं तु तत् ।
वेष्टितं यत्तु मालाभिस्तत्तु वेष्टितमुच्यते ।१४९।
लम्वितं यद्वेणिचूडाकण्ठेष्वालम्वते तु तत् ।
गर्भितं तु द्विजादीनां विटादीनां च गुम्फितम् ।१५०।
द्विजेतराणां धम्मिल्लभाजामावेष्टितं भवेत् ।
वेणी चूडाग्रकण्ठेषु लम्वितं स्याद्यथोचितम् ।१५१।
गोपवेशहरेः केशा बहुगुञ्जादिभिर्युताः ।
निष्केशानां तु कर्तव्यं नीलचामरगुम्फितम् ।१५२।

अथालङ्काराः—

चतुर्विधं तु विज्ञेयं नाट्येष्वाभरणं वुधैः ।
आवेध्यं वन्धनीयं च प्रक्षेप्यं रोपितं तथा ।१५३।
विद्धेनावयवेनैव ध्रियते भूषणं तु यत् ।
तदावेध्यमिति प्रोक्तं नासाकर्णादिभूषणम् ।१५४।
ग्रथितं पट्टसूत्राद्यैर्निवद्धमचलं तु तत् ।
वन्धनीयं तदाख्यातं काञ्चीसूत्राङ्गदादिकम् ।१५५।
स्वनन्ति चलनाद् यानि तानि प्रक्षेपमुच्यते ।
नूपुरं वलयादीनि वासांसि विविधानि च ।१५६।
यज्ञोपवीताद्यारोप्यं लम्वते यत्तनौ धृतम् ।
शिरोभूषाथ मुकुटं किरीटं च शिरोमणिः ।१५७।
मुक्ताजालमथो जाले रत्नचित्रं ललाटिका ।
ताटंकः कर्णपत्रं च कुण्डलं कर्ण्णपुष्पिका ।१५८।
कारवेल्लि लम्वितं च कर्ण्णपूरस्तथैव च ।
भ्रमरी नागपाशं च कर्णभूषणमुच्यते ।१५९।
उन्नतं लम्वितं लीनं नासिकाभरणं त्रिधा ।
मुक्तावली च हर्षश्च सूत्रकं कण्ठभूषणम् ।१६०।
देशे देशे यानि रुच्या क्रियन्ते भूषणानि तु ।
उक्तानि तानि सर्वाणि कण्ठभूषणसंज्ञया ।१६१।
केयूरमङ्गदं चैव कूर्परोपरिभूषणम् ।

अङ्गदकेयूरयोः आकृतिभेदाद्भेदः ।

विभूषणं च त्रिसरो हारोवक्षो-विभूषणम् ।
तिलकं मन्त्रकश्चैव काञ्चीति कटिभूषणम् ।१६२।
कङ्कणं वलयश्चैव रुचको वधितस्तथा ।
निकुञ्जकश्चेति पुनर्मणिबन्धविभूषणम् ।१६३।
संघोषकटके चैव गुल्फोपरि विभूषणम् ।
अङ्गुलीयकमङ्गुष्ठे नैतत् पुंसां विभूषणम् ।१६४।
प्रत्येकं लक्षणान्येषां कोहलीये हि सन्ति च ।
मया नोक्ता हि बाहुल्यभीत्या सिद्धानि तनिह ।१६५।

अत्र स्त्रीपुंसयोर्यदुचितं तद्विभज्यताम् । स्त्रीभूषणविषये विशेषमाह, दामोदरे—

अञ्जनं शुद्धसिन्दूरं पत्रावल्यथ यावकः ।
ताम्बूलरागोऽप्यलकाः केशान्तः पट्टवासकः ।१६६।
पट्टगुच्छश्चित्रपटः कटकं रत्नमुद्रिका ।
मुक्ताहारः कङ्कणकं ग्रैवेयकमथाङ्गदम् ।१६७।
सैमन्तिकं तुलाकोटिः कुण्डलं कर्णचूलिका ।
विशेषकोऽवतंसश्च काञ्ची कञ्चुलिकादयः ।
एते कलावतीनां तु वेशाः हृदयहारकाः ।१६८।

अथ कञ्चुकम्—

मुक्तापुञ्जैर्गुम्फितं स्यादिन्द्रगोपप्रभावता (?) ।
पट्टेन कञ्चुकः कार्योऽप्सरसां राजयोषिताम् ।१६९।
द्विजविद्याधरस्त्रीणां पीतो हेमाब्जचित्रितः ।
नीलपट्टेनाभिसारी दैत्यमानवयोषिताम् ।१७०।

अभिसारीणां दैत्ययोषितां दानवयोषितां चेत्यर्थः ।

आकण्ठपादं नृणां तु योषितामाकटीगलम् ।
कुर्यादाजानुदासीनां पदातिरथिनामपि ।
मसीपात्रस्य यद्वर्णस्तद्वर्णः कञ्चुको मतः ।१७१।

अथाङ्गपरिवर्तनम्—

चूडां गन्धर्व-दनुजां यक्षाणां देवभूभुजाम् ।
शिरसः पृष्ठतः कुर्यान्मातुलिङ्गफलोपमाम् ।१७२।
ब्राह्मणानां लम्बमानां सद्यः स्नातस्य च क्वचित् ।
जटा कार्या व्रह्मचारिरुद्रर्षीणां तपस्विनाम् ।१६३।
नागानां च फणा कार्या मुण्डं सन्यासिनां शिरः ।
मल्लानां राजडिम्भानां मूर्न्धि मध्ये शिखण्डकः ।१७४।
वेश्यादेव नृपस्त्रीणां भालमूलेऽलका भवेत् ।
वर्ण्णकेतरवर्ण्णेन तिलकं चन्दनादिना ।१७५।

हरितालभिन्नवण्णन इत्यर्थः—

अथ नाटयभाषाविभागः—

संस्कृतं प्राकृतं चेति नाट्ये पाठ्यं द्विधा मतम् ।
भाषोपभाषाहीनादिभाषेति प्राकृतं त्रिधा ।१७६।

हीनादि-भाषा हीनभाषेत्यर्थः—

मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी ।
वाल्हीकी दाक्षिणात्या च सप्तभाषाः प्रकीर्तिताः ।१७७।
कैकया सैन्धवी चैव महाराष्ट्री च गौर्ज्जरी ।
लाटी सौराष्ट्रिका चैव उपभाषाः षडेव हि ।१७८।
शकाराभीरचाण्डाल-शक-द्राविडजा अमूः ।
हीनभाषा समाख्याताः यावनी होसलीति च ।१७९।

अथ एतद्भाषा पात्राणि—

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी प्रयोक्तव्या तादृशीनां च योषिताम् ।१८०।
आसामेव च गाथासु महाराष्ट्रीं प्रयोजयेत् ।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ।१८१।
चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी ।
प्राच्या विदूषकादीनां धूर्तानां स्यादवन्तिका ।१८२।

चेटीनामप्यनीचानामपि स्यात् शौरसेनिका।
यद्देश्यं यच्च पात्रं तु तद्देश्यं तस्य भाषितम्।१८३।
कार्यतश्चोत्तमादीनां . कार्यो भाषा-विपर्ययः।
योषित्-सखी-वाल-वेश्याकितवाप्सरसां तथा।१८४।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा।
भाषाणां लक्षणं ज्ञेयमासां तत्तन्निवन्धतः।१८५।

अथ नाटचोक्तयः—

देवाश्च लिङ्गिनश्चैव मुनयोयतयश्च ये।
दीक्षाधर्मरतानित्यमतिघोरतपःस्थिताः।१८६।
भगवन्निति ते वाच्याः सर्वे व्राह्मणजा यदि।
आर्येति ब्राह्मणं व्रूयान्महाराजेति पार्थिवम्।१८७।
दानवेश्वरदैत्येन्द्र त्रैलोक्यभयदेति च।
आविद्ध केचिद्दैत्यानां वाच्यः सर्वैरधीश्वरः।१८८।
सुगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते।
उपाध्यायेति चाचार्यो वृद्धस्तातेति चैव हि।१८९।
छन्दसां नामभिर्वाच्या वटवो गोत्रतोऽपि वा।
राजा स्वामीति देवेति भृत्यैर्भट्टेति मागधैः।१९०।
राजर्षिभिः वयस्येति तथा विदूषकेन वा।
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च।१९१।
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः।
वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परम्।१९२।
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः।
सूत्रधारो मारिषेति आवुत्तेति स्वसुः पतिः।१९३।
हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति।
वयस्येत्युत्तमैर्हंहो मध्यैरार्येति चाग्रजः।१९४।
हण्डे इत्यधमैर्वाच्यः कुमारो युवराजकः।
वदेद्राज्ञीं च चेटीं च भवतीति विदूषकः।१९५।

वत्स-पुत्रक-तातेति नाम्ना गोत्रेण वा सुतः ।
शिष्योऽनुजश्च वक्तव्योऽमात्येति सचिवो द्विजैः ।१९६।
साधो इति तपस्वीति प्रशान्तश्चोच्यते परैः ।
सौम्य भद्रमुखेत्येव मध्यमे नाम योजयेत् ।१९७।
तपस्विन्यो देवपत्न्यो वाच्या भगवतीति हि ।
कृताभिषेका महिषी भट्टिन्यन्यनृपस्त्रियः ।१९८।
ज्येष्ठस्वसा ज्यायसश्चभार्या चार्यति कथ्यते ।
पत्नी वाच्या स्वपुत्रस्य सम्बन्धेन च तत्पितुः ।१९९।
प्रियेति वाच्या शृङ्गारे भार्या राजेतरेण वा ।
स व तुल्यो वयस्येति ज्येष्ठा राज्ञः स्वसान्तिका ।२००।
इत्याद्युक्तिस्तु बहुधा ततः किञ्चिन्मयोदितम् ।
परं तु यस्य यत्कर्म शिल्पं वा जातिरेव वा ।२०१।
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोदितम् ।

अथ पात्रनामकरणम्—

भूपतीनां वीररसप्रधानं नाम कारयेत् ।
वीरवाहुः शत्रुमर्द्दो यथा पर-पुरंजयः ।२०२।
स्वशाखा-गोत्रनाम्ना वा शर्मान्तं विप्रनामकम् ।
धनाश्रयाणि नामानि वणिजां दत्तसंज्ञया ।२०३।
देवानां पुण्य-पर्याये देव इत्यन्ततो भवेत् ।
रक्षसां भीकरं नाम कार्यभङ्गगुणार्थकम् ।२०६।
कुम्भकर्णो वज्रदंष्ट्रो रावणश्चैवमादयः ।
गन्धर्वाणां रथाद्यन्तं यक्षाणां वल्लभान्तकम् ।२०७।
नाम कार्यं पिशाचानां बीभत्स-रससूचकम् ।
रक्तप्रियो वसागन्धो मांसलिप्तादि-नामभिः ।२०८।
दत्ता सेना च मित्रा च वेश्यानां नाम कारयेत् ।
पुष्पाणां हास्ययोगेन नाम्ना कुर्याद्विदूषकम् ।२०९।
लताकुसुमनामानि चेटीनां सम्प्रयोजयेत् ।
रत्नाभरणनाम्ना च सुशीला च प्रियम्वदा ।२१०।

हंस-स्त्री नामभिश्चापि नाट्ये कार्यः सखीजनः ।
लता-नदी-पुष्प-तारा नाम्ना कार्या तु नायिका ।२११।
मङ्गलार्थानि नामानि चेटीनां संप्रयोजयेत् ।
विजयस्थाननामानि रसपेशलनाम च ।२१२।
राजस्त्रीणां विधातव्यं ब्राह्मण्या गोत्रतद्धितैः ।
अनुक्तानां लोकतोऽपि यथा योगं नियोजयेत् ।२१३।

अथ वृत्तयः—

भारत्यारभटी चैव सात्त्वती कैशिकी तथा ।
चतस्रो वृत्तयः ह्येताः सर्वनाटस्य मातृकाः ।२१४।
सर्वत्र भारती चारभटी बीभत्सरौद्रयोः ।
सात्त्वती स्याद् वीररसे शृङ्गारे कैशिकी स्मृताः ।२१५।

तत्र भारती—

भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ।

संस्कृतबहुलो वाक्प्रधानो व्यापारो भारतीत्यर्थः ।

अथारभटी—

मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्त्यादिचेष्टितैः ।
संयुतावधवन्धाद्यैरुद्धतारभटी मता ।२१६।

अथ सात्त्वती—

सात्त्वती बहुला सत्त्व-शौर्य-त्याग-दयार्जवैः ।
सहर्षा क्षुद्रशृङ्गाराविशोका साद्भुता मता ।२१७।

अथ कैशिकी—

या श्लक्ष्णनेपथ्य-विशेष-चित्रा
स्त्रीसंकुला पुष्कलनृत्यगीता ।
कामोपभोगप्रभवोपचारा
स्यात् कैशिकी चारुविलासयुक्ता ।२१८।
प्ररोचनादीन्यङ्गानि सन्त्यासां तानि नालिखम् ।
निर्मितौ नाटकादीनामुपयुक्तानि तानि यत् ।२१९।

सन्धिबिन्दुपताकादेः पूर्वरङ्गादिकस्य च ।
नर्त्तनेऽनुपयुक्तत्वात्तस्योल्लेखोऽपि नो कृतः ।२२०।

अथ पात्राणि—

पात्रं त्रिधोत्तमं तत्र मध्यमं चाधमं भवेत् ।
तेषां बह्वीविधास्तस्माद् किञ्चिदुद्धृत्य लिख्यते ।२२१।

अथ पुरुषेषु उत्तमपात्राणि—

सुरगन्धर्वभूपाला अमूर्त्ता ये शरीरिणः ।
मुनिवासुकिशेषाश्च विद्वांसोऽप्युत्तमाः स्मृताः ।२२२।

अथ एषु मध्यमपात्राणि—

विद्याधरा राक्षसाश्च यक्षा वेतालजा गणाः ।
तपस्विनो ब्राह्मणाश्च ये चान्ये व्रतिनो जनाः ।२२३।
अमात्यः कञ्चुकी सूत्रधारः स्यात्पारिपार्श्विकः ।
विदूषकः पीठमर्द्दः पुरोधामन्त्रिणस्तथा ।२२४।
रथकारास्तथाऽम्वष्ठा सूतमागधवन्दिनः ।
सार्थवाहाः श्रेष्ठि-वर्ष इत्याद्या मध्यमाः स्मृताः ।२२५।

अथैष्वधमपात्राणि—

शूद्राः पिशाचाः कापाललिङ्गिशिल्पिदिगम्वराः ।
वैद्याः क्षपणकाव्रह्मवन्धवः पतितास्तथा ।२२६।
चण्डालाः पुक्वशाश्चापि यवनाश्च पुलिन्दकाः ।
नटचेटविटाश्वादि-वाहाश्चौराश्च धूर्त्तकाः ।२२७।
परस्वजीविनो दासा जन्त्वाजीवादयोऽधमाः ।

अथ स्त्रीषूत्तमपात्राणि—

उत्तमानामात्मजाश्च योषितश्चोत्तमाः स्मृताः ।
ब्राह्मणी नायिका राज्ञी तथा प्रव्राजिका अपि ।२२८।
अमात्य राजपुत्राणां सार्थवाहपुरोधसाम् ।
योषितस्तनयाश्चापि उत्तमाः परिकीर्त्तिताः ।२२९।

अथासु मध्यमाः—

धात्रेयिका सखी दूती प्रतिहारी च मालिनी
महाशद्रयश्च वेश्याश्च याश्च सामन्त-योषितः ।२३०

नटी च नर्तकी चैव उत्तमाप्यभिसारिका ।
मध्यमास्तु समाख्याता उत्तमा अपि योषितः ।२३१।

अथासु अधमाः—

कुट्टिनी पुंश्चली चेटी लिङ्गिनी शिल्पिनी तथा ।
म्लेच्छस्त्रियो वन्धकी च ब्रह्मवन्धोश्च योषितः ।२३२।
पापिन्यो दासगोपाल-वर्वराणां च योषितः ।
अनुक्तायास्त्रियस्ताश्च अधमेषु विनिर्दिशेत् ।२३३।

अथ पात्रप्रवेशप्रकारः—

पात्रप्रवेशो नृत्यज्ञैर्नानारीतिरुदीरिता।
ततस्ततः समाहृत्य प्रयोगार्हमुदीर्यते ।२३४।
सङ्गीतज्ञैर्वुधैः सार्द्धं नायके प्रेक्षके स्थिते ।
प्रविश्यरङ्गभूमिं च तिष्ठेयुः साम्प्रदायिकाः ।२३५।
वाद्यानां नादसाम्यं तु कृत्वावहितमानसाः ।
मेलापकं वादयेयुः प्रवन्धं नगरं ततः ।२३६।
ततो यवनिकान्तर्द्धौ वधानं कुसुमाञ्जलिम् ।
पात्रं तिष्ठेदधिष्ठाय स्थानकं सौष्ठवान्वितम् ।२३७।

सौष्ठवलक्षणं वक्ष्यते—

ततश्चोपसमारम्भेऽन्तर्द्धाने चापसारिते ।
सभाजनमनोहारी पात्रं रङ्गभुवं विशेत् ।२३८।
ततः पुष्पाञ्जलिं रङ्ग-मध्यतो विकिरेद्यतः ।
स्वयं चतुर्मुखः साक्षाद्रङ्गवाटमधिष्ठितः ।२३९।
ततः पात्रं प्रवन्धादीन नृत्यत्यानन्दनिर्भरम् ।
नाटकादिषु पात्राणां प्रवेशो बहुधा मतः ।२४०।
पराम्पर्यक्रमादेष देशे देशेऽभिनीयताम्(ते) ।
पण्डिताः गतिमिच्छन्ति भावमिच्छन्ति भूभुजः ।२४१।
युवानो रूपमिच्छन्ति शृङ्गारमितरेऽपि च ।

इतरे जनाः—

श‍ृङ्गारं भूषणं यस्मान्नाट्येषु समुदाहृतम् ।
तस्मादेतत् समाधाय नर्तकी नृत्यमाचरेत् ।२४२।
नानाविधैर्यथा पुष्पैर्माल्यं ग्रन्थाति माल्यकृत् ।
अङ्गोपाङ्गैरसैर्भावैस्तथा नाट्यं प्रदर्शयेत् ।२४३।
रङ्गे प्रविष्टे पात्रे तु यावत्पात्रान्तरागमः ।
तत्तद्ध्रुवाभिस्तन्मध्ये नर्त्तकी नृत्यमाचरेत् ।२४४।

अथ वर्ज्यानि—

भोजनं शयनं निद्रां युद्धं सुरतमेव च ।
अभ्यञ्जनोन्मर्द्दने च वाससः परिधापनम् ।२४५।
मण्डनालिङ्गनादीनि तथा वाह्यरतानि च ।
रङ्गमध्ये न कुर्वीत नखकेशादिकृन्तनम् ।२४६।
मधुपानं जलक्रीडामालेपनविधिं तथा ।
चूडाकञ्चुकवन्धं च तयोर्विश्रसनं तथा ।२४७।
कान्तपाद-प्रणामं च मानेषु च मृगीदृशाम् ।
अन्यल्लज्जाकरं यत्तु रङ्गे तत्परिवर्जयेत् ।
पितृ-पुत्र-स्नुषाश्वश्रू-दृश्यं यस्मात्तु नाटकम् ।२४८।

अथ नाट्यसमयः—

याममात्रं-समाप्यं यत्तन्नाट्यं रागवर्द्धनम् ।
दीर्घं विरागजनकमतो नाट्यं विवर्जयेत् ।२४९।
निद्रयापीडिताङ्गानां रसोद्वोधो न जायते ।
पेरणी गोण्डलीत्यादौ स एषः नियमः स्मृतः ।२५०।
न त्वयं नाटकादीनामिष्यतेऽभिनये वुधैः ।
इतिवृत्तं यतस्तेषां व्याप्नोति समयं बहुम् ।२५१।
तेषामभिनयोऽप्यापि यावद्रात्रिं भवेद्यतः ।

अथ साधुवादः—

अत्युत्साहं भवेत्पात्रं सभायाः साधुवादने ।
अतः पात्रस्य दुर्नृत्यं सभायां य उदाहरेत् ।२५२।

ब्रह्महा जायते सोऽपि वज्रं पततिं मूर्द्धनि ।
तत्साधुवादनादन्यद्वादनं. यः प्रयोजयेत् ।२५३।
गोवधस्य फलं प्राप्य स वै निरयमृच्छति ।
पुरोगत्वात् सभाभङ्गं यः करोति नराधमः ।२५४।
स मातृगः पितृघ्नश्च शिवद्रोही च जायते ।

अथाङ्गिकाभिनयः—

निर्वृत्तोऽङ्गैरभिनयो वुधैराङ्गिक ईर्यते ।
तत्राङ्गानां प्रधानत्वात्तान्युच्यन्ते समासतः ।२५५।
तत्राङ्गानामुपाङ्गानां प्रत्यङ्गानां निरूपणम् ।
यथामतीह भरत ! (क्रियते) शार्ङ्गदेवादिसम्मतम् ।२५६।
सप्ताङ्गानि शिरोंऽसोरः पार्श्वहस्तकटीपदम् ।
प्रत्यङ्गानि नवग्रीवावाह्वंसमणिवन्धकौ ।२५७।
पृष्ठोदरोरुजघांश्च जानुनी भषणानि च ।
द्वादशोपाङ्गानि मूर्धा दृक्-तारा-भ्रूपुटोमुखम् ।२५८।
नासे निःश्वासचिवुके जिह्वागण्डरदाधराः ।
मुखरागमुपाङ्गेषु शार्ङ्गदेवो गृहीतवान् ।२५९।
करयोस्तलमङ्गुल्यः करभावपि केचन ।
क्षेत्र-प्रचार-करण-कर्माणि करयोरपि ।२६०।
पादोरू तु रुपाङ्गानि पार्ष्णिगुल्फतलाङ्गुलीः ।
वक्षसस्तु स्तनौ पार्श्वे कट्योरप्येवमूहयेत् ।२६१।
सङ्गीतदामोदरे तु भिन्नमाह शुभंकरः ।
शिरः करोऽथ हृदयं जठरं पार्श्वयुग्मकम् ।२६२।
कटिश्चेति षडङ्गानि कथितानि शरीरिणाम् ।
स्कन्धौ वाहुः कूर्परश्च मणिवन्धः कराङ्गुलिः ।२६३।
उरू जानू च जङ्घे च चरणौ च तदङ्गुलिः ।
प्रत्यङ्गानि दशैतानि कथितानि मनीषिभिः ।२६४।
केशः स्तनौ च धम्मिल्लो ललाटं भ्रूयुगं तथा ।
चक्षुश्च नेत्रकोणश्च दृष्टिस्ताराश्रुतिस्तथा ।२६५।

शंख-गण्डौ हनुर्नासा कपालौष्ठोदराण्यपि ।
निःश्वासजिह्वे चिबुकं मुखं तद्राग एव च ।२६६।
ग्रीवा चेति त्रयोविंशत्युपाङ्गानि विदुर्बुधाः ।
किमङ्गं कतिधेत्यादौ तत्क्रमाद्विवृणोम्यहम् ।२६७।
अनेकार्था यथा शब्दा व्यापारा आङ्गिकास्तथा ।
द्योतयन्ति बहूनर्थान् प्रयोगाच्चार्थ-निर्णयः ।२६८।
प्रयोगस्यापि शरणं लोकः शास्त्राण्यपि क्वचित् ।
लोकशास्त्रानुसारेण तस्मादेषां विनिर्णयः ।२६९।

तत्रादौ शिर आह—

धूतं विधूतमाधूतमवधूतं च कम्पितम् ।
आकम्पितोद्वाहिते च परिवाहितमञ्चितम् ।२७०।
निकुञ्चितं परावृत्तमुत्क्षिप्ताधोमुखे तथा ।
लोलितं चेति विज्ञेयं चतुर्दशविधं शिरः ।२७१।
लक्षणं विनियोगश्च यथोद्देशमुदीयते ।

धूतम्—

क्रमेण शनकैस्तिर्यक् धूतमुक्तं धुतं शिरः ।
प्रतिषेधेऽनीप्सिते च विषादे विस्मये भवेत् ।२७२।

विधूतम्—

धूतमेव भवत् शीघ्रं भ्रमणाद्विधुतं शिरः ।
शीतार्ते ज्वरिते भीते सद्यः पीतासवे त्विदम् ।२७३।

आधूतम्—

आधूतं च सकृत्तिर्यगूर्द्ध्वं नीतं शिरः स्मृतम् ।
गर्वेण स्वाङ्गवीक्षायां पार्श्वस्थोर्द्ध्वनिरीक्षणे ।
शक्तोऽस्मीत्यभिमानेन योज्यमङ्गीकृतावपि ।२७४।

अवधूतम्—

यदधः सकृदानीतमवधूतं तदुच्यत ।
स्थित्यर्थं देशनिर्द्देशे आलापादानयोरपि ।
उपविष्टाल्पनिद्रायां संज्ञायां च प्रयुज्यते ।२७५।

कम्पितम्—

बहुशः शीघ्रमूर्द्धाधः कम्पनात् कम्पितं शिरः ।
ज्ञानेऽभ्युपगमे रोषे वितर्के तर्जने भवेत् ।२७६।

आकम्पितम्—

कम्पितं द्विःप्रयुक्तं चेन्मन्दमाकम्पितं भवेत् ।
पुरःस्थ वस्तु-निर्देशे चित्तस्थार्थ-प्रकाशने ।२७७।

उद्वाहितम्—

सकृदूर्द्धं शिरोनीतमुद्वाहितमितीरितम् ।
शक्तोऽहमिह कार्येऽस्मीत्यभिमाने प्रयुज्यते ।२७८।

परिवाहितम्—

शिरसो मण्डलाकारं भ्रमणात्परिवाहितम् ।
विचारे विस्मये हर्षे स्मिते क्रोधेऽनुमोदिते ।२७९।

अञ्चितम्—

किञ्चित्पार्श्वनतग्रीवं ज्ञेयमस्तकमञ्चितम् ।
रुग्चिन्तामोहमूर्च्छासु तत्कार्यं हनुधारणे ।२८०।

हनुधारणं तु शिरोमणौ दृश्यते, न दृश्यते इत्यन्यत्र ।

निकुञ्चिमम्—

उत्क्षिप्तबाहुशिखरं भुग्नग्रीवं निकुञ्चितम् ।
विलासे ललिते गर्वे विव्वोके किलकिञ्चिते ।
मोट्टायिते कुट्टमिते माने स्तम्भे च तद्भवेत् ।२८१।

विलासादिकं तु अलङ्कारशास्त्रे प्रसिद्धम् ।

परावृत्तम्—

पराङ्मुखीकृतं शीर्षं परावृत्तमितीरितम् ।२८२।
तत्कार्यं कोपलज्जादिकृते वक्त्रापसारणे ।
परावृत्तानुकरणे पृष्ठतः प्रेक्षणे तथा ।२८३।

उत्क्षिप्तम्—

उर्द्ध्वं वक्त्रं शिरो ज्ञेयमत्क्षिप्तं तत्प्रयुज्यते ।
दर्शने तुङ्गवस्तूनां चन्द्रादिव्योमगामिनाम् ।२८४।

अधोमुखम्—

लज्जादुःखप्रणामेषु स्याद्यथार्थमधोमुखम् ।२८५।

लोलितम्—

शिरः स्याल्लोलितं मन्दं मन्दं सर्वत्र लोलनात् ।
निद्रागद-ग्रहावेश-मदमूर्च्छासु सम्मतम् ।२८६।

किं च—

सममारात्रिकं तिर्यक्स्कन्धानतनतोन्नते ।
पार्श्वभिमुखमित्यन्ये भेदान् पञ्च परे जगुः ।२८७।

एषूच्यते समं तूक्तान्तर्गतत्वात् न चापरे ।
निर्विकारं स्वभावस्थं शिरः सममुदीर्यते । २८८।
तच्च पूजाजपध्यान–स्वामिसेवादिषु स्मृतम् ।

अथांसौ—

एकोच्चौ कर्णलग्नौ चोच्छ्रितौ स्रस्तौ च लोलितौ ।
इत्युक्तौ पञ्चधा स्कन्धौ नाम्नैव व्यक्तलक्षणौ ।२८९।

एकोच्चौ कथितौ स्कन्धौ मुष्टिकुन्तप्रहारयोः ।
आश्लेषे शिशिरे चांसौ कर्ण्णलग्नौ सतां मतौ ।२९०।

उच्छ्रितौ हर्षगर्वादौ स्रस्तौ दुःखे श्रमे मदे ।
मूर्च्छायां चाथ कर्त्तव्यौ लोलितौ विट-नर्तने ।
नृत्यज्ञैर्गदितो हास्ये हुडुक्का वाद्य-वादने ।२९१।

इत्यंसौ पञ्चधा ।

अथ उरः—

स्याद्वक्षः सममाभुग्नं निर्भुग्नं च प्रकम्पितम् ।
उद्वाहितं पञ्चधेति तेषां लक्ष्माभिधीयते ।२९२।

सौष्ठवाधिष्ठितं वक्षश्चतुरस्राङ्गसंश्रयम् ।

समम्—

प्रकृतिस्थं समं प्राहुः स्वभावाभिनये समम् ।२९३।

आभुग्नम्—

निम्नं शिथिलमाभुग्नं वक्षः स्यात्स्पर्शलज्जयोः ।
शीतहृच्छल्ययोः शोके मूर्च्छाभीसंभ्रमेषु च ।२९४।
कार्यं व्याधौ विषादे च ब्रूते शङ्कर-किङ्करः ।

निर्भुग्नम्—

निर्भुग्नं निम्नपृष्ठत्वादुन्नतं स्तब्धमग्रतः ।२९५।
माने च सत्यवचने स्तम्भे विस्मय-वीक्षणे ।
प्रहर्षभाषणे गर्वे शोके चेदं प्रचक्षते ।२९६।

प्रकम्पितम्—

प्रकम्पितं कम्पितं स्यादूर्द्धक्षेपैर्निरन्तरम् ।
स्याद्धिहासश्रमश्वासकासहिक्कासुरोदने ।२९७।

उद्वाहितम्—

कम्पितं सरलोत्क्षिप्तमुद्वाहितमुदीरितम् ।
दीर्घोच्छ्वासे च जृम्भायामुत्तुङ्गालोकने च तत् ।२९८।

अथ पार्श्वम्—

विवर्त्तितं चोपसृतं प्रसारितमथोन्नतम् ।
उन्नतं चेति संचख्युः पार्श्वं पञ्चविधं बुधाः ।२९९।
विवर्त्तना त्रिकस्य स्यात्परावृत्ते विवर्त्तितम् ।
तन्निवृत्याप्युपसृतं भवेत्पार्श्वविवर्त्तने ।३००।
प्रसारितं तूभयतो विस्तारात् स्यान्मु(म) दादिषु ।
न्यञ्चितं सनितम्बं तून्नतं स्यादुपसर्पणे ।३०१।

अथ हस्तः—

असंयुताः संयुताश्च नृत्यहस्ता इति त्रिधा ।
हस्तकः कथितस्तज्ज्ञैः सामान्य-नृत्यभेदतः ।३०२।
हस्तेनैकेन कर्माणि येषां ते स्युरसंयुताः ।
येषां हस्तद्वयेनैव कर्म ते स्युरसंयुताः ।३०३।
नृत्यमात्रस्थिता ये तु न किञ्चिद्वस्तु वाचिनः ।
अङ्गहारेण सहिता नृत्यहस्ता तु ते मताः ।३०४।

उत्तानः पार्श्वगश्चैव तथाधोमुख एव च ।
हस्त प्रचारस्त्रिविधो भरतेन प्रकीर्त्तितः ।३०५।

क्वचित्तु—

उत्तानोऽधस्तलः पार्श्वतलो हस्तोऽग्रतस्तलः ।
स्वसम्मुखतलश्चोर्द्ध्वमुखोऽधोवदनस्तथा ।३०६।
पराङ्मुखः संमुखश्च हस्तोऽन्यः पार्श्वतो मुखः ।
उर्द्ध्वगोऽधोगतः पार्श्वगतो हस्तस्तिरोगतः ।३०७।
संमुखगत इत्याहुर्हस्तान् पञ्चदशापरे ।
पञ्चधेत्यपरे प्राहुस्तेष्वत्रान्तर्भवन्ति हि ।३०८।
अथ क्रमेण कथ्यन्ते हस्तका लक्ष्यलक्षणैः ।
पुराणानां नवानां चाचार्याणां मतसंश्रयात् ।३०९।

तत्र क्रमप्राप्तानसंयुतानाह—

पताकस्त्रिपताकार्द्धचन्द्राख्यः कर्त्तरीमुखः ।
अराल-मुष्टि-शिखर-कपित्थ-खटकामुखाः ।३१०।
शुकतुण्डः काङ्गुलश्च पद्मकोषोऽलपल्लवः ।
सूचीमुखः सर्पशिराश्चतुरो मृगशीर्षकः ।३११।
हंसास्यो हंसपक्षश्च भ्रमरो मुकुलस्तथा ।
ऊर्ण्णनाभश्च संदंशस्ताम्रचडोऽपरः करः ।३१२।
अमी असंयुता हस्ताश्चतुर्विंशतिरीरिताः ।
उपधानं सिंहमुखं कदम्बश्च निकुञ्चकः ।३१३।
असंयुतेषु चतुरोऽधिकानेतान् परे जगुः ।
त्रिंशद्दामोदरेणोक्ता अमी हस्ता असंयुताः ।३१४।
असंयुता अर्थवशादेते स्युः संयुता अपि ।

किं च—

पताकप्रकृतित्वेन बहुहस्तो भवत्यतः ।
विनियोगबहुत्वाच्च प्रथमं स निगद्यते ।३१५।
अङ्गुष्ठो यत्र वक्रः सन् तर्जनीमूलसंश्रितः ।
ऋजवोऽङ्गुलयः श्लिष्टाः स पताक इति स्मृतः ।३१६।

एष स्पर्शे (तपे ?) चैव पताका तालिकादिषु ।
ज्वालामूर्द्धगतास्तस्याङ्गुल्यः प्रविरलाश्चलाः ।३१७।
धारास्वधोगता (?) पक्षिपक्षे त्वस्य कटिस्थितिः ।
ऊर्द्धं गच्छन् मुच्छ्रितेषु पुष्कर-प्रहृतौ त्वधः ।३१८।
ऊर्द्धं गच्छन् कटिक्षेत्रादुत्क्षेपाभिनये करः ।
आभिमुख्ये मुखक्षेत्रमागच्छन्निजपार्श्वगः ।३१९।
कम्पः पार्श्वे निषेधे च पार्श्वे विभजने पृथक् ।
पताकं च शनैर्घर्षन्मर्द्दने मार्जने तथा ।३२०।
शिलादिस्थूलवस्तूनां धारणोत्पाटनादिषु ।
उच्छ्रितौ विच्युतौ कार्यावेतावन्योन्यसम्मुखौ ।३२१।
अधोगतोच्छ्रितचलाङ्गुलिवार्यूर्मिवेगयोः ।
सरः पल्वलनिर्द्देशे स्वस्तिकीभूय विच्युतौ ।३२२।
कार्यौ पताकौ विश्लिष्य स्वस्तिकाकरणं गतौ ।
छेदने गोपनादर्शवाचन-प्रोच्छनेषु च ।३२३।
अधोमुखोत्तानतलौ हस्तौ किञ्चित् प्रसारितौ ।
कृत्वा प्रदर्शयेद् वेलां विलं ग्राहं गृहं गुहाम् ।३२४।

यद्यपि निर्विशेषेण हस्तप्रयोगा उक्तास्तथापि लोकप्रयुक्ति-मनुसृत्य एव प्रयोज्यम् । तदुक्तम्––

लोकप्रयोगमुद्वीक्ष्य नाट्यज्ञमुपजीव्य च ।
तत्तच्चेष्टानुसारेण हस्तकान् संप्रयोजयेत् ।३२५।
घर्षणच्छेदनादर्श विभागादौ स्फुटं हि तत् ।

इति पताका ।

पताकस्त्रिपताकः स्याद्वक्रिता चेदनामिका ।
एष दध्यादिमाङ्गल्य-द्रव्यस्पर्शे प्रयुज्यते ।३२६।
पराङ्मुखस्यादाह्वाने लग्नद्वयङ्गुलिकुञ्चनात् ।
कर्तव्योऽसौ पार्श्वतलो नमस्कारे शिरोगतः ।३२७।
अस्त्रे तन्मार्जने तस्मादधो यान्तीमनामिकाम् ।
नेत्रक्षेत्रगतां विभ्रत्तिलके तु ललाटगाम् ।३२८।

समुत्तानाङ्गुलियगो वदनोन्नमने भवेत् ।
सन्देहेऽङ्गुलियुग्मे तु क्रमात्कार्यं नतोन्नतम् ।३२९।
वहिःक्षिप्ताङ्गुलिद्वन्द्वोऽधस्तनोऽनादरोज्झिते ।
मूर्द्धोऽन्तेऽधोमुखः कार्यो भ्रमश्चुष्णीषधारणे ।३३०।
तादृशो मस्तकादूर्द्ध्वं कार्यो मुकुटधारणे ।
पक्षिस्रोतोऽनिलेषूर्द्ध्वमधस्तिर्यग्व्रजन् क्रमात् ।३३१।
कटिक्षेत्रगतो विभ्रदधोमुखचलाङ्गुलिः ।
अलकस्यापनयने ललाटादलकाश्रितः ।३३२।
दुर्गन्धे दुर्वचसि च दुःशब्दश्रवणेऽपि च ।
अङ्गुलिभ्यां क्रमात् कुर्वन्नासास्यश्रोत्र-संवृतिम् ।३३३।
उत्तानाधोमुखान्योन्याग्रसंश्लिष्टौ विवाहने ।
अधोमुखौ स्वस्तिकौ तु गुरूणां पादवन्दने ।३३४।
भालस्थौ स्वस्तिकौ कार्यौ विच्युतौ नृपदर्शने ।
तिर्यग् विश्लिष्य सम्बद्धौ स्यातां तौ गृहदर्शने ।३३५।
तपस्वि-दर्शने कार्यावूर्द्ध्वौ चापि पराङ्मुखौ ।
परस्परस्याभिमुखौ कर्त्तव्यौ द्वारदर्शने ।३३६।
स्त्रियं नितम्बादास्कन्धं सव्यपार्श्वे व्रजन् तनोः ।
उत्तानाधोमुखौ कार्यावग्रे वक्त्रसमं स्थितौ ।३३७।
वडवानलनक्राणां मकराणां च दर्शने ।
संमुखप्रसृताङ्गुष्ठः कार्यो वालेन्दुदर्शने ।३३८।
पराङ्मुखोऽधोऽङ्गुष्ठस्तु रथतच्चक्रदर्शने ।

इति त्रिपताकः ।

यस्याङ्गुल्यस्तु विनताः सहाङ्गुष्ठेन चापवत् ।
अर्द्धचन्द्राकृतिः सोऽयमर्द्धचन्द्राभिधः करः ।३३९।
असौ पराङ्मुखः खेदे कपोल-फलकं दधत् ।
अन्योन्यसंमुखौ तिर्यङ्मध्यौपम्येन संयुतौ (?) ।३४०।
ताटङ्के कर्णगौ लोकदृष्ट्या निष्कासने वलात् ।
कङ्कणे मणिवन्धस्थो मण्डलाकारमाप्नुवन् ।३४१।

असंयुतावूर्द्ध्वं गतावुत्थितौ वालपादपे ।
शङ्खे तु तौ मुखान्तस्थौ पुरतोऽभिमुखौ घटे ।३४२।
मेखलायां कटिक्षेत्रे गतौ स्यातामधोमुखौ ।

इत्यर्धचन्द्रः ।

त्रिपताकस्य हस्तस्य तर्जनी संश्रिता यदि ।
मध्यमाङ्गुष्ठ संस्पृष्ट्वा तदासौ कर्तरीमुखः ।३४३।
अधोमुखोऽध्वकथने रञ्जनेऽङ्घ्रेरधोमुखः ।
दर्शने नासिका क्षेत्रात्कार्यः कर्णान्तिकं गतः ।३४४।
द्विस्त्रिर्योज्योऽयमग्रस्थोत्तानः पुस्तक-वाचने ।
मस्तकस्थाविमौ कार्यौ शृङ्गाभिनयकर्मणि ।३४५।

इति कर्त्तरीमुखः ।

आद्या धनुर्नताङ्गुष्ठः कुञ्चितस्तलमध्यगः ।
आश्लिष्टार्द्धनताः शेषा यत्रारालः स कीर्त्तितः ।३४६।
वलोत्साहधृतिः स्थैर्य-गर्व-गाम्भीर्यसूचने ।
नाभिक्षेत्रादूर्द्ध्वमेनं प्रापयेत्मस्तकावधि ।३४७।
आशीर्वादे हृदिस्थोऽयं श्राद्धकृत्ये बहिर्मुखः ।
वन्धे मोक्षे स्त्रीकचानां द्विस्त्रिर्वा मण्डलाकृतिः ।३४८।
आव्रह्मयज्वसङ्घे स्यादाह्वाने पतदङ्गुलिः ।
प्रदक्षिणे देवतादेर्भ्रमन् कार्यं प्रदक्षिणम् ।३४९।
कस्त्वं क्वाहं क्वसम्वन्ध इत्यसम्वद्धभाषणे ।
पुनः पुनर्बहिः क्षिप्त्वाङ्गुलिरेष प्रयुज्यते ।३५०।
भालस्वेदापनयने भालस्थोऽयमधोमुखः ।
सव्योत्थितेन हस्तेन ह्यरालेन शिरः स्पृशेत् ।३५१।
वीरेऽभिवादने ह्येतदप्रत्यक्षे बिधीयते ।
ज्ञेयान्यराले कर्माणि त्रिपताकोदितान्यपि ।३५२।
पुंसामरालविहितं त्रिपताकेन युज्यते ।
तत्र युक्तमरालोक्तं स्त्रीणामित्याह सिंहणः ।३५३।

इत्यरालः ।

अङ्गुल्यग्रेषु हस्तान्तःस्थितेष्वाश्लिष्टसन्धिषु ।
निष्पीड्य मध्यमां तिष्ठत्यङ्गुष्ठे मुष्टिरुच्यते ।३५४।

पक्षधरस्तु—

अङ्गुल्यस्तलमध्यस्थाः सर्वाङ्गुष्ठनिपीडिताः ।
तथैवाङ्गुष्ठगर्भा वा भवेयुः मुष्टिके करे ।३५५।
एष प्रहारे व्यायामे निर्दयस्तनपीडने ।
सम्वाहनेऽसियष्टीनां दण्डकुन्तग्रहे तथा ।३५६।
धावने प्राङमुखाङ्गुष्ठः चापेऽङ्गुष्ठनिपीड़ितः ।
दोहने मल्लयुद्धादौ मध्यगाङ्गुष्ठको भवेत् ।३५७।
रसवद्द्रव्यजातस्य रसनिष्पीडनेऽपि च ।

इति मुष्टिः ।

मुष्टिरूर्द्ध्वं कृताङ्गुष्ठः शिखरः परिकीर्तितः ।
शक्तितोमरयोर्मोक्षे धनुर्भल्लाङ्कुशग्रहे ।३५८।
रञ्जनेऽधरदन्तस्याप्यलकोत्क्षेपणेऽपि च ।
मुष्टयुक्तेष्वपि योज्योऽयमिति केचिद्वभाषिरे ।३५९।

इति शिखरः ।

तर्जनी शिखराख्यस्य वक्राङ्गुष्ठाग्रपीडिता ।
यदा तदा कपित्थः स्यात्स एवेत्याह कोहलः ।३६०।

सङ्गीतकल्पतरौ तु—

'अङ्गुष्ठवामभागे तु तर्जनी पीडयेद्यदि' । इत्युक्तं
शरचापचक्रतोमरकुन्तगदाशक्तिवज्रचर्म्माणि ।
शस्त्राण्यभिनयानि तु कार्यं मिथ्या च सत्यं च ।३६१।
परशुतुर्यादिकमपि यदि खलु नन्दादिकं चापि ।

केचित्तु—

शिखरकपित्थावितरे कार्यकारिणौ प्राहुः ।३६२।

इति कपित्थः ।

अनामिकाकनीयस्याव्युत्क्षिप्ते वक्रिते मनाक् ।
विरले चेत् कपित्थस्य तदा स्यात् खटकामुखः ।३६३।

परशुरामसंहितायां तु शराभ्यासप्रकरणे—

तर्जनीं मध्यामामध्ये पुंखोऽङ्गुष्ठेन पीड्यते ।
तस्मिन्ननामिका-योगात् सहस्तः खटकामुखः ।३६४।
उत्तानेऽसौ युगादौ (?) स्याद्वस्त्रचामरधारणे ।
कुसुमावचये छत्रस्रग्दामधारणे तथा ।३६५।
शरमन्थाकर्षणे च संमुखे दर्पणग्रहे ।
कस्तूरिकादिवस्तूनां पेषणेऽधस्तनौ करौ ।३६६।
ताम्बूलवीटिकावृन्तच्छेदनादौ त्वयं स्मृतः ।
वल्गाव्यजनपात्राणां प्रच्छदांशुकदर्भयोः ।३६७।
स्रुवस्रुचो धारणे च नीवीमोक्षे च वन्धने ।

इति खटकामुखः ।

शुकतुण्डोऽरालतर्जन्यनामे वक्रिते भृशम् ।३६८।

शिरोमणौ—

ईषदङ्गुष्ठाग्रलग्नाऽनामिका तर्जनी यदा ।इति।

कल्पतरौ—

अरालस्य यदा वक्रा नामिका त्वङ्गुलिर्भवेत् ।३६९।
न त्वं नाहं न मम त्वयास्ति कृत्यं शठेति वचनादौ ।
आवाहने विसर्गे धिग्वचने चाप्यवज्ञायाम् ।३७०।
दूताक्षपातने चायं लेखनस्य च धारणे ।
वीणादि-वादने चास्य प्रयोगः कैश्चिदिष्यते ।३७१।

इति शुकतुण्डः ।

स काङ्गुलो यत्रवक्राऽनामिकोर्द्धा कनीयसा ।
ऊर्द्धास्त्रेताग्नि संस्थानास्तर्जन्याङ्गुष्ठमध्यमा ।३७२।
मित ग्रासे फलेऽल्पे च शिशोश्चिवुकधारणे ।
विडाल-पदवैदूर्य - कुचाग्राभिनयेऽप्ययम् ।३७३।

इति काङ्गुलः ।

साङ्गुष्ठाङ्गुलयो यस्मिन्नलग्नाग्रा धनुर्नता ।
विरलाः पद्मकोषोऽसौ कार्यो देर्वार्चने वलौ ।३७४।
द्विस्त्रिर्वा विप्रकीर्णाग्रः पुष्पाणां प्रकरे करः ।
भूमिस्थितार्थग्रहणे कुञ्चितागस्त्वधोमुखः ।३७५।
व्याघ्राणां चैव सिंहानामामिषग्रहणे तथा ।
विरलाङ्गुलिकौ श्लिष्टप्रकोष्ठौ द्वावधोमुखौ ।३६७।
फुल्लाब्जेन्दीवरादौ च कर्त्तव्यौ द्वावितीतरे ।

इति पद्मकोषः ।

करणं व्यार्वात्ततं वा कृत्वा वा परिर्वातितम् ।
यस्याङ्गुल्यः करतले पार्श्वस्थाः सोऽलपल्लवः ।३७७।
वक्षते करणे पश्चान्नामास्याप्यलपद्मकः ।
कस्य त्वमिति नास्तीति वाक्ययोः प्रतिषेधने ।३७८।
तुच्छायुक्तानृतासूक्तिष्वेष स्त्रीणां प्रयुज्यते ।

इत्यलपल्लवः ।

सूचीमुखश्चोर्द्ध्वगा चेत् खटकामुखतर्जनी ।
चक्रे भ्रमन्ती वलयाकारमूर्द्ध्वगतर्जनी ।३७९।
तथा भ्रमति चक्रे सा कुलालस्याप्यधोमुखी ।
भ्रमन्ती पार्श्वगा सैव रथ-चक्र-निरूपणे ।३८०।
श्वासे नासास्थितैकत्वे ऋजुरूर्द्ध्वापि तर्जने ।
कर्णावतंसे यान्ती सा कर्णान्तं दरकम्पिता ।३८१।
वक्रयाने कु(म)ण्डलिता स्तवकेऽल्पप्रसारता ।
संयोगे तर्जनीयुग्मं पार्श्वयुक्तमधस्तलम् ।३८२।
कार्ये वियुक्ते(विरक्ते) विरहे कलहे स्वस्तिकाकृतिः ।
सिंहशार्द्दूलदंष्ट्रायां पार्श्वे किञ्चित्तु वक्रितौ ।३८३।
ओष्ठप्रान्तगतौ कार्यावुभौ सूचीमुखौ करौ ।
भ्रामयन् मण्डलाकारं पातने पातयेदधः ।३६४।
ऊर्द्ध्वा भवेत्पताकायां साधुवादेऽपि दोलिता ।
आयान्ती दीर्घमूर्द्ध्वाधः सौदामिन्यां प्रदेशिनी ।३८५।

कर्णकण्डूयने दुर्वाक्श्रुतौ श्रवणरन्ध्रगा ।
परिवेशे तिरश्चीना भ्रमन्ती मण्डलाकृतिः ।३८६।
शिवस्याभिनये भालसम्बद्धास्यादधोमुखी ।
तिरश्चीनोद्धृता च स्याद्वासवस्य निरूपणे ।३८७।
इति सूचीमुखः ।

निम्नमध्यपताके यः स हि सर्पशिरोमतः ।
अधोमुखः सर्पगतावुत्तानो देवतर्पणे ।३८८।
मल्लदोर्गजकुम्भानामास्फालने मानभिद्यपि ।
इति सर्पशिराः ।

यस्याङ्गुष्ठो मध्यमाया मध्यपर्वोदरं श्रितः ।
ऊर्द्ध्वा भवेत् कनिष्ठा चेच्चतुरं तं करं विदुः ।३८९।
केचित् पताकाङ्गुष्ठं तु मध्यमा-मध्य-संगतम् ।
कनीयसीमनामाया पृष्ठगामपरे जगुः ।३९०।
मुखक्षेत्रगतो नीतौ हृदि तर्कविचारयोः ।
विनये द्वाविमौ कार्यौ संश्लिष्टमणिवन्धकौ ।३९१।
सुरते स्वस्तिकाकारौ वालके स्यादधोमुखौ ।
उत्तानौ नयनौपम्ये पद्मपत्र-निरूपणे ।३९२।
उद्वेष्टितः स्याल्लीलायां स्यदुत्तानोऽक्षपातने ।
अङ्गुष्ठमध्यमाऽन्योन्यमर्द्दनेन तु मर्द्दनम् ।३९३।
चातुर्योक्तौ युतौ कार्यो विचारे पार्श्वगोऽप्ययम् ।
चतुरस्यापरानर्थान् जानीयाल्लोकतो वुधः ।३९४।
इति चतुरः ।

उर्द्ध्वगे सर्पशिरसो यदाङ्गुष्ठकनिष्ठिके ।
तदायं मृगशीर्षः स्याद्धस्तोऽधोवदनो यदि ।३९५।
इहास्ति सांप्रताद्यर्थेषूत्तानोऽक्षस्य पातने ।
स्वेदावमृष्टौ गण्डस्थः काञ्च्याकर्षे प्रकम्पितः ।३९६।
इति मृगशीर्षः ।

त्रेतावत् स्थिता लग्नास्तर्जन्यङ्गुष्ठ-मध्यमाः ।
हंसास्यो विरले चोर्द्ध्वे यत्रानामाकनिष्ठिके ।३९७।
निःसारश्लक्ष्णमृदुषु मर्द्दिताग्राङ्गुलित्रयम् ।
शिथिलेऽल्पे लघावग्रं दधदग्रं विधूनितम् ।३९८।
मुक्ताफलादौ कुसुमावचयादौ यथोचितम् ।
इति हंसास्यः ।

तर्जन्याद्याः पताकस्य तिस्रोऽङ्गुल्यो नताः समाः ।
ऊर्द्ध्वा कनीयसी यत्र हंसपक्षः स उच्यते ।३९९।
अयमाचमने कार्यश्चन्दनाद्यनुलेपने ।
प्रतिग्रहे त्रिपुण्ड्रे तु भालक्षेत्रगतः करः ।४००।
मण्डलीकृतवाहू तौ महास्तम्भप्रदर्शने ।
आलिङ्गने च प्रत्यक्षे परोक्षे स्वस्तिकाकृतिः ।४०१।
निर्वेदादौ यथौचित्यं चिन्तायां हनुमध्यगः ।
स्त्रीणां विभ्रमभेदेषु स्थापनीयः स्तनान्तरे ।४०२।
इति हंसपक्षः ।

अङ्गुष्ठमध्ये लग्नाग्रे चापवत्तर्जनी नता ।
कनिष्ठानामिके दीर्घे विरले भ्रमरः करः ।४०३।
पुष्पाणां दीर्घवृन्तानामादानेऽयं प्रयुज्यते ।
कर्ण्णपत्रे (पूरे) तालपत्रे कण्टकोद्धरणादिष ।४०४।
इति भ्रमरः ।

पञ्चाङ्गुल्योऽपि यत्रोर्द्ध्वा लग्नाग्रा मुकुलः करः ।
वलिपद्मादिमुकुलभाजनेष्वमरार्च्चने ।४०५।
चुम्वनप्रार्थनायां च पञ्चसंख्या-प्रकाशने ।
मुहु (मृदु) विकाश्यप्रकृतिर्नीतोदाने त्वरान्विते ।४०६।
कुचकक्षादिदेशस्थः (?) स्यादाच्छुरितके करः ।
कामिनीकुचकक्षादौ सशङ्कं (ङ्कं) नख-लेखनम् ।४०७।
यदङ्गुलीपञ्चकेन तदाच्छुरितकं विदुः ।
इति मुकुलः ।

स उर्णनाभो विरला यत्राङ्गुल्यः सुवक्रिताः ।४०८।
कुष्ठव्याधेरभिनये शिलादि-ग्रहणेष्वयम् ।
शिरःकण्डूयने सिंह-व्याघ्रादौ चिवुकस्थितः ।४०९।
इत्युर्णनाभः ।

मध्याद्यङ्गुलयो यत्राल्पवक्राः स्व स्वपार्श्वगाः ।
लग्नाग्रतर्जन्यङ्गुष्ठं स संदशो नतस्थ (स्त) ले ।४१०।
स त्रिधास्यादग्रजश्च मुखजः पार्श्वजः क्रमात् ।
प्राङ्मुखः सम्मुखः पार्श्वमुख इत्यस्य लक्षणम् ।४११।
कण्टकोद्धरणे सूक्ष्मप्रसूनावचये तथा ।
कुसुमोद्धरणे वृन्तादग्रसंदंश इष्यते ।४१२।
वर्त्यञ्जनशलाकादिपूरणे मुखजो मतः ।
मणिमुक्ताप्रवालानां गुणनिक्षेपणे तथा ।४१३।
वेधनेऽपि च मण्यादेस्तथा सत्य (तत्त्)स्यभाषणे ।
ध्यानस्याभिनये (भ्यसने)सूक्ष्म त्रिगुणादिनिरूपणे ।४१४।
चित्रकर्मण्यलक्तादि निष्पीडादौ च पार्श्वजः ।
पार्श्वाभिमुखहस्ताभ्यां निर्धनत्वं प्रकाशयेत् ।४१५।
इति संदशः ।

अङ्गुष्ठाग्रं मध्यमाग्रे कुटिला यदि तर्जनी ।
शेषाङ्गुल्यो तलस्थे चेत्ताम्रचूड़ करो भवेत् ।४१६।
ऊर्द्धीकृत कनिष्ठां तु मुष्टिमन्ये प्रचक्षते ।
प्रयोगोऽस्य सहस्रादि-संख्यानिर्द्देशनादिषु ।४१७।
क्षिप्रमुक्ताङ्गुलिरयं विप्रुषो लक्षयेदिति ।
पूर्वस्तु वालकाह्वाने भर्त्सने परिकीर्त्तितः ।४१८।
क(?)लादि काले शैघ्र्ये च छोटिकायां सशब्दवान् ।

छोटिकालक्षणमाह—कल्पतरुः—

सशब्दं यदि संदशमोक्षः स्याच्छोटिकोच्यते ।४१९।
इति ताम्रचूडः ।

पताको गण्डविन्यासादुपधान इतीरितः ।
निद्रायामथ चिन्तायामुपधाने प्रयुज्यते ।४२०।
इत्युपधानः ।

अधोमुखाङ्गुष्ठकोटौ लग्नाग्रा चेत्कनिष्ठिका ।
मध्यास्तिस्रोऽति संयुक्ताः स सिंहास्य उदीर्यते ।४२१।
सिंहास्याभिनये त्वेष मेलने द्रवचूर्ण्णयोः ।
इति सिंहास्यः ।

संहतामङ्गुलीनां च वर्त्तुलाकारमेलनम् ।
कदम्वहस्तं तं प्राहूरसास्वदेष्वसौ भवेत् ।४२२।
इति कदम्वः ।

पताके मध्यमामूलमङ्गुष्ठो यत्र संश्रयेत् ।
निकुञ्चकः स स्वल्पार्थे वेदस्याध्यापनेऽपि च ।४२३।
इति निकुञ्चकः ।

इत्यसंयुतहस्ताः

अथ क्रमप्राप्तं संयुतमाह—

अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा ।
दोलिपुष्पपटोत्सङ्गखटका-वर्द्धमानकाः ।४२४।
गजदन्तश्चावहित्था निषेधो मकरस्तथा ।
वर्द्धमानश्चेतहस्ताः संयुताः स्युः त्रयोदश ।४२५।
पताकहस्तौ तलयोः संश्लिष्टौ चेत्तदाञ्जलिः ।
नमस्कारे देवतानां शिरस्थोऽयमुदीरितः ।४२६।
गुरूणां च नमस्कारे मुखक्षेत्रगतो भवेत् ।
नमस्कारे तु विप्राणां हृदिस्थः सद्भिरिष्यते ।४२७।
अन्येष्वनियमो ज्ञेयः स्त्रीभिः कार्यो यथेप्सितः ।
इत्यञ्जलिः ।

मूलपार्श्वाग्र-संश्लिष्टौ विश्लिष्टौ तलयोः करौ ।
स कपोतः केचिदेनं कूर्ममाहुर्मनीषिणः ।४२८।

प्राङ्मुखो गुरुसंभाषे प्रणामे विनयेऽपि च ।
शिशिरे कम्पितो हृत्स्थः स्त्रीकापुरुषयोर्भये ।४२९।
इति कपोतः ।

अन्योन्यस्यान्तरे यत्राङ्गुल्यो निःसृत्यहस्तयोः ।
अन्तर्वहिर्वा दृश्यन्ते स करः कर्कटः स्मृतः ।४३०।
वहिर्गताङ्गुलः स्थूल-जठरे जठराग्रतः ।
पराङ्मुखतलः किञ्चिदन्तर्नीताखिलाङ्गुलिः ।४३१।
उर्द्ध्वं पार्श्वेऽग्रतो वा स्यात् कन्दर्पादङ्गमोटने ।
सुप्तोत्थितस्य जृम्भायां गात्राणां च प्रसारणे ।४३२।
खेदे वहिःस्थाङ्गुलीनां पृष्ठे देया त(ह)नुः स्फुटम् ।
इति कर्कटः ।

अरालौ वा पताकौ वा यदि वा खटकामुखौ ।
अन्योन्यमणिवन्धस्थावुत्तानौ वामपार्श्वगौ ।४३३।
हृदयक्षेत्रगौ स्यातां यद्ययं स्वस्तिकः करः ।
गगने सागरादौ च विस्तीर्णे स प्रयुज्यते ।४३४।
इति स्वस्तिकः ।

पताकौ लम्वितौ दोलः श्लथांसौ विरलाङ्गुलिः ।
व्याधौ विषादे मूर्च्छायां मदे खेदेऽपि कीर्त्तितः ।
ससंभ्रमगतौ गर्वगतौ वा पार्श्वदोलितः ।४३५।
इति दोलः ।

व्यक्तसंश्लिष्टकरभावुत्तानौ सर्पशीर्षकौ ।
हस्तः पुष्पपुटो नाम पुष्पाञ्जलि-विसर्जने ।४३६।
धान्यपुष्पफलादीनां ग्रहणे देवतर्पणे ।
अर्घ्यदाने गुरुनृप-प्रसाद-ग्रहणे तथा ।४३७।
इति पुष्पपुटः ।

यत्र पार्श्वमुखं पृष्ठ-युगलं करयोर्भवेत् ।
उत्सङ्गस्तु सहस्तः स्यात्स्वस्तिकाकारकूर्परः ।४३८।

परस्परस्कन्धगतौ प्रकोष्ठे स्वस्तिकीकृतौ ।
सर्पशीर्षौ पताकौ वा यत्रोत्सङ्गः तु तं परे ।४३९।
स्थानेऽरालं केचिदाहुः सर्पशीर्षपताकयोः ।
अतिप्रयत्नसाध्येऽर्थे शीतालिङ्गनयोरपि ।४४०।
प्रसाधनाङ्गीकारे च लज्जादौ चैव योषिताम् ।

इत्युत्सङ्गः ।

मणिवन्धे स्वस्तिकौ चेत् खटकामुखहस्तकौ ।
अन्योन्याभिमुखौ तौ वा खटका-वर्द्धमानकः ।४४१।
ताम्वूलग्रहणादौ स्यात्कामिनां प्रथमे रते ।
पुष्पाणां ग्रथनादौ स्यात् केऽप्यूचुः सत्यभाषणे ।४४२।

इति खटकावर्द्धमानकः ।

मध्यमान्योऽन्यस्य यदा स्कन्धकूर्परयोः करौ ।
गृह्णीतः सर्पशिरसौ गजदन्तस्तदोच्यते ।
कण्ठक्षेत्रगतौ कुञ्चत्कूर्परौ सर्पशीर्षकौ ।४४३।

इति शिरोमणिः ।

प्रथमं निषधं केचिद् गजदन्तं प्रचक्षते ।
एष शैलशिलोत्पाटे गतागतियुतः करः ।
स्तम्भग्रहेऽतिभारे चानयने वरकन्ययोः ।४४४।

इति गजदन्तः ।

शुकतुण्डावधो कृत्वाधोमुखौ हृदयोन्मुखौ ।
अधो यदा नीयमानाववहित्थस्तदा विदुः ।
दौर्बल्यौत्सुक्यनिःश्वासगात्रकण्डूष्वसौ भवेत् ।४४५।

इत्यवहित्थः ।

निषधः स्यात्कपित्थेन मुकुलाख्यस्यवेष्टनात् ।
शास्त्रार्थसम्यग् ग्रहणे निष्पेषणविधावयम् ।४४६।
सम्यक् च स्थापिते तथ्यमिदमित्यपि भाषणे ।
प्रथमं निषधं केचिद्गजदन्तं प्रचक्षते ।
स शौर्य-स्थैर्य-गाम्भीर्य-गर्वादिषु मतस्तथा ।४४७।

इति निषधः ।

शिलष्टान्योऽन्य-परिगतौ पताकौ चेदधोमुखौ ।
सम्यगूर्द्ध्वगताङ्गुष्ठौ तदोक्तो मकरः करः ।४४८।
स नक्रमकरादीनां क्रव्यादद्विपिनामपि ।
सिंहादीनामभिनये नदीपूरस्य चेष्यते ।४४९।

इति मकरः ।

वर्द्धमानौ हंसपक्षौ स्वस्तिकौ चेत् पराङ्मुखौ ।
मृगशीर्षौ सर्पशीर्षौ तादृशौ वेत्ययं त्रिधा ।४५०।
द्वारवातायनादीनां कवाटोद्घाटने मतः ।
विच्युतस्वस्तिकौ हंसपक्षौ वक्षो विदारणे ।४५१।
द्वितीयं निषधं वर्द्धमानमाहुश्च केचन ।

इति वर्द्धमानः ।

इति संयुतहस्ताः

आलिङ्गनद्विशिखरौ योगप्रद-कलापकौ ।
लेखनश्च किरीटश्च चषकश्चेति सप्तकम् ।४५२।

हस्तकानामन्यदा (मा) हुः संयुतेषु विशारदाः ।
पताकौ स्वस्तिकीभूय स्वल्पस्पृष्टभुजौ भवेत् ।
आलिङ्गनाभिधोहस्तः स चालिङ्गनकर्मणि ।४५३।

इत्यालिङ्गनः ।

अन्योन्यशिलष्टशिखरौ करौ द्विशिखरो भवेत् ।
स्त्रीकतृकेऽङ्गुलिस्फोटे शपनार्थं प्रयुज्यते ।४५४।

इति द्विशिखरः ।

नायकाभिमुखं हस्तं कृत्वोर्द्ध्वविरलाङ्गुलिम् ।
पृष्ठतोऽस्य द्वितीयोऽपि तदङ्गुल्यन्तराङ्गुलिम् ।४५५।
निवेश्य करयोः प्रान्ते तदाङ्गुष्ठौ वहिर्गतौ ।
स्यातां तथाविधमिमं कलापं हस्तकं विदुः ।४५६।
केचित् शेषफणं प्राहुरभिनेयः फणीश्वरः ।

इति कलापः ।

कलाप एष शीर्षस्थः किरीट इति कथ्यते ।
चूडा-किरीट-मुकुट-धारणेऽयं प्रयुज्यते ।४५७।

इति किरीटः ।

अग्रयुक्तौ पताकौ चेत् स स्याद्योगः प्रदः करः ।
अन्योन्य-प्रीति-करणे मेलनेऽपि विधीयते ।४५८।

इति योगप्रदः ।

वामोत्तानपताकस्थश्चलन् संदंशहस्तकः ।
लेखनाख्योभवेद्धस्तो ज्ञेयो लेखन-कर्मणि ।४५९।

इति लेखकः ।

करे पुष्पपुटाख्ये चेत् पार्श्वलग्नौ च कूर्परौ ।
स भवेच्चषको हस्तः पाणिपात्रे प्रयुज्यते ।४६०।

इति चषकः ।

अथ नृत्यहस्ताः—

चतुरस्रावथोद्वृत्तौ हस्तौ तलमुखाभिधौ ।
स्वस्तिकै विप्रकीर्णावप्यरालखटकामुखौ ।४६१।

आविद्धवक्त्रौ सूच्यासौ रेचितावर्द्धरेचितौ ।
नितम्बौ पल्लवौ केशवन्धावुत्तानवंचितौ (?) ।४६२।
लताख्यौ करिहस्तश्च पक्षवंचितकाभिधौ ।
पक्षप्रद्योतकोदण्डपक्षौ गरुडपक्षकौ ।४६३।

ऊर्ध्वमण्डलिनौ हस्तौ पार्श्वमण्डलिनावपि ।
उरो मण्डलिनौ स्यातामुरः पार्श्वार्धमण्डलौ ।४६४।
मुष्टिकस्वस्तिकावन्यौ नलिनीपद्मकोषकौ ।
अलपद्मावुल्वणौ च वलितौ ललिताविति ।४६५।

नृत्यहस्ता मतास्त्रिंशन्नृत्यमात्रोपयोगिनः ।
वरदाभयदावर्द्धचतुरस्राविति द्वयम् ।४६६।

अन्यच्छिरोमणिः प्राह तत्ते द्वात्रिंशदीरिताः ।
समानकूर्परस्कन्धौ वक्षसोऽष्टाङ्गुलान्तरौ ।४६७।

प्राङ्मुखौ खटकावक्त्रौ चतुरस्राभिधौ करौ ।
मुक्ताहारस्रगादीनामेतावाकर्षणे मतौ ।४६८।
इति चतुरस्रौ ।

समाभ्यां हंसपक्षाभ्यामुत्तानोऽथ व्रजत्यधः ।
यदान्योऽधोमुखो वक्षस्तदा वृत्तौ करौ मतौ ।४६९।
तालवृन्तावाहुरेके तालवृन्तनिरूपणे ।
प्राङ्मुखौ हंसपक्षौ च व्यावृत्तपरिवर्त्तितौ ।४७०।
उद्वृत्तौ मेनिरे केचिज्जयशब्दे प्रयोजयेत् ।
इत्युद्वृत्तौ ।

भूत्वोद्वृत्तौ स्थितौ त्र्यस्रौ हंसपक्षौ स्वपार्श्वयोः ।
जातौ मिथः सम्मुखस्थतलौ तलमुखौ मतौ ।४७१।
वुधैरभिदधाते तौ मधुरे मर्द्दलध्वनौ ।
इति तलमुखौ ।

आश्लिष्टहंसपक्षाभ्यां स्वस्तिकः स्वस्तिकौ करौ ।
इति स्वस्तिकः ।

विप्रकीर्णाभिधावेतौ स्यातां स्वस्तिकविच्युतौ ।
स्तनाभ्यामुन्नताग्रौ वा नताग्रौ वा पुरः-स्थितौ ।४७२।
केचिदाहुः विप्रकीर्णा हंसपक्षौ पराङ्मुखौ ।

किं वा—

अरालो दक्षिण भाग वामहस्तविनिर्मितः ।४७३।
अधोमुखःस्यात् खटकामुखौ वामभुजान्तिके ।
वक्षःस्थ – स्वस्तिकावेतावरालखटकामुखौ ।४७४।

'अथवा—

यत्रोर्द्ध्वास्यौ पद्मकोषौ व्यावृत्तौ परिवर्तितौ ।
अरालौ स्वस्तिकाकारौ क्रियेते खटकामुखौ ।४७५।
नर्तकैर्यत्र तावन्यावरालखटकामुखौ ।
इत्यरालखटकामुखौ ।

भुजाग्रयोः कूर्परयोरंसयोः सविलासयोः ।
सतोः पताकौ व्यावृत्ति विधाय भवतो द्रुतम् ।४७६।
अधस्तलौ चेदाविद्ध-वक्त्रौ हस्तौ तदोदितौ ।
विक्षेपे चलने प्राहुः प्रयोगं कृतिनस्तयोः ।४७७।
इत्याविद्धवक्त्रौ ।

मध्यमा सङ्गताङ्गुष्ठौ चतुरस्रप्रदेशकौ ।
सर्पशीर्षौ क्रमात्तिर्यक् प्रसरन्तौ प्रदेशिनीम् ।४७८।
वहिः प्रसारितां धत्ते यदा सूचीमुखौ तदा ।

किं वा—

मध्यप्रसारिताङ्गुष्ठौ सर्पशीर्षाकृती करौ ।४७९।
रचित-स्वस्तिकौ केचिदूचुः सूचीमुखाविति ।

किं च—

कृत्वा पताकौ प्रथमं व्यावृत्त-परिर्वाततौ ।४८०।
तर्जन्योः प्रसृते कार्ये इति केचित्प्रचक्षते ।
इति सूचीमुखः ।

प्रसारितोत्तानतलावुच्येते रेचितौ करौ ।
धृतभ्रमौ हंसपक्षौ रेचिताविति केचन ।
प्रयोज्यौ तौ नृसिंहस्य दैत्यवक्षो विदारणे ।४८१।
इति रेचितौ ।

एकेन चतुरस्रेण तौ स्यातामर्द्धरेचितौ ।
खटकावदनो वामो दक्षिणो रेचिताकृतिः ।
यत्रैतच्छार्ङ्गदेवेन कथितावर्द्धरेचितौ ।४८२।
इत्यर्द्धरेचितौ ।

पताकौ त्रिपताकौ वा भूत्वोत्तानावधोमुखौ ।
स्कन्दप्रदेशान्निष्क्रम्य नितम्वक्षेत्रमाश्रितौ ।४८४।
रेचकं कुरुते हस्तौ तौ नितम्वावितीरितौ ।
पृष्ठक्षेत्रभ्रमादेतौ नितम्वाविति केचन ।४८४।
इति नितम्वौ ।

वाहूव्यावर्तनेनोर्द्ध्वं प्रसार्य परिव(वृ)त्तितः ।
स्वस्तिकाकृतितां नीतौ पणकौ पल्लवौ मतौ ।४८५।
शिथिलौ त्रिपताकौ तु केप्याहुः पल्लवाविति ।
पताकौ पद्मकोषौ वा शिथिलौ तु नतोन्नतौ ।
पार्श्वे वा कूर्पराग्रे वा पल्लवावपरेऽवदन् ।४८६।
इति पल्लवौ ।

त्रिपताकौ पताकौ वा पार्श्वदेशात्समुत्थितौ ।
शिरोगतौ केशदेशाद्विनिष्क्रम्य पुनः पुनः ।
नितम्वदेशमायातौ केशवन्धाविति स्मृतौ ।४८७।
इति केशवन्धौ ।

अंसकूर्परयोः किञ्चिच्चलितो स्त्रिपताककौ ।
अन्योन्यसम्मुखौ किञ्चित्तिर्यञ्चौ च कपोलयोः ।४८८।
हृदयस्यांसयोर्यद्वा हृदयस्याथ दूरतः ।
वर्त्तमानौ विदुर्धीराः करावुत्तानवंचितौ ।
अंसकूर्परयोः किञ्चिन्न्यञ्चनं मन्यते परः ।४८९।
इत्युत्तानवंचितौ ।

पताकौ त्रिपताकौ वा तिर्यक्प्रसृतदोलितौ ।
लताकराविति वुधा नृत्यज्ञाः प्रतिजानते ।४९०।
इति लताकरौ ।

स्पृशन् करिकराकारं पार्श्वयोश्च लताकरः ।
उत्तानो दोलितोऽन्यस्तु कर्णस्थः खटकामुखः ।४९१।
त्रिपताकोऽथवा यत्र करिहस्तमिमं विदुः ।
द्वित्वैकत्वविवादोऽत्र करिहस्ते त्रिधा मता ।४९२।
प्रकृतानुपयोगित्वात्तन्मया न विवेचितम् ।
त्रिपताकौ कटी शीर्षे न्यस्ताग्रौ पक्षवञ्चितौ ।४९३।
इति पक्षवञ्चितौ ।

पक्षवञ्चितकौ पार्श्वाभिमुखाग्रौ स्थितौ यदि ।
उत्तानौ वा तदा प्रोक्तौ पक्षप्रद्योतकौ करौ ।
ऊर्ध्वाङ्गुली परावृक्तौ केचिदेतौ बभाषिरे ।४९४।
इति प्रद्योतकौ ।

उपवक्षःस्थलं हंसपक्षे गच्छति पार्श्वतः ।
सविलासोऽपरस्तिर्यक् प्रसृतश्च लताकरः ।४९६।
क्रमादङ्गान्तरेणैव दण्डपक्षौ तदा करौ ।
हस्तप्रसारणं चात्र युगपन्मेनिरे परे ।४९६।
इति दण्डपक्षौ ।

पताकौ त्रिपताकौ वा किञ्चिन्न्यञ्चितकूर्परौ ।
कटिस्थौ तिर्यगूर्द्ध्वाधोमुखौ गरुडपक्षकौ ।४९७।
इति गरुडपक्षकौ ।

अरालौ वक्षसो भालं प्राप्य तत् पार्श्वमागतौ ।
मण्डलभ्रान्तिविततावूर्द्ध्वमण्डलिनौ करौ ।४९८।
ललाटप्राप्ति - पर्यन्तमन्ये लक्ष्म तयोर्जगुः ।
चक्रवर्त्तिनिकेत्येतौ प्रसिद्धौ नृत्यवेदिनाम् ।४९९।
इत्यूर्द्ध्वमण्डलिनौ ।

ऊर्द्ध्वमण्डलिनौ पार्श्वमागत्यैतौ पताकताम् ।
अन्योन्यसम्मुखौ प्रोक्तौ पार्श्वमण्डलिनाविति ।५००।
केचित्स्वपार्श्वयोरेतावावद्धभ्रमितौ भुजौ ।
पार्श्वमण्डलिनावूचुः कक्षावर्त्तिनिकेति च ।५०१।
इति पार्श्वमण्डलिनौ ।

अरालनामकौ हस्तौ हृदय-क्षेत्रसंगतौ ।
आवेष्टिताख्यं करणमपवेष्टितमेव च ।५०२।
निधाय पार्श्वयोस्तत्र भ्रान्त्वा मण्डलवत्क्रमात् ।
पुनर्वक्षःस्थलप्राप्तावुरोमण्डलिनौ मतौ ।५०३।
अनयोर्भ्रमणं प्राहुरन्ये वक्षःस्थलस्थयोः ।
प्राहुरन्ये नृत्यविद उरोवर्त्तिनिकेति च ।५०४।

हंसपक्षौ परे प्राहुरूर्द्ध्वं मण्डलिनादिषु ।
इत्युरोमण्डलिनौ ।

पार्श्वे प्रसारितश्चैको वक्षस्युत्तानितोऽपरः ।
तयोर्वक्षःस्थितौ हस्तौ व्यावर्त्तन-विधानतः ।५०५।
अलपद्मभवत्पार्श्वं प्राप्नुयान्मण्डलाकृतिः ।
युगपद्विहितावेतावुरः पार्श्वार्द्ध-मण्डलौ ।५०६।
नृत्ये विचक्षणाः केचित्प्राहुरभ्यासमेतयोः ।
इत्युरः पार्श्वार्द्धमण्डलिनौ ।

एवं (कं) वर्त्तनयाऽरालं तथान्यमलपल्लवम् ।
हस्तं बहु क्रमात् कृत्वा क्रियते स्वस्तिकाकृतिः ।५०७।
खटकामुखहस्तौ चेन्मुष्टिकस्वस्तिकौ तदा ।
अन्ये केचिज्जगुर्धीराः स्वस्तिकाकारतां गतौ ।५०८।
शिखरो वा कपित्थो वा मुष्टिकस्वस्तिकौ स्मृतौ ।
इति मुष्टिकस्वस्तिकौ ।

अ(आ)श्लिष्टस्वस्तिकौ भूत्वा व्यावृत्या यौ पराङ्मुखौ ।
अन्योन्यं पद्मकोषौ तौ नलिनीपद्मकोषकौ ।५०९।
अन्ये त्वाहुः पद्मकोषौ संश्लिष्टमणिवन्धनौ ।
स्कन्धयोः स्तनयोर्यद्वा जानुनोर्निकटस्थितौ ।५१०।
अन्योन्यसंमुखौ भूत्वा व्यावृत्तपरिबर्त्तने ।
पृथक् प्राप्तौ यदि तदा नलिनीपद्मकोषकौ ।५११।
इति नलिनीपद्मकोषकौ ।

उद्वेष्टितकरौ वक्षः क्षेत्रस्थावलपल्लवौ ।
स्कन्धान्तिकमथो प्रत्यपसृतावलपद्मकौ ।५१२।
इति अलपद्मकौ ।

ऊर्द्ध्वं प्रसारितौ स्कन्धाभिमुखौ चलदङ्गुली ।
अलपद्मौ विवृत्तौ यौ तौ करावुल्वणाभिधौ ।५१३।
इत्युल्वणौ ।

लताख्यौ वलितौ स्यातां स्वस्तिकीकृतकूर्परौ ।
अन्ये त्वन्योन्यलग्नाग्रावूर्द्ध्वगौ खटका-मुखौ ।५१४।
वलितौ प्राहुरपरे मुष्टिकस्वस्तिकौ करौ ।
ऊर्द्ध्वदेशे वर्त्तमानौ वलिताविति मेनिरे ।५१५।
इति वलितौ ।

वलितौ ललितौ स्यातां मस्तकस्थायिनौ करौ ।
नृत्यहस्तविदः प्राहुर्ललितौ नाम हस्तकौ ।५१६।
अन्ये पुनः शिरो देशे निविष्टौ खटकामुखौ ।
ललितौ प्राहुरेतौ च लग्नावन्योन्यसंमुखौ ।५१७।
इति ललितौ ।

पृथक् दक्षिणवामौ चेद् वरदाभयदौ करौ ।
अरालौ वा कटीसंस्थौ तदोक्तौ वरदाभयौ ।५१८।
इति वरदाभयौ ।

रेचितः स्याद्वामकरो दक्षिणः खटकामुखः ।
तदर्द्धचतुरस्राख्यौ हस्तावित्यपरे जगुः ।५१५।
इति प्रोक्ता समासेन द्वात्रिंशन्नृत्यहस्तकाः ।
तथोक्ता ये मतङ्गाद्यैरधिकं तान् प्रचक्ष्महे ।५२०।
असंयुतास्त्रिशिखोर्द्ध्वमुष्टिर्वृषभ - वृश्चिकौ ।
कलिहस्तः संयुतः सुखाद्याः संख्यावबोधकाः ।५२१।
पताकस्य तु हस्तस्य यदि वक्रा कनीयसी ।
तदास्यात्त्रिशिखो योज्यस्त्रिसंख्यावति वस्तुनि ।५२२।
इति त्रिशिखः ।

निपीड्याङ्गुष्ठ-मध्यान्तं मध्यपर्वद्वयेन तु ।
प्रदेशिनीमध्यमयोरर्द्धमुष्टिः करो मतः ।
दोहने स्यान्महिष्युष्ट्रयोः भृङ्गचापापकर्षणे ।५२३।
इत्यर्धमुष्टिः ।

अनामिका-कनीयस्यावुपर्यङ्गुष्ठ - पीडिते ।
शेषे यत्रोर्द्ध्व-विरले कुटिलो वृषभः करः ।५२४।

गो महिष्यादयः शृङ्गयुजोऽन्ये श्वापदाश्च ये ।
दर्शनीया मुनिश्रेष्ठ धेनुर्द्वौ खटकामुखौ ।५२५।
तथा वत्सतरी वत्सौवर्द्धचन्द्रावधोमुखम् ।
जानुनोर्निकटं कृत्वा अभिनेयौ सुबुद्धिना ।५२६।
इति वृषभः ।

कपित्थस्य यदाङ्गुष्ठो मध्यमोपरिपीडितः ।
तदोक्तो वृश्चिकस्तेन कुन्ताङ्कुशकुठारकम् ।५२७।
कुद्दालं लाङ्गलं शस्त्रं पेरणादि च दर्शयेत् ।
इति वृश्चिकः ।

तर्जन्यौ तिर्यगाकारे मिथुनं मध्यपर्वणि ।
ईषच्च कुटिले सूच्यौ तदोक्तः कलिहस्तकः ।५२८।
कलहे विग्रहे द्वेषे प्रयोज्यः शत्रुदर्शने ।
इति कलिहस्तः ।

केचिदाहुर्द्विशखरं शिखरद्वय - संयुते ।
शपनार्थाङ्गुलिस्फोटे स्त्रीणामनुमतेस्तथा ।५२९।
नास्तीत्यर्थे तु संयोज्यं वियुक्तं शिखरद्वयम् ।

इति मतङ्गकोहलोक्ता अधिकहस्तकाः ।

अथ संख्या-सूचका ये हस्तकास्तान् प्रचक्ष्महे ।
एकं सूच्या द्वे कर्तव्या (?) त्रिशिखेन त्रिसंख्यकम् ।५३०।
चत्वारि तु पताकेन पञ्चकं मुकुलेन तु ।
अङ्गुष्ठाग्रेण लग्नाग्रा कनिष्टा त्रि-शिखस्य चेत् ।५३१।
षट्कं प्रदर्शयेत्तेनानामिका तत्र सप्तसु ।
भ्रमरेण तथाऽष्टौ वा नव संदशकेन तु ।५३२।
दशाख्यश्च शताख्याश्च सहस्राख्यास्तथैव च ।
पताकाभ्यां तु हस्ताभ्यामभिनेयाः प्रयोक्तृभिः ।५३३।
दिङ्मात्रदर्शनार्थैते मयोक्ता हस्तका इमे ।
आनन्त्यादभिनेयानां सन्त्यनन्ता परे कराः ।५३४।

लोकवृत्तानुसारेण तेष्वूह्यन्तां विचक्षणैः ।
मध्यमेष्वभिनेयेषु तादृशेष्वभिनेतृषु ।५३५।
वक्षः क्षेत्रगताः कार्या अधमेष्वप्यधोगताः ।
उत्तमेषु कराः कार्या ललाटक्षेत्रचारिणः ।५३६।

केचित्तु—

उत्तमे सन्निकृष्टाःस्युर्मध्यमे मध्यसंश्रिताः ।
अधमेष्वभिनेयेषु विप्रकृष्टतराः कराः ।५३७।
नेत्रभ्रूमुखरागाद्यैरुपाङ्गैरुपवृंहिताः ।
प्रत्यङ्गैश्च कराः कार्या रसभावप्रकाशिकाः ।५३८।
मूर्च्छिते व्याकुले भीते विषण्णे शोक पीडिते ।
तन्द्रा जुगुप्सा-संयुक्ते सुप्ते ग्लाने जरार्हते ।५३९।
रोगशोका (शीता) र्तनिश्चेष्ट सचिन्तेष्वपि तापसे ।
मत्तोन्मत्तप्रमत्तेषु न हस्ताभिनयोभवेत् ।५४०।
ये भावमान्तरं हस्ताः सूचयन्तः प्रयत्नतः ।
मूर्च्छितादिष्वपि प्रायः प्रयोज्यास्ते सतां मताः ।५४१।

अथ हस्तकरणानि—

निष्पत्तौ निरपेक्षायां करस्याभिनयाय यः ।
क्रियाविशेषः क्रियते तद्धस्तकरणं मतम् ।५४२।
आवेष्टितोद्वेष्टिते च व्यावर्त्ततमतः परम् ।
परिवर्त्तितमित्येतत् चतुर्द्धा धीरसम्मतम् ।५४६।
तर्जन्याद्यङ्गुलीनां यद्भवेदावेष्टितं क्रमात् ।
तलसम्मुखमावक्षः करयोर्याति पार्श्वतः ।५४७।
तदावेष्टितमाख्यातं करस्य करणं वुधैः ।
यत्तुक्रमेण निर्याणमङ्गुलीनां तलाद्वहिः ।५४८।
वक्षःस्थलात् करस्यापि तदुद्वेष्टितमुच्यते ।
आवेष्टितप्रक्रियया कार्यमावर्त्ततं करे ।५४९।
उद्वेष्टितेन व्याख्यातं करणं परिवर्त्तितम् ।
किं त्वेतत्करणद्वन्दं कनिष्ठाद्यङ्गुलीकृतम् ।५५०।

इति चत्वारि करकरणानि ।

अथ करक्षेत्राणि—

पार्श्वद्वयं पुरस्ताच्च हस्तादूर्द्ध्वमधः स्थितः ।
ललाटकर्ण्णस्कन्धोरोनाभयः कटिशीर्षके ।
ऊरुद्वयं च हस्तानां क्षेत्राणीति त्रयोदश ।५५१।
इति हस्तक्षेत्राणि ।

अथ करकर्म्माणि—

धूननं श्लेषविश्लेषौ क्षेपो र(ल) क्षण-मोक्षण ।
परिग्रहो निग्रहस्तु कृष्ट्याकृष्टिर्विकृष्टयः ।५५२।
ताडनं तोडनं छेद-भेदौ स्फोटन-मोटने ।
स्याद्विसर्जनमाह्वानं तर्जनं चेति विंशतिः ।
करकर्माणि नृत्यज्ञैरन्यथानुवभाषिरे ।५५३।
इति हस्तः ।

अथ कटिमाह—

कम्पितोद्‌बाहिता छिन्ना विवृता रेचिता तथा ।
कटिः पञ्चविधा प्रोक्ता तल्लक्ष्म व्याहरेऽधुना ।५५४।
द्रुतं गतागते पार्श्वे दधती कम्पिता मता ।
सा कुब्जवामनादीनां गमने विनियुज्यते ।५५५।
इति कम्पिता ।

शनैरुच्चलिता पार्श्वद्वयेनोद्‌वाहिता कटी ।
स्त्रीणां लीलागतेष्वेषा गीताङ्गानां(?) गतावपि ।५५६।
इत्युद्‌वाहिता ।

छिन्ना तिर्यङमुखे पात्रे मध्यस्य वलनात् कटी ।
व्यायामे संभ्रमे चैषा व्यावृत्तप्रेक्षणादिषु ।५५७।
इति छिन्ना ।

पराङमुखेन पात्रणाभिमुखं या विवर्त्तिता ।
विवृता सा कटी प्रोक्ता विनियोज्या विवर्त्तने ।५५८।
इति विवृता ।

सर्वतो भ्रमणादुक्ता रेचिता भ्रमणे भवेत् ।
इति रेचिता ।

समोऽञ्चितः कुञ्चितश्च सूच्यग्रस्तलसंचरः ।
मर्द्दितोद्घटितौ चैवाग्रगः पार्श्वगपार्ष्णिगौ ।५५९।
ताडितो घटितोत्सेधः उद्घाटित इति क्रमात् ।
त्रयोदशविधः प्रोक्तश्चरणो नृत्यकोविदैः ।५६०।
स्वभावेन स्थिता भूमौ समः पादोऽभिधीयते ।
स्वभावाभिनये कार्यः स्थिरोऽसौ रेचकेऽचलः ।५६१।
इति समः ।
भूस्थ-पार्ष्णिः समुत्क्षिप्ताग्रतलः प्रसृताङ्गुलिः ।
अञ्चितः स भवेत् पादो हतिः भ्रमणकादिषु ।५६२।
इत्यञ्चितः ।
कुञ्चिताङ्गुलिरुत्क्षिप्तपार्ष्णिर्मध्ये च कुञ्चितः ।
कुञ्चितः स्यादिति क्रान्तक्रमे तुङ्गस्य च ग्रहे ।५६३।
इति कुञ्चितः ।
वामः स्वाभाविकोऽन्यस्तु भुव्यङ्गुष्ठाग्रसंस्थितः ।
उत्क्षिप्तेतरभागोऽसौ सूची नूपुरवन्धने ।५६४।
इति सूची ।
यस्योत्क्षिप्ता भवेत् पार्ष्णिरङ्गुष्ठः प्रसृतस्तथा ।
अङ्गुल्यो न्यञ्चिताः स स्यात् पादाग्रतलसंचरः ।५६५।
प्रेरणे कुट्टने स्थान-पीडने भूमिताडने ।
भूस्थापसारणे स स्याद्रेचके भ्रमणे मदे ।५६६।
इत्यग्रतलसंचरः ।
य स्तिरश्चलतेनोर्वीं प्रमृद्नाति स मर्द्दितः ।
ति मर्द्दितः ।
यदि पादतलाग्रेण स्थित्वा भूमौ निपात्यते ।
असकृद्व। सकृत्पार्ष्णिर्भवेदुद्घाटितस्तदा ।५६७।
इत्युद्घाटितः ।
अग्रगोऽग्रे द्रुतं सर्पन् प्रयोज्यः पङ्क्तिलक्षितौ ।
इत्यग्रगः ।

पृष्ठतोपसरन् पार्ष्ण्या पार्ष्णिगः पाद उच्यते ।५६८।

इति पार्ष्णिगः ।

स्थितः पार्श्वेऽथवा पार्श्वं व्रजन् पार्श्वग उच्यते ।

इति पार्श्वगः ।

पार्ष्ण्या धरामवष्टभ्य तामग्रेणावहन्ति यः ।
ताडितश्चरणः स स्यात् प्रयोज्यः क्रोधगर्वयोः ।५६९।

इति ताडितः ।

घ्नन् मृदु घटितोत्सेधोऽग्र पार्ष्णिभ्यां भुवं क्रमात् ।

इति घटितोत्सेधः ।

घट्टितः क्षितिघातः स्यात् पार्ष्ण्यङ्घ्रिप्रेरणेन सः ।५७०।

इति घट्टितः ।

इति त्रयोदशविधं पदम् ।

अथ प्रत्यङ्गानि--

समा निवृत्ता वलिता रेचिता कुञ्चिताञ्चिता ।
त्र्यस्रा नतोन्नताचेति ग्रीवा नवविधा भवेत् ।५७१।
समा स्वाभाविकी ध्याने जपे कार्ये स्वभावजे ।

इति समा ।

ग्रीवात्वभिमुखीभूयनिवर्त्तेत यदा तदा ।
निवृत्तत्युच्यते सा स्यात्स्वस्थानाभिमुखादिषु ।५७२।

इति निवृत्ता ।

पार्श्वोन्मुखा तु वलिता ग्रीवाभङ्गे तथेक्षणे ।

इति वलिता ।

रेचिता विधुता भ्रान्ता वर्त्तुले मथने तथा ।५७३।

इति रेचिता ।

आकुञ्चिता कुंचिता स्यान्मुहुर्भारे स्वगोपने ।

इति कुञ्चिता ।

अञ्चिता प्रसृता लोला केशाकर्षेऽथ वीक्षणे ।५७४।

इत्यञ्चिता ।

त्र्यस्रा पार्श्वगता खेदे पार्श्वेषा स्कन्धभारयोः ।
इति त्र्यस्रा ।

नतावनम्रालङ्कारबन्धे कण्ठावलम्बने ।५७५।
इति नता ।

उन्नतोर्द्ध्वगता ग्रीवालंकारोर्द्ध्वप्रदर्शने ।५७६।
इत्युन्नता ।

अथ वाहुः—

ऊर्द्ध्वास्योऽधोमुखस्तिर्यग् चापविद्धः प्रसारितः ।
अञ्चितो मण्डलगतिः स्वस्तिकोद्वेष्टितावपि ।५७७।
पृष्ठानुसारी सरलान्दोलितौ नम्रकुंचितौ ।
आविद्धोत्सीरितावेवं वाहुः षोडशधोदितः ।५७८।

शीर्षादूर्द्ध्वं व्रजन् वाहु ऊर्द्ध्वास्यस्तुङ्गदर्शने ।
अधोमुखो मही-श्लेषी तिर्यक पार्श्वगतो भवेत् ।५७९।
वक्षःक्षेत्राद् विनिर्यातोऽपविद्धो मण्डलाकृतिः ।
ग्रप्रदेशं धावंस्तु प्रसारित उदीर्यते ।५८०।

वक्षःक्षेत्राच्छिरः प्राप्य वक्षः प्रत्यागतोऽञ्चितः ।
उच्यते मण्डलगतिः सर्वतो भ्रमणाद्भवेत् ।५८१।
खड्गादि-भ्रमणे चास्य विनियोगः प्रचक्ष्यते ।
स्वस्तिको लग्नयोर्वाह्वोः पार्श्वव्यत्यासतः स्थितौ ।५८२।

स स्याद्भानोरुपस्थाने परिरम्भेऽभिवादने ।
निष्क्रामन् मणिवन्धस्थवर्त्तनामाश्रितो भुजः ।५८३।

उद्वेष्टितो भवेत् पृष्ठानुसारी पृष्ठतो गतः ।
सरलः पार्श्वयोरूर्द्ध्वमधस्ताच्च प्रसारितः ।५९३।

स्यात् पक्षानुकृतौ माने भूस्थ निर्द्देशनेऽपि च ।
गतावान्दोलितोऽन्वर्थो नम्रः स्यादल्पवक्रितः ।५८४।

यस्तिर्यक् कूर्पराचक्रीकृतः स स्यात्तु कुंचितः ।
प्रहारे भोजने चैव खड्गादीनां च धारणे ।५८५।

आविद्धोऽभ्यन्तराक्षिप्तः स उत्सरित उच्यते ।
स्वपार्श्वमन्यतो गच्छन् जनतोत्सारणे भवेत् ।५८६।
इति षोडशविधो वाहुः ।

अथ मणिवन्धः—

निकुञ्चाकुञ्चितचलाः समो भ्रमित इत्ययम् ।
मणिवन्धः पञ्चविधो निकुञ्चस्तु स उच्यते ।
यो वर्हिर्निम्नतां नीतः स्वदानाभयदानयोः ।५८७।
इति निकुञ्चः ।
आकुञ्चितोऽन्तर्निम्नोऽसौ कार्योऽपसारणे वुधैः ।
इत्याकुञ्चितः ।
निकुञ्चाकुञ्चिताभ्यासाच्चलमावाहने विदुः ।५८८।
इति चलः ।
ऋजुः समः पुस्तकस्य धारणे स प्रतिग्रहे ।
इति समः ।
भ्रमितो भ्रमणात्खड्गच्छुरिका भ्रमणादिषु ।५८६।
इति भ्रमितः ।

इति पञ्चविधः मणिवन्धः ।

अथ पृष्ठोदरे—

पृष्ठं तु जठरोक्ताभिर्वर्त्तनाभिर्विवर्त्तते ।
अतो न तत् पृथग्वाच्यो जठरं तूच्यतेऽधुना ।५६०।
क्षामं खल्लं तथा पूर्णं रिक्त-पूर्णं चतुर्विधम् ।
क्षामं स्यान्नमनाज्जृम्भा-हासनिःश्वासरोदने ।५६१।
निम्नं खल्लं क्षुधार्त्तेस्यादातुरे श्रमकर्षिते ।
वेताल-भृङ्गरीटादि (?) जठराकारधारी तत् ।५६२।
पूर्णं स्थूलं व्याधिते स्यात्तुन्दिले श्वसिते तथा ।
अन्वर्थं रिक्त-पूर्णं स्यात् श्वासरोगे तु तद्भवेत् ।५६३।
इति चतुर्द्धोदरम् ।

अथोरु:—

कम्पितो कलितः स्तब्धो वर्त्तितश्च विवर्त्तितः ।
इत्यूरुः पञ्चधा तत्र मुहुः पार्श्वे नतोन्नते ।५९४।
यस्यासौ कम्पितो ज्ञेयोऽधमानां गमने ततः ।
वलितोऽन्तर्गते जानून्यूरुः स्वैरगते स्त्रियाः ।५९५।
स्तब्धस्तु निष्क्रियः स स्याद्विषादे साध्वसे तथा ।
पार्श्वैरन्तर्वहिः क्षेपात् क्षेपादग्रतलस्य च ।५९६।
मुहुरुद्वर्त्तितः स स्याद् व्यायामे ताण्डवे तथा ।
निर्वर्त्तितोऽन्तर्गतया पार्ष्ण्या स्यात् संभ्रमे श्रमे ।५९७।
इति पञ्चविध ऊरुः ।

अथ जङ्घा—

आवर्त्तिता नता क्षिप्तोद्वाहिता परिवर्त्तिता ।
निःसृता च परावृत्ता तिरश्चीना वहिर्गता ।५९८।
कम्पिता चेति दशधा जङ्घा नृत्यविदो विदुः ।
वामे दक्षिणतः पादे दक्षिणे वामतः कृते ।५९९।
मुहुरावर्त्तिता प्रोक्ता विदूषकपरिक्रमे ।
नमज्जानुर्नता जङ्घा स्थानासनगतादिषु ।६००।
वहिर्विक्षेपतः क्षिप्ता व्यायामे ताण्डवे च सा ।
ऊर्द्धं नीतोद्वाहिता स्यादाविष्टदमनादिषु ।६०१।
जङ्घा प्रतीपं गच्छन्ती ताण्डवे परिवर्त्तिता ।
पुरः प्रसारिता जङ्घा निःसृता परिकीर्त्तिता ।६०२।
पश्चाद्गता परावृत्ता भूमिलग्नेन जानुना ।
वामेन पितृकार्ये स्यादन्येन सुरकर्मणि ।६०३।
भूमिलग्नवहिः-पार्श्वा तिरश्चीना तु सा मता ।
वहिर्गता मता जङ्घा नृत्ते पार्श्व-प्रसारिता ।
कम्पनात्कम्पिताभीतौ कार्ये घर्घरिका ध्वनौ ।६०४।
इति दशधा जङ्घा ।

अथ जानु:—

संहतं कुञ्चितं चार्द्धकुञ्चितं नतमुन्नतम् ।
विवृतं सममित्यूचे जानु सप्तविधं वुधैः ।६०५।
रोषेर्ष्यादौ संहतंस्याज्जानुनिष्ठान्यजानु चेत् ।
जानुलग्नोरुजङ्घं तु भवेत् कुञ्चितमासने ।६०६।
नितम्वनमनाज्जानु त्वर्द्धकुंचितमुच्यते ।
महीगतं नतं जानु मतं पात्रे नमस्कृतौ ।६०७।
स्तनक्षेत्रगतं जानून्नतं शैलाधिरोहणे ।
गजारोहे तु विवृतं जानुद्वन्द्वं वहिर्गतम् ।६०८।
समं स्वाभाविकं जानु स्वभावावस्थितौ भवेत् ।

इति सप्तविधं जानु ।

तत्तद्वेशजुषो भषा भूषणं तु निगद्यते ।६०९।

इति भूषणम् ।

इति नव प्रत्यङ्गानि ।

अथ शिरस उपाङ्गानि, तत्र प्रथमं दृष्टयः—

दृष्टयस्त्रिविधाः स्थायिदृष्टयो रसदृष्टयः ।
दृष्टयो व्यभिचारिण्य उद्दिशामः क्रमादिमाः ।६१०।

तत्र स्थायिदृष्टयः—

स्निग्धा हृष्टा च दीना च क्रुद्धादृप्ताभयान्विता ।
जुगुप्सिता विस्मितेति दृष्टयः स्थायिभावजाः ।६११।
मनाक् समुत्क्षिप्तैकभ्रूः साभिलाषा कटाक्षिणी ।
यद्गतागत-विश्रान्ति-वैचित्र्येण विवर्त्तनम् ।६१२।
कलाभिज्ञा तारकायास्तं कटाक्षं प्रचक्षते ।
विकासिनी दृष्टिरुक्ता स्निग्धेति रतिभावजा ।६१४।
अत्र भ्रुवोः समुत्क्षेपं शार्ङ्गदेवः प्रभाषते ।

इति स्निग्धा ।

फुल्लगल्ला (ण्डा) विशत्तारा किंचिदाकुंचिता चला ।
निमेषिणी स्मिताकारा हृष्टादृष्टिरुदीरिता ।६१४।

इति हृष्टा ।

ईषत्श्लथोत्तरपुटाऽनभिव्यक्तार्द्धतारका ।
सवाष्पामलसञ्चारा दृष्टिर्दीनेति कथ्यते ।६१५।
इति दीना ।

स्थिरोद्वृत्तपुटां रुक्षां किंचित्तरलतारकाम् ।
भृकुटीकुटिलां दृष्टिं क्रुद्धां ब्रूते हरिप्रियः ।६१६।
इति क्रुद्धा ।

स्थिरा विकसिता धैर्यमुद्गिरन्तीव या भवेत् ।
दृष्टिरुत्साहिनी प्राहुस्तां दृप्तां भरतादयः ।६१७।
इति दृप्ता ।

निगच्छदिव यन्मध्यं त्रासाद् विक्षिप्ततारका ।
विस्फारितोभयपुटा या सा दृष्टिर्भयान्विता ।६१८।
इति भयान्विता ।

अस्पष्टालोकनिमीलत्तारका संकुचत्पुटा ।
दृश्यं दृष्ट्वा समुद्विग्ना दृष्टिरुक्ता जुगुप्सिता ।६१९।
इति जुगुप्सिता ।

दूरविस्फारिताकारपुटद्वन्द्वा विकाशिनी ।
निश्चलादृष्टिरुद्वृत्ततारका विस्मिता स्मृता ।६२०।
इति विस्मिता ।

इत्यष्टौ दृष्टयःस्थायि-भावजा लक्षिताः क्रमात् ।
एता एवोल्वणाः सत्यो जायन्ते रसदृष्टयः ।६२१।

यथा--

कान्ता हास्या च करुणा रौद्रा वीरा भयानका ।
बीभत्सा चाद्भु तेत्यष्टौ विज्ञेया रसदृष्टयः ।६२२।
कन्दर्प-वर्द्धनी दृश्यमापिवन्तीव निर्मला ।
सभ्रूक्षेपकटाक्षा या दृष्टिः कान्तेति तां विदुः ।६२३।
इति कान्ता ।

आकुञ्चितपुटातीव्र-मध्य-मन्द-क्रमण या ।
भ्रान्तान्तर्नीततारा च दृष्टिर्हास्येति सोच्यते ।६२५।
इति हास्या ।

पतितोर्द्ध्वपुटा सास्रा शोकमन्थरतारका ।
नासाग्रानुगता दृष्टिर्विज्ञेया करुणे रसे ।६२५।

इति करुणा ।

स्तब्धतारोभयपुटा शोणा भ्रुकुटिभीषणा ।
उग्रातिधूसरा दृष्टिर्या सा रौद्रीति कथ्यते ।६२६।

इति रौद्रा ।

अचञ्चला विकसिता गम्भीरसमतारका ।
तेजः-शोभाविशेषांश्च सप्तभेदान् विवृण्वती ।
दीप्ता संकुचितापाङ्गा वीरादृष्टिरुदीरिता ।६२७।

इति वीरा ।

स्तब्धोभयपुटात्यन्त-वलमान-कनीनिका ।
ईषत्कुञ्चित-पक्ष्माग्राऽद्भुतादृष्टिरुदीर्यते ।६२८।

इत्यद्भुता ।

स्तब्धोद्वृत्तपुटाऽत्यन्त चञ्चलोद्वृत्ततारका ।
दृश्यात्पलायमानेव भीत्या दृष्टिर्भयानका ।६२९।

इति भयानका ।

वीभत्सा स्यान्मिलल्लोलपक्ष्मा तरलतारका ।
दृश्योद्वेगादपाङ्गौ च निकुञ्चितपुटौ श्रिता ।६३०।

इति बीभत्सा ।

शृङ्गारप्रमुखेष्वेता रसेषु स्थायिदृष्टयः ।
जायन्ते व्यभिचारिण्यो लक्ष्यन्ते दृष्टयोऽधुना ।६३१।

ताश्च—

मलिना शङ्किता ग्लाना जिह्मा शून्या विषादिनी ।
लज्जिता मुकुला श्रान्ताभितप्ता कुञ्चिता तथा ।६३२।
आकेकरा विकोषार्द्धमुकुला च वितर्किता ।
विभ्रान्ता विप्लुता त्रस्ता ललिता मदिरेति च ।६३३।
विंशति र्व्यभिचारिण्यो दृष्टयः कथिता इमाः ।
दृश्यादपसृते तारे किंचिदुन्मीलितौ पुटौ ।६३४।

दधत्यपाङ्गौ विच्छायौ पक्ष्माग्रस्पन्दनं तथा ।
दृष्टिः स्यान्मलिना स्त्रीणां विकृते सा प्रयुज्यते ।६३५।
प्राप्ते कालेऽप्यसंलापः प्रियेण विकृतं मतम् ।
इति मलिना ।

मृदुश्चलास्थिरा पार्श्वालोकिनी वहिरुन्मुखा ।
गूढावलोकिनी शीघ्रनिवृत्ता च विलोकनात् ।
शङ्कायां शङ्किता दृष्टिरुक्ता निःशङ्कसूरिणा ।६३६?
इति शङ्किता ।

विश्लथभ्रूपक्ष्मपुटा मलिना मन्दचारिणी ।
अन्तर्निविष्टतारा या दृष्टिग्लानेति सोच्यते ।
एषा ग्लानाप्यपस्मारे नियुक्ता भरतादिभिः ।६३७।
इति ग्लाना ।

किंचित्कुंचपुटागूढ - नमत्ताराविलोकने ।
शनैः तिर्यङ् निगूढा या साजिह्मेत्यभिधीयते ।
असूयायां निगूढेऽर्थे जडतालस्ययोरपि ।६३८।
इति जिह्मा ।

धूसरा मलिना-पाङ्गा निष्कम्पापुटतारयोः ।
शून्यावलोकिनी दृष्टिः शून्या चिन्ता-प्रकाशिनी ।६३९।
इति शून्या ।

या दृष्टिः पतितापाङ्गा विस्तारितपुटद्वया ।
निमेषिण्यस्तु तारा च विषण्णा च विषादिनी ।६४०।
इति विषादिनी ।

अन्योऽन्यस्पृष्टपक्ष्माग्राप्यधोनीत-कनीनिका ।
पतितोर्द्ध्वपुटा दृष्टिर्लज्जिता सा त्रपाभरे ।६४१।
इति लज्जिता ।

स्फुरत्संश्लिष्टपक्ष्माग्रा सुखविश्रान्ततारका ।
मुकुला दृष्टिरानन्दे हृद्ययोः स्पर्शगन्धयोः ।६४२।
इति मुकुला ।

अदूरालोकिनीम्लानपुटाप्यलसचारिणी ।
पतत्तारा मनाक्कुञ्चत्प्रान्ता श्रान्ता समे मता ।६४३।
इति श्रान्ता ।

पुटौ प्रचलितौ यस्यास्तीरे वीक्षितुमक्षमे ।
या सव्यथेव सा दृष्टिरभितप्तेति गीयते ।६४४।
इत्यभितप्ता ।

किंचिच्चेत्कुंचितानि स्युः पक्ष्माग्राणि पुटावपि ।
सम्यक् चेत् कुञ्चिता तारा तदा दृक् कुंचितोच्यते ।
अनिष्टेऽसूयिते तेजोदुष्प्रेक्ष्याक्षि-व्यथासु सा ।६४५।
इति कुञ्चिता ।

किञ्चित्कुञ्चत्पुटापाङ्गा दृष्टिरूर्द्ध्वं निमेषिणी ।
पृथक्पथे वान्यनेत्रान्मुहुस्तारा-विवर्त्तिनी ।६४६।
आकेकरा दुरालोके स्याद्विच्छेदे च वस्तुनि ।
इति आकेकरा ।

विकाशितोभयपुटा निमेषरहिता स्थिरा ।
चलत्कनीनिका दृष्टिर्विकोषाख्येति भारताः ।
उग्रस्यालोकने क्रोधे ज्ञाने विज्ञानगर्वयोः ।६४७।
इति विकोषा ।

अर्द्धव्याकोषिते किंचिद्भ्रमन्त्यौ तारके पुटौ ।
यत्रार्द्धमीलितौ सार्द्धमुकुलार्थे सुखप्रदे ।६५८।
इत्यर्द्धमुकुला ।

ऊर्द्ध्वं प्रवर्त्तितपुटा चलदुत्फुल्लतारका ।
अधः सञ्चारिणी दृष्टिर्विचारे स्याद्वितर्किता ।६४९।
इति वितर्किता ।

या नैकत्र स्थितिं याति विक्षिप्ते वा विलोकिते ।
विक्षिप्तोत्फुल्लतारा दृक् सा विभ्रान्ताभिधा भवेत् ।
विभ्रमोद्वेगयोरेषा संभ्रमेऽपि प्रवर्तते ।६५०।
इति विभ्रान्ता ।

पुटौ विस्फारितौ स्तब्धौ यस्यास्तः पतितौ क्रमात् ।
सा विप्लुतार्त्तिदुःखादावुन्मादे चापले तथा ।६५१।
इति विप्लुता ।

उद्वर्त्तितपुटोत्फुल्लमध्य-कम्पिततारका ।
दष्टिस्त्रस्तोच्यते त्रासे व्याघ्रोलूकादि दर्शने ।६५२।
इति त्रस्ता ।

मधुराङ्कुचितापाङ्गा सभ्रूक्षेपा स्मितान्विता ।
मन्मथोन्मादिनी दृष्टिर्ललिता ललिते मता ।६५३।
इति ललिता ।

प्रयत्नेऽप्यकृतोन्मेषा स्वल्पदृष्टकनीनिका ।
अधः संचारिणी दृष्टिर्मदिरास्यान्मदेऽधमे ।
इति त्रिधा स्यान्मदिरात्रैविध्यान्मदिरास्थितेः ।६५४।
इति त्रिविधमदिरा ।

एवं मयोक्ताः षड्विंशदृष्टयः पूर्वदेशिताः ।
अनन्ताः सन्ति ताः वक्तुं ज्ञातुं चापि न कोऽप्यलम् ।६५५।

किं च—

विंशतिः सत्त्वजाभावाद्या अलंकारदृष्टयः ।
स्तब्धाद्याः सत्त्वजाचाष्टौ कोहलोक्ता परा अपि ।६५६।
निरर्थकत्वाद्वाहुल्यभीतेश्च न मयोदिताः ।
किन्तु पौर्वापर्य (पूर्वाचार्य) मतमनूद्य किमपीरितम् ।६५७।

यतः—

उक्तानामपि दृष्टीनां भदं ज्ञातुमनागपि ।
निपुणोऽपि न शक्तस्तद्यथामति समुन्नयेत् ।६५८।

अथ ताराकर्माणि—

कर्माणि तारकायास्तु विभिद्यन्ते द्विधा किल ।
नव स्वनिष्ठान्यप्यष्ट विषयाभिमुखानि च ।६५९।
भ्रमणं वलनं पातश्चलनं च प्रवेशनम् ।
विवर्त्तनं समुद्वृत्तं निष्क्रामः प्राकृतं तथा ।६६०।

स्वनिष्ठानि नवेत्याहुस्ताराकर्माणि सूरयः ।

अत्र च—

तारयोर्मण्डलभ्रान्तिः पुटान्तर्भ्रमणं मतम् ।६६१।
तिर्यग्गतिः स्याद्वलनं पातस्तुस्यादधोगतिः ।
कम्पनं चलनं प्रोक्तं प्रवेशोऽन्तः प्रवेशनम् ।६६२।
विवर्त्तनं कटाक्षः स्यात् समुद्वृत्तं समुन्नतिः ।
सनिष्क्रामो निर्गमो यः प्राकृतं स्यात्स्वभावजम् ।६६३।
भ्रमणं वलनोद्वृत्ते निष्क्रामो वीर-रौद्रयोः ।
निष्क्रामणं सवलनं कर्तव्यं तु भयानके ।६६४।
हास्यबीभत्सयोश्चापि प्रवेशनमिहेष्यते ।
पातनं करुणे कुर्यान्निष्क्रामं च तथाद्भुते ।६६५।
विवर्त्तितं च शृङ्गारे भावेषु व्यभिचारिषु ।
ाकृतं तु प्रयुञ्जीत यदावेशो न जायते ।६६६।

इति नव स्वनिष्ठतार-कर्माणि ।

विषयाभिमुखान्यष्टौ तारकर्माण्यथ व्रुव ।
समं साच्यनुवृत्तावलोकितानि विलोकितम् ।६६७।
उल्लोकितालोकिते च प्रविलोकितमित्यपि ।
एतानि दर्शनान्याहुर्लक्ष्मलक्ष्यविचक्षणाः ।६६८।
विषयाभिमुखं कर्म ताराया दर्शनं मतम् ।
सौम्यं मध्यस्थतारं च दर्शनं सममुच्यते ।६६९।
साच्युच्यते तिरश्चीना पक्ष्मान्तर्गत-तारका ।
कात्स्न्र्येन दृश्यग्रहणादनुवृत्तं चिरस्थितेः ।६७०।
अधःस्थदर्शनं यत्तदवलोकितमुच्यते ।
पृष्ठतो दर्शनं यत्तद्विलोकितमुदाहृतम् ।६७१'
उल्लोकितं तदूर्द्ध्वस्थ वस्तुनो यदवेक्षणम् ।
सहजं दर्शनं यत्तदालोकितमुदीरितम् ।६७२।

पार्श्वस्थ दर्शनं प्रोक्तं कृतिभिः प्रविलोकितम् ।
साधारणान्यमून्याहुः रसभावेष तद्विदः ।
इति सप्तदशावोचन् ताराकर्माणि नर्त्तकाः ।६७३।

इति ताराकर्माणि ।

अथ भ्रूः--

सहजा पतितोत्क्षिप्ता रेचिता कुञ्चिता तथा ।
भ्रुकुटी चतुरा चेति प्रोक्ता भ्रूः सप्तधा वुधैः ।
स्वाभाविकी स्यात्सहजा भावेष्वकुटिलेष्वसौ ।६७४।

इति सहजा ।

पतिता स्यादधो जाता स द्वितीयाथवा क्रमात् ।
उत्क्षेपे विस्मये हर्षे रोषेऽसूयाजुगुप्सयोः ।
हासे घ्राणे च पतिते विधीयेतामुभे भ्रुवौ ।६७५।

इति पतिता ।

उत्क्षिप्ता सम्मतान्वर्था क्रमेण सह वाऽन्यथा ।
स्त्रीणां कोपे वितर्के च दर्शने श्रवणेऽन्तिके ।
भ्रूर्लीलाहेलयोश्चैषा कार्योत्क्षिप्ता विचक्षणैः ।६७६।

इत्युत्क्षिप्ता ।

केवला सद्वितीया वा मृदुभङ्गा निकुञ्चिता ।
मोट्टायिते कुट्टमिते विलासे किलकिञ्चिते ।६७७।

इति कुञ्चिता ।

अमूला सद्वितीया च भ्रूःक्षिप्ता भ्रकुटिः क्रुधि ।

इति भ्रूकुटिः ।

सद्वितीयाऽल्पनिष्यन्दादायता मन्थरा भवेत् ।
चतुरा रुचिरे स्पर्शे शृङ्गारे ललिते च सा ।६७८।

इति चतुरा ।

इति सप्तधा भ्रूः

अथ पुटकर्माणि—

उन्मेषश्च निमेषश्च प्रसृतं कुञ्चितं समम् ।
विवर्त्तितं प्रस्फुरितं पिहिताख्यं विताडितम् ।६७९।

इत्थं नवविधं कर्म पुटयोः परिकीर्त्तितम् ।
पुटयोः यस्तु विश्लेषः स उन्मेष प्रकीर्त्तितः ।६८०।
इत्युन्मेषः ।

समागमो यः पुटयोस्तं निमेषं प्रचक्षते ।
इति निमेषः ।

तयोर्विस्तारनम्रत्वे क्रमात् प्रसृत-कुञ्चिते ।६८१।
इति प्रसृत-कुञ्चिते ।

स्वाभाविकमवस्थानं पुटयोः सममुच्यते ।
इति समः ।

पुटयोर्या समुद्वृत्तिस्तद्विवर्त्तितमुच्यते ।६९२।
इति विवर्त्तितम् ।

स्पन्दः स्फुरितं प्रोक्तं । इति प्रस्फुरितम् ।
संश्लेषः पिहितं मतम् । इति पिहितम् ।
अन्योन्यमभिघातो यः पुटयोस्तद्वितांडितम् ।६८३।
इति वितांडितम् ।

अथषां विनियोगः—

क्रोधे विवर्त्तितोन्मेषनिमेषाः प्रसृतं पुनः ।
वीरविस्मयहर्षेषु स्वभावाभिनये समम् ।६८४।
वितांडितमभिघाते स्फुरितं करुणेर्ष्ययोः ।
सुप्तमूर्छितवातोष्णधूमवाष्पाञ्जनार्त्तिषु ।
नेत्ररोगे च पिहितं दुर्गन्धादौ तु कुञ्चितम् ।६८५।
इति नवधा पुटकर्माणि

अथ वदनम्—

व्याभुग्नं भुग्नमुद्वाहिविधूतं विकृतं तथा ।
विनिवृत्तमिति प्राज्ञाःषड्विधं वदनं जगुः ।६८६।
किञ्चिदायामवक्त्रं च व्याभुग्नं मुखमुच्यते ।
निर्वेदौत्सुक्यचिन्तादौ तदुक्तं पूर्वसूरिभिः ।६८७।
इति व्याभुग्नम् ।

अधोमुखं तु भुग्नं तल्लज्जायां प्रकृतौ ग (य) तेः ।

इति भुग्नम् ।

लीलासूत्क्षिप्तमुद्वाहि गर्वानादरण गतौ ।६८८।

इत्युद्वाहि ।

रावणे (?) नैतदित्युक्तौ विधूतं तिर्यगायते ।

इति विधूतम् ।

विश्लिष्टोष्ठं तु विकृतं ह्रासशोकभयादिषु ।६८९।

इति विकृतम् ।

विनिवृत्तं परावृत्तं रोषेर्ष्याऽसूयितेषु तत् ।६९०।

इति विनिवृत्तम् ।

इति षोढावदनम् ।

अथ नासा:—

स्वाभाविकी नता मन्दा विकृष्टा च वहून्नता ।
सोच्छ्वासेत्युदिता नासा षड्विधा शार्ङ्गसूरिणा ।
स्वाभाविकी स्यादन्वर्थे भावे गर्वेण वर्जिते ।६९१।

इति स्वाभाविकी ।

मुहुः संश्लिष्ट-विश्लिष्ट-पुटा नासा नता मता ।
सोच्छ्वासाभिनये मन्दा (न्द)विच्छिन्नरुचिगोचरा ।६९२।

इति नता ।

मन्दा तु मन्दनिःश्वासोच्छ्वासा नासाभिधीयते ।
सचिन्तौत्सुक्ययोः शोके निर्वेदे चाभिधीयते ।६९३।

इति मन्दा ।

विकृष्टात्यन्तमुत्फुल्लपुटा रोषार्त्तिभीतिषु ।
ऊर्द्ध्वश्वासे च कर्तव्या घ्रातव्ये भूरिसौरभे ।६९४।

इति विकृष्टा ।

वहून्नता संकुचिता हास्येऽसूयाजुगुप्सयोः ।

इति वहून्नता ।

आकृष्टश्वसनानासासोच्छ्वासा सौरभे भवेत् ।
निर्वेदादिषु भावेषु दीर्घोच्छ्वासकरेषु च ।६६५।

इति सोच्छ्वासा ।

इति षोढा नासा

स्वस्थश्चलोऽप्रवृद्धस्तु निरस्तोल्लासितवपि ।
वियुक्तो विस्मितः श्वासः स्खलितः प्रसृतस्तथा ।६६६।

एवमुछ्वासनिःश्वासौ नवधा कोहलोदितौ ।
स्वस्थादुछ्वासनिःश्वासौ वायुसंज्ञौ स्वभावजौ ।६६७।
स्वस्थक्रियासु कर्तव्यावुक्तौ निःशङ्कसूरिणा ।

इति स्वस्थौ ।

उष्णौ दीर्घौ सशव्दौ च तौ मुखेन कृतौ चलौ ।
कार्यावौत्सुक्यनिर्वेदशोकचिन्तास्विमौ मतौ ।६६८।

इति चलौ ।

प्रवृद्धस्तु स्वशव्देन वदनेन विनिर्गतः ।
निःश्वासः स्यात् प्रवृद्धाख्यः क्षयव्याधादिगोचरः ।६६९।

इति प्रवृद्धः

सशव्दः स सकृत्क्षिप्तो निरस्तः कथ्यते मरुत् ।
दुःखान्विते सरोषे च शान्ते चैष विधीयते ।७००।

इति निरस्तः ।

चिरा(?)न्मन्द-निपातश्च घ्राणेनोल्लसितोमरुत् ।
हृद्ये गन्धे विधातव्यः सन्दिग्धे च विचक्षणैः ।७०१।

इत्युल्लसितः ।

संयम्य सुचिरं मुक्तो वियुक्तः कथ्यतेऽनिलः ।
स्याद्दशम्यां दशायां सा व्याधौ प्रस्खलितेषु च ।७०२।

इति स्खलितः ।

प्रसुप्ते प्रसतो दीर्घः सशब्दो निर्गतो मुखात् । इति प्रसृतः ।

इति नवविधः श्वासानिलः ।

इतोऽन्यथा दशविधं वदत्यन्ये मनीषिणः ।
उदटं किं तै तेन (?) मयानार्थोऽस्ति तत्र यत् ।७०३।

अथ चिवुकम्——

व्यादीर्णं श्वसितं वक्रं संहृतं चलसंहृतम् ।
स्फुरितं चलितं लोलमेवं चिवुकमष्टधा ।७०४।
दुर्लक्ष्यत्वान्मया नैषां लक्षणं समुदीरितम् ।

इति चिवुकम् ।

अथ जिह्वा——

ऋज्वी सृक्कानुगावक्रोन्नतालोला च लेहिनी ।
जिह्वेति षड्विधा तत्र प्रसृतास्ये प्रसारिता ।७०५।
ऋज्वी श्रमे पिपासायां श्वापदानां प्रयुज्यते ।

इति ऋज्वी ।

सृक्कानुगा स्यादन्वर्था प्रकोप-स्वादुभक्ष्ययोः ।७०६।

इति सृक्का ।

व्यात्तास्यस्थोन्नताग्राच वक्रा स्वादनिरूपणे ।

इति वक्रा ।

व्यात्तास्यस्थोन्नतान्वर्था जृम्भास्यान्तःस्थवीक्षयोः ।७०७।

इत्युन्नता ।

व्यात्ते वक्त्रे चला लोला वेतालाभिनये भवेत् ।

इति लोला ।

दन्तौष्ठं लिहती जिह्वा लेहनी सम्मता मुनेः ।७०८।

इति लेहनी ।

इति षोढ़ा जिह्वा

अथ गण्डौ—

कुञ्चितौ कम्पितौ पूर्णौ क्षामौ फुल्लौ समौ तथा ।
कपोलौ षड्विधौ दुर्लक्ष्यत्वान्नोक्तं तु लक्षणम् ।७०९।
इति षड्विधकपोलौ ।

अथ दन्तकर्म—

कुट्टनं खण्डनं छिन्नं वुक्कितं ग्रहणं समम् ।
दष्टं निष्कर्षणं चेति दन्तकर्माष्टकं जगुः ।७१०।
संघर्षणं कुट्टनं स्यात् शीतरुक्भीजरासु चेत् ।
इति कुट्टनम् ।

खण्डनं तु मुहुर्दन्त-श्लेष-विश्लेषणं मतम् ।
जपाध्ययनसंलापभक्षणेषु भवेदिदम् ।७११।
इति खण्डनम् ।

छिन्नं स्याद्गाढसंश्लेषो रोदने भीतिशीतयोः ।
व्याधौ च वटिका-छेद-व्यायामादिषु कीर्त्तितम् ।७१२।
इति छिन्नम् ।

दन्तपङ्क्त्योः स्थितिर्दूरे वुक्कितं जृम्भणे भवेत् ।
इति वुक्कितम् ।

तृणस्य चाङ्गुलैर्दन्तैर्द्धारणं ग्रहणं भवेत् ।७१३।
इति ग्रहणम् ।

किञ्चिच्छ्लेषं समं तच्च स्वभावाभिनये मतम् ।
इति समम् ।

अधरे दशनं दन्तैर्दष्टं क्रोधेऽभिधीयते ।७१४।
इति दष्टम् ।

निष्कर्षणं तु निष्कास्य कार्यं मर्कट-रोदने ।
इति निष्कर्षणम् ।

इत्यष्टौ दन्तकर्माणि ।

अथाधरः—

विवर्त्तितः कम्पितश्च विसृष्टो विनिगूहितः ।
संदष्टकः समुद्गश्चेत्यधरः षड्विधो मतः ।७१५।
ओष्ठयोः संपुटस्तिर्यक् संकोचेन विवर्त्तितः ।
अवज्ञावेदनासूया हास्यादिषु विधीयते ।७१६।
इति विवर्त्तितः ।

व्यथायां कम्पितोऽन्वर्थो भीतौ शीते जये रुषि ।
इति कम्पितः ।

विसृष्टः स्याद्विनिष्क्रान्तो रञ्जनेऽलक्तकादिषु ।
स्त्रीणां विलासे विव्वोके शार्ङ्गदेवेन कीर्त्तितः ।७१७।
इति विसृष्टः ।

मुखान्तर्निहितप्राणः साध्येषु विनिगूहितः ।
रोषेर्ष्ययोस्तु नारीणां वलाच्चुम्वति वल्लभे ।७१८।
इति निगूहितः ।

संदष्टकोऽधरो दन्तैर्दष्टः क्रोधेऽभिधीयते ।
इति संदष्टः ।

समुद्गस्तु भवेदोष्ठ-संपुटोदधदुन्नतिम् ।
स्यात्फुत्कारेऽनुकम्पायां चुम्वने चाभिनन्दने ।७१९।
इति समुद्गः ।

अन्येऽन्यान् चतुरोऽप्याहुरत्रैवान्तर्भवन्ति ते ।७२०।

अथ मुखरागः—

स्वाभाविकः प्रसन्नश्च रक्तः श्यामस्तथैव च ।
चतुर्द्धा मुखरागोऽत्र नरः(?) स्वाभाविको मतः ।
अनादिष्टेषु भावेषु सुधीभिः स प्रयुज्यते ।७२१।

इति स्वाभाविकः ।

प्रसन्नो निर्मलो हास्ये शृङ्गारे चाद्भुते भवेद् ।

इति प्रसन्नः ।

रक्तोऽरुणः स्यात् करुणे । इति रक्तः ।

श्यामो वीभत्सके भये ।७२२। इति श्यामः ।

इति चतुर्द्धा मुखरागः ।

इति द्वादशशिरोगतान्युपाङ्गानि ।

अथ करचरणोपाङ्गानि—अथ पार्ष्णिः—

उत्क्षिप्ता पतितोत्क्षिप्ता पतितान्तर्गता तथा ।

वहिर्गता मिथोयुक्ता वियुक्ताङ्गुलिसंयुता ।७२३।

पार्ष्णिरित्यष्टधा पाद-चारी स्थानेषु दृश्यते ।

गुल्फावङ्गुष्ठसंश्लिष्टावन्तर्जानौ वहिर्गतौ ।७२४।

मिथोयुक्तौ वियुक्तौ च पञ्चधास्थानकादिषु ।

संहता वियुता वक्रा वलिताः पतितास्तथा ।७२५।

कुंचन्मूलाः कराङ्गुल्यः प्रसृताश्चेति सप्तधा ।

एते पार्ष्ण्यादि भेदाःस्युः संज्ञा-विज्ञान-लक्षणाः ।७२६।

अधः क्षिप्तास्तथोत्क्षिप्ताः कुंचिताश्च प्रसारिताः ।

संलग्नाश्चेति चरणाङ्गुल्यः पञ्चधा मताः ।७२७।

पतिताग्रं चोद्धृताग्रं भूमिलग्नमथोद्धृतम् ।

कुञ्चन्मध्यं तिरश्चीनमिति षोढातलं विदुः ।

नामानुरूपमेतेषां ज्ञातव्यं लक्षणं वुधैः ।७२८।

इति करचरणोपाङ्गानि ।

अथ नृत्याङ्गानि—

स्थानकानि तथा चारी करणं मण्डलं तथा ।

अङ्गहाराश्च भरते नृत्याङ्गं पञ्चधोदितम् ।७२९।

अधिष्ठाय स्थानकानि चार्यादीः कुर्वते नटाः ।
रङ्गभूमौ यतस्तेन तान्यादावभिदध्महे ।७३०।

संनिवेशविशेषोऽङ्गे योऽचलः स्थानमुच्यते ।
स्थितं स्थानं स्थानकर्मेत्येतत् एकार्थवाचकाः ।७३१।

ऊर्द्धोविपविष्ट सुप्ताख्य भेदात्तत् स्थानकं त्रिधा ।
मार्गदेशीति भेदेन तत्रोर्द्ध स्थानकं द्विधा ।७३२।

मार्गोर्द्ध स्थानकं वक्ष्ये तत्र स्त्रीपुंसयोः पृथक् ।
पुंसां षट् स्थानकानि स्युर्वैष्णवं समपादकम् ।७३३।

वैशाखं मण्डलं प्रत्यालीढमालीढमेव च ।
सप्त स्त्रीणां चावहित्थमश्वक्रान्तं तथायतम् ।७३४।

गतागतं मोट्टितं च वलितं विनिर्वत्तितम् ।
अथ देशी स्थानकानां चतुर्विंशतिरुच्यते ।७३५।

समपादं संहताख्यं स्वस्तिकं वर्द्धमानकम् ।
नन्दावर्त्ताभिधं चैव चतुरस्राभिधं ततः ।७३६।

एकपादं पार्ष्णिविद्धं पृष्ठोत्तानतलं ककम् (?) ।
एकजानु-नतं स्थानं पार्ष्णिपार्श्वगतं ।७३७।

एकपार्श्वगतं तद्वतसमसूच्यभिधस्तथा ।
ततो विषमसूचिः स्यात् खण्डसूचिः ततः परम् ।७३८।

परावृत्तमथ ब्राह्मं वैष्णवं शैवगारुडे ।
कूर्मासनं नागवन्धं वृषभासनमित्यपि ।७३९।

इति चतुर्विंशति देशी स्थानानि ।

स्थानानि चोपविष्टस्य नवेदानीं प्रचक्ष्यते ।
स्वस्थं विष्कम्भितं क्रान्तमुत्कटं च मदालसम् ।७४०।

ग्रस्तालसं चानुगतं मुक्तजानु विमुक्तकम् ।

इति नवोपविष्टस्थानानि ।

षट्स्युः सुप्तस्थानकानि सममाकुञ्चितं तथा ।
नतमुद्वाहितं चैव प्रसारित विवर्त्तिते ।७४१।
इति षट्सुप्तस्थानकानि ।

षट् पुंसां सप्तनारीणां स्युश्चतुर्विंशतिर्द्वयोः ।
स्थानकान्युपविष्टस्य नवसुप्तस्य षट् ततिः ।
एवं स्युर्मिलितान्यत्र द्विपञ्चाशदनुक्रमात् ।७४३।
इति स्थानकानि ।

अथ चार्यः—

चित्राचरणजङ्घोरुकटिनिष्पादितक्रिया ।
चारीति कथ्यते तज्ज्ञैरंघ्रेश्चारीति चारणात् ।
भवेत्तत् साधकतमं करणं हस्तकांचितः(तम्) ।७४४।

दामोदरस्तु—

शृङ्गारादिरसानां तु भावोद्दीपनकारिका ।
माधुर्योद्वर्त्तिनी नित्यं चारी चारुगतिर्मता ।७४५।
चारिके करणं खण्डो मण्डलं चेति तद्भिदाः ।
तत्रैकपादनिष्पाद्या चारी चार्येव कथ्यते ।७४६।
सा च पदाभ्यां करणं तन्नृत्तकरणात् पृथक् ।
करणैः स्यात् त्रिभिः खण्डः मण्डलं खण्डकैस्त्रिभिः ।७४७।
चतुर्भिर्वा क्रमात्ताले त्र्यस्रे वा चतुरस्रके ।
सेयं चारी द्विधा ज्ञेया भौमीत्याकाशिकीति च ।७४८।
मार्गदेशीविभेदेन प्रत्येकं ता अपि द्विधा ।
मार्गे षोडश भौम्यः स्युराकाशिक्योऽपि षोडश ।७४९।
देश्योऽपि द्विविधा भौम्य आकाशिक्य इति क्रमात् ।
पञ्चत्रिंश देशीभौम्य(?) आकाश्यः पञ्चविंशतिः ।७५०।
क्रमेण आसामभिधाः कथ्यन्ते भरतोदिताः ।
समपादस्थितावर्त्ता शकटास्या च विव्यध(?) ।७५१।

अध्यर्द्धिका चाषगतिरैलकाक्रीडिता तथा ।
पस्यन्दितास्यन्दिता च वद्धा च जनिताभिधा ।७५२।

समो सरित मतल्ल्यु मत्तल्लं स्पन्दितार्हिता ।
उद्वृत्ताचेति कथिता भौम्यः षोडशचारिकाः ।७५३।

अतिक्रान्ताप्यपक्रन्ता पार्ष्णिक्रान्ता मृगप्लुता ।
ऊर्द्ध्वजानुरलाता च सूचीनपुर-वादिका ।७५४।

दोलपादा खण्डपादा विद्युद्भ्रान्ताभ्रमर्यपि ।
भुजङ्गत्रासिता क्षिप्ता विद्धो वृत्तेति षोडश ।७५५।

आकाशिक्यस्तु मिलिता द्वात्रिंशन्मर्गगाः स्मृताः ।
रथचक्रा मराला च करिहस्ता कुलारिका ।७५६।

तिर्यङ्मुखी परावृत्त-तला नूपुर-वर्द्धिका ।
भरुवेणी तलावृत्ता विश्लिष्टा पार्ष्णिरेचिता ।७५७।

हरिणत्रासिता तिर्यक् कुञ्चिता कातराभिधा ।
स्तम्भ-क्रीडनिकाप्यूरु-ताडिता स्यान्मदालसा ।७५८।

संचारिता कुञ्चितास्यादर्द्धमण्डलिका ततः ।
खित्ता लंघितजङ्घा च स्फुचित्रातलदर्शिनी ।७५९।

संघट्टिका स्वस्तिका च पुराटय्यर्द्ध पुराटिका ।
निकुट्टिता लताक्षेपा सारिता (का) स्योपकुञ्चिता ।७६०।

स्फुरिताड्ड स्खलितिका सम्भस्खलतिकेति च ।
पञ्चत्रिंशदिमाश्चार्यो देश्यो भौम्यः प्रकीर्त्तिताः ।७६१।

दण्डपादाः पुरः क्षेपा विक्षेपा हरिणप्लुता ।
तापक्षेपा च(भ्र)ड़मरी विद्युद्भ्रान्ताङ्घ्रिताडिता ।७६२।

जंघा लंघनिका जंघावर्त्ताऽलाता च वेष्टना ।
सूचिकोद्वेष्टनोत्क्षेपा पृष्ठोत्क्षेपा ततः परम् ।७६३।

विद्धोल्लोला परावृत्ता देश्य एकोनविंशतिः ।
आकाशिक्या मिलित्वा तु चतुःपञ्चाशदीरिताः ।७६४।

अथ करणानि—

स्थानचारिहस्तकादेरौचित्येन प्रवर्त्तनम् ।
अविच्छिन्नरसं वृत्तं करणं परिचक्ष्यते ।७६५।
नृत्तस्य करणत्वेऽपि षष्ठीस्यादुपचारतः ।

शार्ङ्गदेवोऽप्याह—

स्यात् क्रिया करपादादेर्विलासेनात्रुटद्रसम् ।
करणं नृत्त-करणं भीमवद्भीमसेनवत् ।७६६।

तानि च—

तलपुष्पपुटं वक्षः स्वस्तकं लीनमञ्चितम् ।
मण्डलस्वस्तिकाक्षिप्त-रेचिते वलितोरु च ।७६७।
स्वस्तिकं वर्त्त(र्त्ति)कं पृष्ठ-स्वस्तिकं च कटी-समम् ।
अपविद्धं समनखं छिन्नं स्वस्तिक-रेचितम् ।७६८।
अर्द्धस्वस्तिकमुन्मत्तं कटीछिन्नं निकुञ्चितम् ।
निकुट्टार्द्ध-निकुट्टे च विक्षिप्ताक्षिप्तघूर्णिते ।७६९।
दिक्स्वस्तिकमलाताख्यमूर्द्ध्वजानूर्द्ध्वरेचितम् ।
भुजङ्गत्रासितं दण्डपक्षपादापविद्धकम् ।७७०।
मत्तल्ली चार्द्धमत्तली स्याद्रेचकनिकुट्टनम् ।
ललितं वलितं चैव भुजङ्गत्रस्तरेचितम् ।७७१।
नूपुरं भ्रमरं दण्डरेचितं चलुरं ततः ।
व्यंसितं च कटीभ्रान्तं क्रान्तं च भुजगाञ्चितम् ।७७२।
लता-वृश्चिकमाक्षिप्तार्गले वृश्चिकरेचितम् ।
ललाटतिलकं दोल-पादं वृश्चिककुट्टितम् ।७७३।
वैशाखरेचितं पार्श्वनिकुट्टं चक्रमण्डलम् ।
वृश्चिकं कुंचितावर्त्ते तथा तल-विलासितम् ।७७४।

नि(वि)वृत्तं विनिवृत्तं च विद्युद्भ्रान्तं निशुम्भितम् ।
पार्श्वक्रान्तमतिक्रान्तमुरोमण्डलमेव च ।७७५।

गजक्रीडनकं गण्डसूच्याख्यं च विवर्त्तितम् ।
गृध्रावलीनं विक्षिप्तं सूच्यथो गरुडप्लुतम् ।७७६।

तलसंस्फोटितं सूचीविद्धं च हरिणप्लुतम् ।
पार्श्वजानूर्द्ध्वसूची स्यात् सर्पितं करिहस्तकम् ।७७७।

प्रेङ्खोलितं दण्डपादं मयूर-ललितं तथा ।
परिवृत्तं सन्नतं च नितम्वं स्खलिताभिधम् ।७७८।

सिंहविक्रीडितं सिंहाकर्षितं च प्रसर्पितम् ।
अवहित्थमपक्रान्तं निवेशं जनिताभिधम् ।७७९।

एलकाक्रीडमुद्वृत्तं लोलितोपसृते तथा ।
तलसंघटितं विष्णु-क्रान्तं सम्भ्रान्तसंज्ञकम् ।७८०।

विष्कम्भमूरुवृत्ताख्यं मदस्खलितमेव च ।
शकटास्यं च वृषभक्रीडितोद्घटिते तथा ।७८१।

नागापसर्पितमथो गंगावतरणं ततः ।
इत्थमष्टोत्तरशतं करणान्यूचिरे वुधाः ।७८२।

चार्यादिकॢप्तिवाहुल्यादनन्तानीति केचन ।
कर्त्तव्यः करणे प्रायो वामो वक्षः स्थितः करः ।७८३।

पाणिस्तु दक्षिणस्तत्र स्यात्तत्तत् करणानुगः ।
तलपुष्पपुटस्यादौ करणस्य प्रकीर्तनात् ।७८४।

प्रारम्भे देवता-पूजा पुष्पैः कार्येति सूच्यते ।
मङ्गलं सर्वनृत्यानां समाप्तौ कारयेदिति ।७८५।

गङ्गावतरणस्यान्ते कीर्त्तनादवदन्मुनिः ।
अथ देश्यनुसारेणो ल्पुतिपूर्वाणि यानि तु ।७८६।

षट्त्रिंशकरणानीह तान्युच्यन्ते मयाधुना ।
अञ्चितं चैकपादाञ्च चितकं भैरवाञ्चितम् ।७८७।

दण्डप्रणामाञ्चितं च कर्त्तर्यञ्चितकं ततः।
अलगं त्रीणि कूर्माद्धान्तरपूर्वलगानि च।७८८।

कूर्मालगं अद्धालगं अन्तरालगं चेत्यर्थः।

लोहडीकर्त्तरी लोहड्येक पादादि लोहडी।
ततः स्याद्दर्पसरणं जलशायि ततः परम्।७८९।
कपालघूर्णनं नागवन्धं च नतपृष्ठकम्।
सूच्यन्तं मत्स्यकरणं करस्पर्शनमेव च।७९०।
एणप्लुतं ततस्तिर्यक् करणं तिर्यगञ्चितम्।
छत्रचक्रा लगशिरो वाह्यान्तस्तिरपोचिताः।७९१।
दिक्चेति पूर्वाभ्रमरी छत्रभ्रमरिका तथा।

चक्रभ्रमरी, अलगभ्रमरी, वाह्यभ्रमरी, शिरोर्भ्रमरी, अन्तभ्रमरी, तिरिपभ्रमरी, दिक्भ्रमरी।

समपादाञ्चितं स्कन्धभ्रान्तं पादाञ्चितं तथा।७९२।

इत्युप्लुति पूर्वाणि षट्त्रिंशद्देशी करणानि।

अथोच्यते षट्कलास-करणानि च नामतः।
विद्युत्खड्गौ मृगवकौ प्लवहंसावितिक्रमात्।७९३।
प्रभेदाः षट्कलासस्य ते च भिन्नाः पृथक् पृथक्।
प्लुतेन विद्युत् खड्गौ च गुरुणादौ मृगो वकः।७९४।
मण्डूको लघुना हंसो द्रुतेन परिजायते।
तत्र विद्युत् कलासाख्यः षोढा खड्गश्चतुर्विधः।७९५।
एको मृगकलाः सः स्याच्चतुर्द्धावकसंज्ञकः।
चतुर्द्धा दर्द्दुरो हंसः कलासस्त्रिविधो भवेत्।७९६।
एवं द्वाविंशतिर्भेदाः कलासानां प्रकीर्त्तिताः।

इति द्वाविंशतिकलासकरणानि।

रेचितोर्द्ध्वनिकुट्टश्च वृश्चिकापसृतस्तथा ।
अलातकः परावृत्तः परिर्वात्तक-रेचितः ।८१५।
उद्वृत्तश्चैवसंभ्रान्तस्तथा स्वस्तिक-रेचितः ।
अङ्गहाराः षोडशामी द्वात्रिंशदुभये मताः ।८१६।

परन्तु—

करणोत्पाद्यमानत्वधर्मसामान्ययोगतः ।
सर्वेऽप्यमी कलासाद्या अङ्गहाराः प्रकीर्तिताः ।८१७।

इति रत्नाकरः ।

अथ रेचकाः—

अङ्गानि चाङ्गहाराणां रेचकास्तान् प्रचक्ष्महे ।
ग्रीवायां पादयोः कट्यां हस्तयोश्च भवन्ति ते ।
विधूतभ्रमणं प्राहुः ग्रीवायाः कण्ठरेचकम ।८१८।

इति ग्रीवारेचकः ।

अंगुष्ठादङ्गुलीनां या पाष्ण्योंश्चान्तर्वहिः सदा ।
नमनोन्नमनोपेता गतिः सा पादरेचकः ।८१९।

इति पादरेचकः ।

सर्वतो भ्रमणं कट्याः कटिरेचकमचिरे ।८२०।

इति कटिरेचकः ।

परितो भ्रमणं तूर्णं करयोः हंसपक्षयोः ।
यत्पर्यायेण रचितं स भवेत्कररेचकः ।८२१।

इति कररेचकः ।

करणैरङ्गहाराः स्युः रेचकोपवृतैः शुभाः ।
पृथक्प्रयक्ता अप्येते जनयन्ति पृथक् फलम् ।८२२।

इति कररेचकचतुष्टयम् ।

अथैतत्साधनप्रकारः—

तैलाभ्यक्तेन गात्रेण लघ्वाहारो जितश्रमः ।
स्तम्भे वा भित्तिदेशे वा निस्तन्द्रस्तु तदभ्यसेत् ।८२३।

रुक्षाहारं शाकमम्लं स-कर्ण्णक-झसानपि ।
वर्जयेत् साधने तेषां भोजनोपरि नाभ्यसेत् ।८१४।

न्यायश्च शार्ङ्गदेवोक्तो भरतादिश्चतुर्विधः ।
परं युद्धे प्रयोज्यः स इति नौत्र मयोदितः ।८२५।

तदुक्तम्——

युद्धे परास्त्रशस्त्राणां क्रमाद्वारणपातने ।
विधातुमुचितागात्रवलना न्याय उच्यते ।८२६।

नाट्याङ्गानि मयोक्तानि परमद्देशमात्रतः ।
विशेषलक्षणान्येषां ज्ञायन्तां तत्तदाकरात् ।८२७।

ज्ञेयान्यभिनयैरेव यन्न केवललक्षणैः ।
तन्नालेखिषतैतानि मया बाहुल्यभीरुणा ।८२८।

इति निखिलान्ववायोत्तुङ्ग चोडगङ्गवंशावतंसाशेषगुणसद्म पद्मनाभ-भूमिपतितनुजन्मनो महाराजाधिराजस्य साहित्यसङ्गीतार्ण्णवकर्ण्ण-धारकमणेर्गजपतिवीरश्रीनारायणदेवस्य कृतौ सङ्गीतनारायणे नाट्यनिर्ण्णयो नाम तृतीयः परिच्छेदः ।

चतुर्थ-परिच्छेदः

अथोदाह्रियते किञ्चित् शुद्धसालगगीतयोः ।
एतद्दिशानुस्रियतामन्येषामप्युदाहृतिः ।१।

तत्रादितालेन मालवरागेण—

जय रोहिणीसुत सुरमण्डलनुत दुर्जन-तर्जन-पण्डित रे ।
खण्डपरशुकृत ताण्डवपरिपतदमरधुनीरुचिखण्डित रे ।
आखण्डलमणिखण्डसमप्रभ-सिचय-युगलतनुभूषणु आ ।
अम्वुदचुम्विनितम्वमहेश्वरगिरिनिभविगलित दूषणु आ ।

पाट—झैं झैं झैं क्रिणथो ङ्गिटनाङ्गिट खटमटरट किट
द्रां द्रमिकिट धाकुं धाकुं खिं तारिझां झां तारि ता ता दुगता ।

स्वर—स नि ध ग नि स ता सं स म स नि ग म ध
सं म न म स ग नि ग सा सा सा ।

तेन—तेनाते नातेनां तेनां तेना तनां तेनां तेनां तेना इ आ ।

अड्डुतालेन धनासी रागेण—

सीरधर धरणिरपि तव शिरसि शोभते ।
व्रजयोषिदधररसपानोधृत लोभते ।
वदनतलवलदनल सकलकदलीकृतौ ।
यस्त्वमसि विभुरस्तु कोऽस्य महिमस्तुतौ ।

झम्पतालेन दक्षिणश्रीरागेण—

कामपालवकुलमाल भारहारि शिरसिजे ।
रैवतगिरितनया परिरम्भदम्भपृथुभुजे ।

धृताटोपरचितकोप कपटगोप-शासने ।
वल विलसतु हृदयं त्वयि निखिलकलुषनाशने ।

पाट—द्रां द्रां किटथोङ्गिना किट तात्तादि धिमिकि थोङ्गिना ।
स्वर—सा स्सा स्सा निगम निगम पतेन न्नाते नाते नातेना ।

यति तालेन गुज्जरीरागेण—

वल्लवीकर पल्लवोदर मल्लीताडन धृतदरे ।
मुष्टिकाभिध-मल्लतल्लज-कायपेषण-पटुतरे ।।
द्विविदवारण-कुम्भदारण-कर्म-केशरि-नायके ।
लाङ्गलायुध ममममनस्त्वयि सङ्गतं शुभदायके ।।

झम्पा तालेन नट्टरागेण—

आकृष्टदिवसकर-तनयनयवृद्धे ।
कलतीर्थगमनपदकृतसकल-शुद्धे ।
रक्षमामक्षधृत पददन्त-वक्रे ।
धरणिभुजि धृतरोष हृतदहन-चक्रे ।

थोङ्गिकिट झेंक्रिणा ताथ्थारिक द्रां द्रां ।
निगम सरिधप धिकट द्रमिक द्रमितात्ता ।

कुडुकतालेन वङ्गालरागेण—

आसवपानमधुरमरुणद्युति चञ्चलमेचकतारम् ।
लज्जितमध्यविलोलिमधुव्रत-शोणितकमलमुदारम् ।
हलधर तव वदनं कमनीयम् ।
मनसि ममास्तु सतामवनीयम् ।

त्रिपुटतालेन वसन्तरागेण—

शिखरमण्डलमण्डितोत्तम कुण्डलैकविराजितम् ।
चण्डकरसुत दण्डखण्डन-पण्डितं त्रिदशार्चितम् ।

यादवान्वय-दुग्धवारिधिकुमुदवान्धवमीश्वरम् ।
भावयामि भवन्तमनिशं ब्रह्मरूपमनीश्वरम् ।

तात्ताधारिकु कु द्रि मि क्रि द्रां क्रिटथोङ्गि थोङ्गि टनाङ्गिनाः।
सस्सारिग म प ध नि सा तेन्नां तेन्नां तेना तेना ।

रूपकतालेन भैरवरागेण ।

अरुणायित नयनकोण विमर्द्दीकृतरक्षसम् ।
करुणाकरविपुलवाहुमुद्धरतरवक्षसम् ।
चरणानत भव सुरभवन्तमाश्रयामि लोचने ।
शरणावन मयि निधेहि कलित विविध शोचने ।

अथाभोगो ? ताल: --

श्रीनीलाचलकन्दरामन्दिरविहारिगोविन्दपदारविन्दद्वन्देन्दिरायितमानस: सन्तीर्णसकलसाहित्यसङ्गीततरङ्गिणीततिपति: पदविरुदस्वरपाटतलतेना सहितं मेदिनीजातिकलितं वलभद्रोदयं नाम नवरागनिवद्धं शुद्धप्रवन्धं श्रीनारायणदेवमहीपतिर्विरचितवानिति ।
देशगाल (?) रागेण एकतालीतालेन--

मूसलायुध विवुधाधिविधूनन धरणीधारण धीतमुख रे ।
वरुणसुतापरिरम्भण लम्भितसम्भ्रमतर्जितविधुमुख रे ।
मुकुटायित विकटोद्धुरफणिगणतनुर्निजितहिमभूधर रे ।
भवसागर परिपतितममुं जनमवशमहर्निशमुद्धर रे ।

त्ता दि मि दि मि किट थोङ्गिट नाङ्गिट झें कुकु झें क्रिण झो
तारि रे ।

म म नि ध गम नि स नि ध म म ध नि धतेनां तेनां तेना तेना आ।।

जय रोहिणीसुत सुरमण्डलनुत ।

इत्यादि तालस्य प्रथमकलायां मानम् ।

अयमेवप्रवन्धो यद्येकरागनिबद्धः स्वरपाटतेनारहितश्च तदा सूड प्रवन्धोऽप्युच्यते । तत्र प्रमाणमलेखि ।

अथ सालगसूडोदाहरणं दक्षिणश्रीरागेण तत्रादिताल उभयलक्षणः ।

ध्रुवलक्षणः—

जय जय जनकसुताधव राघव निखिलभुवनजनरञ्जन रे ।
हैहयवंशवतंस महीपति भञ्जन भृगुपति गञ्जन रे ।

प्रथमखण्डः—

तरुणसुधाकरमुकुटशरासन शासनमनुकुलमण्डन रे ।
विपुलभुजावल भूषण दूषणमुखखरसैनिकखण्डन रे ।

उच्चखण्डः ध्रुवः—

शरणागतजनतारणवितरण लज्जितनिर्जरतरुवर आ ।
तिअ आई अ अई आईता अईतिता नारायणनृप—
मवतु भवान ।। इत्याभोगः ।

अस्यैव मण्ठलक्षणे—

अविकलशारद-शशधरवदनं ।
कुन्दमुकुल परिहासकरदनम् ।

प्रथमखण्डः—

मनः शताधिक सुरुचिरकायम् ।
स्मृतिलवाविधुत दुरुत्तरमायम् ।
पृथुतिलकुसुमसुषमवरनासम् ।
वन्दे राममसितघनरासम् ।

द्विगुणमात्र ध्रुवः—

नारायणनरपतिकृतगीतम् ।
सुखयतु सूरिजनं श्रुतिपीतम् । आभोगः ।

अथ यतिः—केवलध्रुवलक्षणः—

नौमि शतदलमञ्जुलाननमादृताखिलमानवम् ।
खण्डिताधिकगाधिसुतकृत यज्ञघातकदानवम् ।
प्रथम खण्डः ।

प्रलयघनाघन घोरगर्जन तर्जितारि शरासनम् ।
निखिल सिद्धिदसिद्धवलमुनिनिकरदुःखविनाशनम् ।
उच्चखण्डः । ध्रुवः ।

रक्ष रक्ष कृपाम्वुधेति अ आई आ ई अ अ आ ई अ ।
आ ई आ ई अति अ ई आ अ ई भूपमणि नरायणम् ।
आभोगः ।

निःसारुः केवलध्रुवलक्षणः—

अई अई अई दशरथनन्दन कौशल्याहृदय-
सुचन्दन मन्दोदित हातमुख रे ।
तरु मृगपति विहितानन्दन सुरभूसुर विरचित-
वन्दन निन्दित निजनृप सुख रे ।

प्रथमखण्डः—

निर्जित सुरनायक गजवरशुण्डोद्भट भुजयुग-
निर्भर परिपालित-निर्जर आ ।
करुणापरिपूरित सुहृदयदुर्जनतति तर्जन
निर्द्दयकृतरिपु भय जर्जर रे ।

उच्चखण्डः ध्रुवः—

ति अ आ ई अ आ ई अ अ ई अई ।
आ आ आ आ ई अ ई अ ई अ ईअ ।

आईअ आईआ आ आ आ।

तव राम प्रणमति चरणे नारायणभूपतिर्मणिरयमुद्धर रे।

आभोगः ।

अथ मण्ठः केवलमण्ठलक्षणः—

सीतास्तनघन कुङ्कुमपङ्कललितवक्षसे ।

लङ्कासुरशंकातुरसुरहितरक्षसे (?) ।

प्रथमखण्डः—

नमो नमो दिनकरसुतमिथुनीकृतहेतवे ।

रोषदहन शोषविकल जलधिवद्धसेतवे ।

हरिनृपमणि हृदयधरणि-दारण-शर-केतवे ।

सार्द्धैकगुणमात्रो ध्रुवः ।

ति अ ई अ ई आ ई अ ई अ ईअ आ अई ति आ ई आ ।

नारायणगजपतिना गीतमिदं विरचितम् ।

आभोगः ।

अथ झम्पकः उभयलक्षण तत्र ध्रुवलक्षणे—

अधहरण तवचरण-नलिनमहमीडे ।

त्वयि मनो विशतु मम नमदवनशीले ।

प्रथमखण्डः—

मारीचहरण-हरभक्तजनतारी ।

त्वं क्षमासदन हृदि कलिकलुषहारी ।

उच्चखण्डः । ध्रुवः ।

गर्गरीसुत विहितविविधमणिदामा ।

भूपनारायणो भणति गुणधामा ।

आभोगः ।

अस्य मण्ठलक्षणे—

अमरवर-मणिनिकररुचिररुचिरकान्ते ।
कृतसुकृत-दमनजन-हननगत-शान्ते ।

प्रथमखण्डः—

रघुवंशतिलक मम शमय यमतापम् ।
कृतवतो गुणनिधे वत विविध-पापम् ।
त्वामहं ध्यायामि विधृतशरचापम् ।

सार्द्धैकमात्रो ध्रुवः—

अ ई ति आ ई आ ई ई अ ई ति अ ई आ आ ।
नृपतिनारायणं पाहि निमिजापते ।

आभोगः ।

अथ त्रिपुटः । उभयलक्षणः ।

सुरपतितनुजकरटधृतदण्डम् ।
मणिकुण्डलयुगमण्डितगण्डम् ।

प्रथमः खण्डः ।

भरताग्रज रहयामि भवन्तम् ।
मनसो लवमपि न निजमवन्तम् ।

उच्चखण्डः, ध्रुवः ।

नारायणनरपतिकृतगीतम् ।
जनयतु सुखमिदमनिशमुदितम् ।

आभोगः ।

अस्यैव मण्ठलक्षणे—

पदपङ्कजरजसाकृतयोषे ।
क्षितिगतदारविरहधृतरोषे ।

प्रथमः खण्डः ।

भवति दधातु मनोहिनिवेशम् ।
त्यजतु जनकतनयेश(न) लेशम् ।
अ ई अं ति अ आ ई अ ई अ ई ई ति आ ।
ति आ ति आ ई आ अ ई ति अ ई अ आ ।

द्विगुणो मात्रो ध्रुवः ।

दण्डकविहरण-पण्डित देव नारायणनृपमव सुरसेव ।

आभोगः ।

अथाड्डुताल उभयलक्षणः । अस्य ध्रुवलक्षणे—

काकुस्थतनु-विहित-मदन-शतरोषम् ।
पादुकादानकृत-भरत-गुरुतोषम् ।

प्रथमखण्डः ।

शिरसिधृतजटमटवीकृतवासम् ।
त्वामहमनसि निदधाभि शशिहासम् ।

उच्चखण्डः । ध्रुवः ।

वैदेहि धव देहि हृदयमविगीते ।
अत्र नारायणक्षितियकृतगीते ।

आभोगः ।

अस्यैवमण्ठलक्षणे—

निष्पिष्टदुष्टदशवदनमपि वालिनम् ।
लीलयाऽनाथमिव नाथवशशालिनम् ।

प्रथमखण्डः ।

हे राम तव नाम यदि वदति खेलया ।
तरति भवजलधिमपि दुस्तरं हेलया ।
कृत दुरितजातोऽपि सरितमिव भेलया ।

सार्द्धैक गुणमात्रो ध्रुवः ।

रतिरस्तु मम भवति सुहृदि कपिभृते ।
ननु जनुषि जनुषि नारायणक्षितिपते ।

आभोगः ।

अथ रूपक उभयलक्षणः । अस्य ध्रुवलक्षणे ।

अमृतजात जीवत निजमृत-तरुमृग-संहृते ।
प्रतिपादित लङ्कापतिसोदरसुख-संतते ।

प्रथमखण्डः ।

जय कुशलवजनक कनकहरिणहरणगुणनिधे ।
वलदनुचित - वृषलदोषचलितरोषवरिधे

उच्चखण्डो ध्रुवः ।

ति अ आ ई अ आ ई अ ई अ आ ई अ ई अ ई अ ई अ आ ।
नारायणवारणपति शरणं भवति आ ई आ ।

आभोगः ।

अस्यैवमण्ठलक्षणे––

राम पतगमपि निकाममरधाम गमयसे ।
अहिताहित हितमतिर्मति किमिति नाथ न दयसे ।

प्रथमखण्डः ।

ति अ ई अ अ ई आ ई अ ई अ ति अ ई अ अ ई आ ई आ ।
दीनागतिजनतापतिमतिपतितं रघुपते ।
पाहि पाहि दुरितदाहि महिमन्निजजनममुम् ।

सार्द्धैकगुणमात्रो ध्रुवः ।

अमरलोकशोककहरण रणपण्डित तव पदम् ।
भजति पद्मनाभनृपति-तनुज एष गतमदम् ।

आभोगः ।

अथैकताली, केवलमण्ठलक्षणः।

हतदशकन्दर-सुखित सुरेश
निजकरसंस्कृत सीता केश॥

प्रथमखण्डः।

मामव रघुकुलनायक देव, शङ्करकर विरचितपद सेव।

त्वमसि नरोत्तम मामकशरणं
कुरु हृदयं मयि धृतगुरु करुणम्।

द्विगुणो मात्रो ध्रुवः—

सुखयतु गुणिनं श्रुतिपथ नीतं
नारायणनृपविरचित गीतम्।

आभोगः।

इति सालगसूडोदाहरणम्।

अत्र उभयलक्षणेषु तालेषु एकलक्षणमेव गीतं प्रयोज्यम्। मया तूभयत्र उदाहरणीकृतत्वात् सुबोधाय द्वयमपि उपन्यस्तम्। किं च—केचित्कुड्डुकोपाड्डुतालावप्यत्रेति वदन्ति। तथा सति मण्ठ-लक्षणकुड्डुक्कतालस्य उभयलक्षणोपाड्डुतालस्य च उदाहरणमेव-मह्यम्। तत्रास्य निर्याणप्रकारः। तत्र ध्रुवलक्षणतालेषु उद्ग्राह-मध्ये ध्रुवखण्डस्य गणनं कार्यम्। ध्रुव खण्ड एव प्रथम खण्ड इत्यर्थः। एतावता द्विधातुर्भवति। द्व्यवयवमित्यर्थः। अतएवध्रुवलक्षण-तालगीतगाने ध्रुवगानानन्तरं मानं दत्त्वा पुन-राभोगं गायन्ति। उद्ग्राहध्रुवयोरेकखण्डत्वेन कल्पितत्वात्। मण्ठलक्षणतालेषु तु उद्ग्राहाभोगखण्डयोर्मात्रा तुल्या। तत्र उद्ग्राहस्य द्वे अवयवखण्डे यावती मात्रा तावत्या मात्रया ध्रुवे द्वैगुण्यं कार्यम्। एतावता ध्रुवश्चतुः खण्डो भवति। सार्द्धैकगुणपक्षे त्रिखण्डः।

केचित्तु खण्डस्यार्द्धं एकखण्डं चेति सार्द्धैकगुणो ध्रुव इति वदन्ति। तदेवोदाहृतं मण्ठगीते द्वरावतीपुरमित्यत्र 'मुकुन्दनृपतिराजति आई

इत्यादि ध्रुवे सार्द्धैकगुणत्वमिति । गायकपरम्परया उभयमपि गृह्यते ।

अपरं च क्षुद्रगीतानां उदाहरणानि तत्तद्विवेचनस्थाने दर्शितानि, यदधीतं कविरत्नपुरूषोत्तममिश्रतो मया सुधिया, तत् प्रकटीकृतमस्मिन् सुधियः परिशोधयन्तु शतशः ।

यावत् शिवस्यार्द्ध शरीरहर्त्री जगद्गुरोः पर्वतराजपुत्री ।
तावत् क्षितीन्द्रस्य नरायणस्य श्रमो मुदेयं समुदेतु लोके ।

इति श्रीमन्निखिलान्ववायोत्तुङ्ग चोडगङ्गवंशावतंसा-खिलगुणसद्म पद्मनाभभूमिपतितनुजन्मनो महाराजाधिराजस्य साहित्य-सङ्गीतार्णवकर्णधारकमणेर्गजपतिवीरश्रीनारायणदेवस्य कृतौ संगीतनारायणे शुद्धप्रवन्धोदाहरणं नाम चतुर्थः परिच्छेदः ।

समाप्तोऽयंग्रन्थः ।

परिशिष्टः

नटराग—आदिताल

जय जय शङ्कर शशिधरशेखर सव सदाशिव शूलिनि आ
मन्दाकिनीप्रिय महिमामन्दर मृड मृगधर पुरमन्थिनु आ
भवभयभञ्जन भवजनरञ्जन भीमभीम अपखण्डनु आ
भूतिविभूषित भुजयुगभूषित भूदिशभूत रखणु आ
गिरिजा ईश्वर गिरिवरमन्दिर गिरिधर सखपरभक्षकु आ

तिपुरामुदपद त्रिपुरासुर मद
एहाकु (?) सव सुख दाएकु आ।

पाटाः—

दिगि दिगि थो, दाग दिगि थो, थो दिगि थो, दाग दिगि-थो, दिगि दिगि थो, थो दिगि थो, धा धा धिक धुक झे ङ्कि णा झे ङ्किणा ताधिक ताधिक झेङ्किणा थो।

तेना तेना तेना ताते नाते ईते नाते तेना ।

देशाक्ष—त्रिपुट—

अमरवन्दन असुरमर्द्दन अचलनन्दिनि रमणु आ ।
ऋतुविनाशन कामनाशक सूर्यशशिशिखि लोचनु आ।

पाट—

ता झें ङ्कि णा ता झें ङ्कि णा झेरेंङ्किणा झे झे ।
ताकट दिकट मट किरट ताकट दिकट धे धे ।

मल्लारराग-झम्पाताल—

हरिचरणे घात वसुमती थरित अङ्गे।
अमरगण जोडिकर विरुद पड़े अङ्गे।
जयतु नट भालराट शिखिनयन राजे।
दितिकुमर दर्पहर कईलास राजे।
अखिलनरवन्दे वरतुहिन-करकान्ते ।
विषममुख षडवदन ताते।

पाट:—

ता झेंक्रिणा ता झे क्रिण झे झे क्रिण झे रे।
ताकदीकट मटकिरट ताक धिकट धे धे।

मठा—

शम्भुराज तनु विराज कुन्द कुमुद कर्पूरम्।
स्फटिक इन्दु तुषारविन्दु सुरनदीनीर गोक्षीरम्।

ता थारिक कुकुन्दा ता ता थारि वकुकुन्दा झेंक्रिणा झेंक्रिणा झें झेंक्रिणा डि डि कु कु थारि कुता।

रूपक—

हरकर्णयुगल कुण्डलीकुण्डल कण्ठेकाल गरकु आ
विपुल उरे अस्थिमाल कटितटे शार्द्दूलछाल।
नृत्य हरषे भुवनेश्वर शिव शिव अभिया (?)।

पाट—

सा सा स नि ध प नि ध प नि ध प धा धा गु डु
गुडु ते नातेना ताधिकट तडङ्ग थो।

पाटताल—

ता ता ता ते ते ते थेई।
दिगि दिगि ते ते ते थेई।
दगि थेई थै थै ते ते ई।

एकताली—

एकाम्वर वन कन्दर थान्ता ।
शम्भुवरशेष दृवने (?) दाता ।
हरिहर एकतनु एकरूप धरन्ता ।
मोक्षादि चउवर्ग दिअन्ता ।

विश्वम्भर हरे हरे, हर पतितजन उद्धरे ।

पाट—ता ता ता कु कु ता ता कु झे दिकु झे दिगा दिगा थेई ।
थेई थेई ताते थेई थेई ताता धिडे ङ्ग थे ।

राग भूपाल—ताल निसारि—
वेणुधर मुरलिवादन रमणीमनमन्थन कर ।
यमुना पथरजल धरन्ति धरति मदना निरन्तर ।

धुनि शुणिले समस्त पशुगण थम्भीभूत ।
दिश्चललोचन योगिजन योगसाधक विकसन्ति समततम् ।

पाट—

ता झेंक्रिणा ता झेंक्रिणा झेंक्रिणा झेंक्रिणा झेंक्रिणा झे ।
झे थारि झे थारि थारि थारि क्रिंण झेंक्रिण
दाभं द्रींमिकि क्रिणा क्रिणा ।

रागमाला—

एथु अनन्तरे ये शुणिमा सुज्ञजने ।
व्रह्माङ्क सभारे ये गान्धार उच्चारणे ।
स दिस रागमान कहिवा एवे शुण ।
कामोदी, काफी, काली ये कौशिक, कल्याण ।
कन्नडा, कर्ण्णाट, ये केदार, कोलाहल ।
मारुआ, मालश्री कहि मल्लार, मङ्गल ।

मुखारी, मधुकिरी ये मालव, रामकेरी ।
भूपाल, भैरव ये कण्टुक, भाटिआरी ।
धनाश्री, वङ्गलाश्री, गौरी, देशाख्य, पुण ।
अमर गुण्डकेरी ये शङ्कराभरण ।
पाहाडिआ केदार सुरठ आशावरी ।
आषाढ-शुक्ल नाट पूरवी ये शावरी ।
प्रभाती वसन्त ये सारङ्ग गडमाली ।
रेगुप्ता, तोडी, सोम, सउरी, ढमाली ।
चिन्ता देशाक्ष मिशि लेखन्ते राग एते ।
शुणि पितामह ये सन्तोषहेले चित्ते ।

गायन काल दोष—

श्रीपञ्चम्यादिका यावद्विष्णोः शयनमेव च ।
तावद्वसन्तो गायेत प्रभाते भैरवादिकम् ।
मध्यान्हे तु वराड्यादेः सायं कर्णाटनाटयोः ।
श्रीरागे मालवादेश्च गाने दोषो न जायते ।
विष्णोः शयनमासाद्य यावद्गिरिसुतार्चनम् ।
तावदेव समुद्दिष्टं गानं वै मालवश्रियः ।
मङ्गलः सर्वदा काले वसन्तो माधवीरितौ ।
मालश्री शरदि कुर्याद् गायनं कर्म एषकः ।
आज्ञायां भूमिपालानां रङ्गभूमौ विशेषतः ।
सर्वेषामेव रागाणां न गाने कालनिर्णयः ।

आदिताल—

सा रि ग म ता ध नि सा ।

पडिताल—

सा रि ग म सा-रि-ग-म सारि-सारि-गम ।

निसारिताल—

सा-सा-रि-सा-रि-ग-म ।

मठा लाल—

साऽरि-ग-म-साऽरि गम-सारि-सारि-गम ।

वडझम्पा—

सा रि ग म—सारि ग म—गम ।

तिअडा—

सारि सारि सारि ग ।

रूपक ताल—

सारि सारि गम-सारि सारि गम ।

दुआडि ताल—

सारिगम-सारिसारि-गम ।

सान झम्पा—

सारि-सारिग ।

छक ताल—

सा-रि-ग ।

सात स्वरलक्षण—

सा रि ग म प ध

मयूर चातक छाग क्रौञ्च कोकिल दर्द्दुराः ।

नि

गजश्च सप्त षड्जादीन् क्रमादुच्चारयन्त्यमी ।

मयूरोषड्जमाख्याति ऋषभो वक्ति चातकः ।

छागो गान्धारमाचष्टे क्रौञ्चो वदति मध्यमम् ।

कोकिलः पञ्चमं ब्रूते भेको वदति धैवतम् ।

निषादं भाषते हस्तीत्येवं ब्रह्मादि सम्मतम् ।

सा रि ग म प ध न। सा–षड्ज, रि–ऋषभ। ग–गान्धार, म–मध्यम, ध–धैवत, नि–निषाद ए रूपे सातस्वर।

लीलाविहारेण वसन्तकाले
चिन्वन् प्रसूनानि वधूसहायः।
विलासिवेशोऽसित दिव्यमूर्त्तिः
श्रीराग एष प्रथितः पृथिव्याम्।

अस्त्रास्तधन्वा ऋजुतां नयन् वाणान् शुकद्युतिः।
आसनस्थो युवा चारुवेशो नट्टस्तु वाहुजः।

नट्टराग कु गमकरे गाइव।

जातिन्यासग्रहग्रामांशेषु षाड्जोऽल्पपञ्चमः।
शृङ्गारवीरयोर्गेयः श्रीरागो गीतकोविदैः॥

श्रीरागवत्तथा नाट किन्तु नैषोऽल्पपञ्चमः।
धरितारो निमन्द्रश्च गमकैरुत्कटैर्युतः।

कृपाणपाणिस्तुरगाधिरूढो मयूरकण्ठोपमकण्ठकान्तिः।
स्फुरच्छितोष्णीषधरः प्रयाति कर्न्नाटरागो हरिणान्निहन्तुम्।
कर्न्नाटः तद्वदाख्यातो विन्यासग्रहणांशकः।

अङ्के निषण्णां सुरतान्तखिन्ना–
माश्वासयन् स्वाञ्चलवीजनेन।
सीमन्तिनीश्वासचलाकुचान्ता
सुवर्ण्णकान्तिः किल रेवगुप्तः।

रेवगुप्तोऽरि ग्रहांशो मत्रोमर्षभ्रमोद्भवः।
षड्जमध्यमिकाजातः षड्जन्यास ग्रहांशकः।
गेयो वसन्तरागोऽयं वसन्तसमये वुधैः।

शिखण्डवर्होच्चयवद्धचूडः पुष्णन् पिकं चूतलताङ्कुरेण।
भ्रमन्मुदाराममनङ्गमूर्त्तिर्मतो मतङ्गस्य वसन्तरागः।

स चन्द्रहासं फलकं दधानो निवद्धकक्षो दृढवद्धचूडः ।
गतिं वितन्वन् बहुधा पदातिः प्रचण्डरूपः किल भैरवोऽयम् ।

धैवतांशग्रहन्यास युक्तस्याच्छुद्धभैरवः ।
सकम्प्रमन्द्रगान्धारो गेयो मध्यान्हतः परम् ।

मनोज्ञमौञ्जीगुणकम्पिताङ्ग—
स्त्वचं दधानो धरणीरुहस्य ।
चण्डः कुमारः कमनीयमूर्त्तिः
वङ्गालरागः शुचि सामगानः ।

वाङ्गालः कैशिकी जातः षड्जन्यास ग्रहांशकः ।
सकम्प्रमन्द्रगान्धारो गेयः करुणहास्ययोः ।

निशाङ्गना वक्षसि शाययित्वा
कलङ्कदम्भात् सुरतश्रमान्ता ।
स्खलत्करः सालसलोचनश्रीः
कामी सुधापाण्डर एष सोमः ।

जातिन्यासग्रहांशे तु षाड्जो वीरे घनागमे ।
नितारः पनिवाहुल्य सोमरागोऽत्र गीयते ।

युवातसीसूनसमानकान्तिः
श्रीखण्डपङ्कार्द्रसमस्तदेहः ।
वीणा प्रवीणोऽमरपञ्चमोऽयं
गीतेन मुग्धीकृतदेवराजः ।

आन्ध्रजातिसमुत्पन्नो मध्यमग्रामगोचरः ।
गान्धारांशग्रहन्यासो रागः स्यादाम्रपञ्चमः ।

अक्षमालां करेधृत्वा वसानस्तारवीं त्वचः ।
जपन् जन्हुसुतातीरे कामोदः परिकीर्त्तितः ।

कामोदः करुणे हास्ये नितारो बहु कम्पनः ।
षड्जो जाति ग्रहांशेषु यामोर्द्ध न्यासमन्वगः ।

पर्यङ्के प्रियया सार्द्धमासीन उपवीणयन् ।
पीताम्वरसुभूषाढ्यो मेघोराग घनद्युतिः ।

वीरेधांशग्रहन्यासः (?) षड्जधैवतकोद्भवः ।
गेयो घनागमे मेघरागोऽयं मन्द्रहीनकः ।

अंशात्तकर्णः शशिरांशुधामा कृकाटिकाचुम्वित चारुचूडः ।
स्रग्वी तपन् पाणिधृताक्षदर्भो विप्रो युवा द्राविडगौड एषः ।

निषादांशग्रहन्यासः षड्जमध्यमसंकुलः ।
गेयः द्राविडगौडोऽयं वीरशृङ्गारयोर्निशि ।

श्रीखण्डशैलशिखरे शिखिवर्हवासा
मातङ्गमौक्तिककृतोत्तमहारयष्टिः ।
आकृष्य चन्दनतरोः शवरीभुजङ्गा–
मावन्धतीवलयमुज्ज्वलनीलकान्तिः ।

शावरी धैवतान्ता च गतागमन्द्रमध्यमा ।
अग्रहांश लपज्जा च प हीना करुणे मता ।

वासो वसाना शरदभ्रशुभ्रं विरञ्चिदेवी परिवद्धदक्षा ।
कुन्दावदाता चतुराननस्य खम्भावती लब्धसमृद्धसेवा ।

धैवतांशग्रहन्यासा सान्दोलामणिमण्डिता ।
खम्भावती पहीना च शृङ्गारे निशि गीयते ।

सख्या प्रवोधमानापि कान्ते रोषं न मुञ्चति ।
परावृत्तमुखी श्यामा वल्लाली प्रौढनायिका ।

हिन्दोलान्वयसम्पन्ना वल्लालीष ग्रहांशका: ।
शृङ्गाराख्ये धमन्द्रारि हीनान्यास षड्जिका ।(?)

आस्फोटनाविष्कृत लोमहर्षो नियुद्ध संनद्धविशालवाहुः ।
प्रांशुः प्रचण्डद्युतिहेमगौरो देशाख्यरागः स हि मल्लराजः ।

गान्धारपञ्चमाज्जाता देशाख्यर्षभवर्जिता ।
गान्धारांश ग्रहन्यासा शान्तशृङ्गारयोः प्रगे ।

दुर्वादलश्यामतनुर्मनोज्ञा कान्तं लिखन्ती फलके विदग्धा ।
वालाचलल्लोचनवारिविन्दुर्निस्यन्दधौतस्तनहृद्धनासी ।

षांणा धन्नासिकाजाता शुद्धकैशिकमध्यमात् ।
षड्जग्रहा मध्यमान्ता रिहीना विजये सदा ।
मध्यमांश पहीना च कलहे गमनोत्कटा ।

उन्मत्तपुंस्कोकिल रम्यनादस्वरं प्रगायन्ति च कृष्णगाथा ।
वशी सदा सर्वपुरः प्रर्वात्त कोलाहलोऽयं तरुणोऽसिताङ्कः ।

षड्न्यासग्रहाकोलाहला टक्क कुलोद्भवा ।
मध्यमांशापहीना च कलहे गमनोत्कटा ।

कोलाहलराग नच पूर्वमस्य स्त्रीलिङ्गत्वमिह पुंलिङ्गत्वमित्यसगतिरिति वाच्यम् ।

विधाय शम्भुं सुरनिम्नगातटेमुदार्च्चयन् नीलसरोजसंघैः ।
मनोज्ञमूर्त्तिर्दधदंशुके सिते त्वगासनस्थो द्विज एष गौडः ।

निषादांश ग्रहन्यासो गौडःस्यात्पञ्चमोज्झितः ।
वीरशृङ्गारयोर्गेया दिनान्ते विरलर्षभः ।

गजपतिगतिरेणीलोचनेन्दीवराङ्गी
पृथुलतरनितम्वा लम्ववेणी भुजङ्गा
तनुतरतनुवल्ली वीतकौसुम्भवासा
इयमुदयति देशी वाणिनी चारुहासा ।

रेवगुप्तोद्भवादेशी गत्यक्तवर्निविस्तरा (?)
विन्यासांशग्रहाप्रातर्गेया करुणशान्तयोः ।

सिंहासनगतः श्वेतचामरद्वयवीजितः ।
मन्त्रिभिर्वेष्टितः श्यामछत्राभ्यां रागभूपतिः ।

मध्यमांशग्रहन्यासो भूपतिः करुणे दिवा ।
व्याघ्रचर्ममलं पिदधानो भोगिहारवलयाङ्गविभूषः ।

सान्द्रभूतिपरिलिप्तशरीरः शङ्कराभरण एष उदीतः।
वीरे निशि निषादांशः शङ्कराभरणः सदा।

एते राग सपूर्ण्ण राग।

संपूर्णाः षोडशास्तत्र औडवाश्चेति ते त्रिधा।

एतद्गानफलमाह—

आयुर्धर्मयशः कीर्त्तिर्वृद्धिः सौख्यधनानि च।
राज्याभिवृद्धिः सन्तानः पूर्णरागेषु जायते।

अथ षाडवा लिख्यन्ते—

प्रसरदिभवरस्य स्कन्धमारुढ उद्यत्।
कनकरुचिरमध्यं धूनयन् सर्वदाग्रम्।
प्रदलितरिपुसैन्यो भीमघण्टारवेण
स्फुरितकनककान्तिर्भाति घण्टारवोऽयम्।
घण्टारवो धैवतजः प्रतापे सर्वदापि च।
स्त्रीवेशधारी पुरुषो नवीनः
सङ्गीतशाले भ्रमिमादधानः।
गायन् सतालं सलयं मनोज्ञः
स्यान्नट्टनारायण राग एषः।
धैवतांश ग्रहन्यासो नट्टनारायणो दिवा।
शुचि हरिचन्दनपङ्के रतिसहितं मन्मथं पुरः कृत्वा।
गौरतनुर्बहुविधिना गौरी परिपूजयत्येषा।
ग्रहांशन्यास षड्जास्याद्गौडीमालव कौशिकात्।
वीरभृङ्गारयोर्गेया सकम्पान्दोलितस्वरा।
तुरङ्गमस्कन्धनिवद्धरागः
स्वर्णप्रभः शोणितशोणगात्रः।
संग्रामभूमौ विचरन् धृतासि-
र्नाटोऽयमुक्तः किल काश्यपेन।

नाट्ये निशि शुचौ वीरे षड्जांशोगमकोत्कटः ।
विदेशस्थस्य कान्तस्य वृत्तान्तमतिविह्वला ।
नट्टारहितवेशौघा पृच्छन्ती काममादरात् ।
नट्टा नटवदाख्यातासकम्पान्दोलितस्वरा ।
हास्येऽद्भुते च शृङ्गारे गातव्या निशि मङ्गले ।

सङ्केतदीक्षां दयितस्य दत्वा
वितन्वती भूषणमङ्गयष्टिः ।
मुहुः स्मरन्तीस्मरमिष्टदेवं
वलावली नीलसरोजकान्तिः ।

धैवतांशग्रहन्यास समन्द्रा च समस्वराः ।
शृङ्गारे करुणे चैव गेया वेलावली वुधैः ।

स्वर्णप्रभाभासुरभूषणाढ्या नीलं निचोलं वपुषा वहन्ती ।
कान्ते प्रदोषान्तमधिश्रितेऽपि मानोन्नता रामकिरी प्रदिष्टा ।

प्रहराभ्यन्तरे गेया षड्जन्यासग्रहांशका ।
षड्जर्षभग्रहारम्भा तज्ज्ञै रामकृतिर्मता

वियोगिनी कान्तवितीर्णपुष्पस्रजं वहन्ती वपुषातिमुग्धा ।
आश्वास्यमाना प्रियया च सख्या विधूसराङ्गी पढमञ्जरीयम् ।

प्रथमांशग्रहन्यासा धरितारागमोत्कटा ।
शृङ्गारे चोत्सवे गेया प्रातः प्रथममञ्जरी ।

धनासी मालसी रामकेरी च सिन्धुडा तथा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ।

सुनिद्रनीलद्युतिमम्वुजाक्षी प्रवादयन्त्येकविलासयन्त्रम् ।
रत्नैर्विचित्राभरणा सुकेशी सा सिन्धुडा कान्तसमीपसंस्था ।

सैन्धवी पञ्चमाज्जाता ग्रहांशन्यास पञ्चमा ।
मध्याह्नादूर्द्धतो गेया शृङ्गारे करुणेऽपि च ।
सैन्धवी सिन्धुडेति प्रसिद्धाः ।

भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा ।
ख्याता देवकिरी ह्येषा करार्पितसखीकरा ।
षड्जन्यास ग्रहांशोऽयं वीरे देवकृतिर्मता ।
अपावृतुषु सर्वेषु गातव्या समयेषु च ।

इयमेव शुद्धवसन्त इति कृष्णदत्तः ।

विनोदयन्ती दयितं च गौरी
सुकङ्कणा चामरचालनेन ।
कर्णे दधाना सुरपुष्पगुच्छं
वराङ्गनेयं कथितो वराडिः ।
प्रहरादूर्द्ध्वतो गेया भिन्नपञ्चमसंभवा ।
षड्जन्यासग्रहांशैषा वराडिः भरतोदिता ।

श्यामा सुकेशीमलयद्रुमाणां
मृदूल्लसत्पल्लवतल्पपाता ।
श्रुतेः स्वराणां दधती विभागं
चान्द्रीमुखी दक्षिणगुज्जरीयम् ।

××गुज्जरी ग्रहांशान्ता जाता पञ्चमपीडवात् ।
क्वचिन्मांशापि घस्रादौ गेया शृङ्गारवर्द्धनी ।
दशधा गुर्ज्जरी प्रोक्ता । सङ्गीतसारे दक्षिणगुज्जरीयं ।

उन्निद्रपङ्केरुहचारुनेत्रा
कुरङ्गशावं कलमाङ्कुरेण ।
सम्भावयन्ती विपिनोपकण्ठे ।
तोडीयमिन्दीवरदावरम्या ।

ए तोड़िराग । एहाकु दुइप्रहरे गाइब ।

मध्यमांश ग्रहन्यासो तोडिका शुद्धपीडवात् ।
जाता मध्यान्हसमये गेया शृङ्गारवीरयोः ।

लीलारविन्दस्य दलानि वाला
विभावयन्ती तनुदेहयष्टिः ।
मालूरवृक्षस्य तले निषण्णा
शोणा मृदुर्मालवश्री प्रदिष्टा ।

मालवश्री शरद्गेया जाता मालव कैशिकात् ।
एषा षड्जग्रहन्यासा पार्वती प्रीतिकारिणी ।

आर्षभ धैवती वर्जिता: शुद्धजातय कैशिकी जाति वाच्या ।

दधिमन्थन सिञ्जान मेखलाङ्गदकङ्कणा ।
स्वेदार्दवदनाम्भोजाभीरी गोपालवल्लभा ।
धान्ताभीरी धैवतजा रि हीना च शुचौ प्रगे ।
आताम्रमौलिनेत्रा चम्पकगौरीकृतारम्भा ।
मुखमधुलुब्धान् भ्रमरान् मधुकिरिका वारयत्येषा ।
धांशग्रहा मधुकिरी ग हीना करुणा दिने ।
अङ्गहारान् शिक्षयन्ती कुमारान् नृत्यमन्दिरे ।
तारा माराङ्गनाकारा नाट्याटोपविदांवरा ।
तारा दिवारतौ युद्धे निषादा श्यामवर्जिता ।

वीणाविनोदप्रतिपन्नपाणिः
गृह्णन् कथां नारदसंप्रयोगान् ।
श्यामो युवा विप्रकुलप्रसूतः
स सालगो नाट्यमुनिप्रणीतः ।
मांशः प हीने वीरे च रणैर्मालव गौडकः ।
दुर्वादलश्यामरुचिर्विवस्त्रा
वलाद् विशन्ती दयितोरुमध्ये ।
स्कन्धान्तरप्रेरित दक्षहस्त–
धृतस्तनान्ता किल हुंछिका स्पात् ।
आन्दोलितमपाधान्त ग्रहा मध्यमवर्जिता ।
गेया यामद्वयादूर्द्ध्वं शृङ्गारे हुंछिका वुधैः ।

निधाय स्फोटनैरङ्कं लालयन्ती सुतं मुहुः।
कुर्वन्तीविविधालापं भौलिमौलि मनोहरा।
प्रोज्झितांशग्रहा भौलि प्रातर्गेया सुरस्तुतौ।

निपात्य तल्पे सुदृढानुरागा
त्कान्तं रते कान्तमवेत्य मुग्धा।
प्रौढाङ्गना पौरुषमाचरन्ती
मनोहरा हर्षपुरी प्रदिष्टा।

जाता हर्षपुरी षड्जमन्द्रामालव कौशिका।
षड्जाद्यन्ता तारमध्या ध हीना विजये मता।

विस्पष्टकृष्णाजिन मध्यवर्त्ति
कान्तः पवित्रः स्थविरोऽतिगौरः।
कुर्वन् कथां तुम्वुरनारदाभ्यां
श्रीमाधवादिः कथितो मुनीन्द्रैः।

पञ्चमांश ग्रहन्यासा प हीना मन्द्रमध्यमा।
शृङ्गारे दुर्दिने गेया मल्लारी परिकीर्त्तिता।